दशमस्कंधःटवार्थ

दशमस्कन्ध टवार्थ

श्री भा॰ द॰ स॰ १

स्वस्ति श्रीगणेशाय नमः । अतीतस्कन्धान्ते जातो मनः पितामहादिश्लोकद्वयेन संग्रहेण प्रदर्शितं श्रीकृष्णावतारचरित्रं विस्तरेण शुश्रूषुरिति क्रान्तस्कन्धार्थानुवादपूर्वकं पृच्छति राजा कथित इत्यादिदशभिः तत्र श्लोकसार्धेन स्कन्धार्थमनुवदति सार्द्धेन सोमसूर्ययोस्तु उभयवंश्यजानां चरितं वंशविस्तारस्तेषां परमाद्भुतं चरितं च कथितं १ हे मुनिसत्तम नितरां धर्मशीलस्य यदोः वंशे विस्तरः कथितो मुनानन्तरं यदोर्वंशे अंशेन बलरामरूपेण अवतीर्णस्य यद्वा संकर्षणरूपेणांशेनावतीर्णस्य विष्णोः वीर्याणि नः शंस अत्र विष्णोः भगवतः श्रीकृष्णस्य योगानां प्रवृत्तिरेव महीयसी वीर्याणि रूपाणि कथयस्व अत्र तु नरोत्तमानां सविस्तरं यद्वा यदुवंशे प्रवृत्ती शंस इति विस्तरतः कथय कानि वीर्याणि तत्राह अवतीर्येति यद्यपि पुरूरवादिवंशेषु योगविस्तारः तस्य वीर्याणि तानि दुर्विज्ञेयानि भगवतो भगवत्त्वात् निजसत्तामात्रतया विस्तरेण प्रभवेति भावः अत एव नरवत्लीलया स्थितम् २ अवतारप्रयोजनं तत् लीला चरितं च विस्तरेण वदेत्यभिप्रायेणाह एतदेव तद्वक्तुं सङ्क्षिप्तमाह भूतानि सातु भूतानां भावयन् पितेत्याह यत उक्तप्रकारेण तं विश्व

राजोवाच कथितो वंशविस्तारो भवता सोमसूर्ययोः । राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् १ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम । तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः अवतीर्य यदोर्वंशे भगवान्भूतभावनः । कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् २ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ४॥

यत्तद्विश्वमात्मा शरीरं यस्येति वा विश्वात्मा २

ननु विस्तारो बहुत्वमिति चेत् अनन्तविक्रमः इत्युत्तीर्णत्वाह निवृत्ततर्षैरिति उत्तमश्लोकगुणानुवादादित्यस्य प्राधान्याद्यथाः उत्तमश्लोकस्य भगवतो गुणानुवादरूपात्कथासुधामृतात् विरज्येत न कोऽपीत्यर्थः प्रतिपृष्ठे दैवलक्षणं व्यवस्थापयितुं निर्दिशन्नाह निवृत्ततर्षैरिति विषयेष्य तृष्णारहितैर्मुक्तैरपि उपगीयमानात् तथा मुमुक्षूणां भवरोगस्य औषधवत् निवर्त्तकात् विषयिणां श्रोत्रमनोऽभिरामात् अतो हि वृत्तवत्सु इत्थं सर्वेषां स्वादवत्तमं इति भावः श्रोत्रयोः मनसश्चाभिरामात् श्रोत्रमनोऽभिरामं इति भावः उत्तमश्लोकगुणानुवादात् तस्मात् पशुघ्नं हन्तीति पशुघ्नः आत्मघाती केवलं स एव विरज्येत यतः पशुघातिप्रमादिति छेदः तदपवर्गोत्तमस्यापि पेक्षया अयं नयतमश्रवणमत्रेति पशुघ्नतुल्यः पशुहननादिकं यथा न त्यज्यते तथा हत्याहिंसागतेः स वैरिणोः बहुमानेन गुणेषु मुख्यतया प्रकाशमानविषयान्तरप्रवृत्तितया भवदुत्तमश्लोकगुणानुवादात् तेनापि नाभिज्ञः नकुलेनापि पशुघ्नादिति तात्पर्यम् ४ ॥

का ने

भा॰ द॰
श॰ टी॰
२
वर्षा४

...न्नवान्यानि विस्तरात्तानि नो वदेति सामान्यतः पृष्टानि वीर्याणि विशेषतः पृच्छति कस्मादिति चतुर्भिः भगवान्मुकुंदः कस्माद्धेतो
पितुर्वसुदेवस्य गृहान्नंदव्रजं गतः सात्वतांभक्तानांपतिः भगवान् ज्ञातिभिर्गोपैः सह क्व निवासं कृतवान् १० व्रजे मधुपुर्यां च वसन्किमकरो
त् मातुर्देवक्याः भ्रातरं मातुलं मातुरग्रे वा तदर्हणं वधार्हं कंसं कुतोऽवधीत् ११ मानुषं मनुष्यवद्देहं मायया न तु देहं दिव्यमंगलविग्रहमाश्रित्य प
रिगृह्य वृष्णिभिर्यदुभिर्द्वारकायां कति वर्षाणि उवास तु वा न हे विभो तस्य पत्न्यः कति बभूवुः ११ एतदुक्तमन्यदपि यद्यत्सर्वं कृष्णस्य विचेष्टितं हे मु
ने प्रश्नोत्थापनसमये वा पुक्तत्वा न्वितायमम हे सर्वज्ञ सामान्येन कृष्णचेष्टितानि विस्तृतं यथावद्वक्तुमर्हसि १२ प्रायोपविष्टस्याशनाद्यपि पिपासा १ ६५
भ्यामर्दितस्य तव कथं श्रवणे प्रवृत्तिर्न समर्थया न संभव इत्याह नैषेति त्यक्तं उदकं उदकपानं येन तथाभूतमपि मां सोढुमशक्या एषा क्षुन्न बा

कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः। क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतांपतिः ९ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः। भ्रातरं चा
वधीत्कंसं मातुरद्धातदर्हणं १० देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः। यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभो ११ एतदन्यच्च स
र्वं मे मुने कृष्णविचेष्टितं। वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं १२ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते। पिबंतं त्वन्मुखांभोजच्यु
तं हरिकथामृतं १३ सूत उवाच एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं। प्रत्यर्च्य कृष्णचरितं कलिक
ल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः १४ श्रीशुक उवाच सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम। वासुदेवकथायां ते यज्जाता नैष्ठिकी

२

बाधते न हेतुं यदन्नात्तानं विशिष्टं नष्टे त्वन्मुखांभोजाच्च्युतं गलितं हरिकथैवामृतं पिबंतं मां इत्यन्वयः १३ इत्थमापृष्टो भगवान् शुकः कृष्णच
रितं विस्तरतः कथयितुमारभत इत्याह सूतः एवमिति हे भृगुनंदन शौनक इत्थं इमं साधोः परीक्षितः साधुवादं प्रश्नरूपं निशम्य भगवान् व्यासपु
त्रः शुकः ततो विष्णुरातं परीक्षितं प्रत्यर्च्य प्रशस्य मिलितं तत्कालिकस्य सर्वस्य पूजनं कृत्वा तां च कलिकालकृतपापघ्नं [illegible] भगवतश्चरितं व्याहर्तुं विस्तरतो
वक्तुमेकादशस्कंधपर्यंतेनैव शुकः आरभत आरेभे शुकश्चेत्तद्दिव्यमिप्रायेण तं विशिनष्टि भागवतप्रधानः भागवतेषु भगवत्स्वरूपगुणाद्यनुसंधा
मेवपश्य नैष्ठिकत्वं प्रयोजनं यस्य तथाभूतः १४ तावत्प्रत्यर्थोऽमाह सम्यगिति द्वाभ्यां हे राजर्षिसत्तम बुद्धिः सम्यग्व्यवसिता निश्चिता हेयोपादेयविवे
नैष्ठ कयुक्तेत्यर्थः कुत एतज्ज्ञातमित्यत्राह यद्यस्माद्वासुदेवकथायामेव तव मतिर्नैष्ठिकी निष्ठायुक्ता वासुदेवकथाश्रवण एव परिनिष्ठि

वदतां४
ताम
२

कोसौ न त्वलंउपकारः यदभिज्ञानात्तत्कथानुवादान्न विरज्येत बहुषु भगवदवतारतच्चरितेषु सत्स्वपि किं विशेषेण कृष्णावतारतच्चरितादिकं पृच्छसीत्यत्रा
ह पितामहा इति त्रिभिः अमरंजयैर्देवानपि जेतृभिः समरे भीष्मादिभिरतिरथैरेव तिमिंगिलैर्हेतुभिर्दुःखेनात्ययो यस्य तं पारं गंतुमशक्यं कौरवाणां सैन्यमेव सागरं यो
भगवानेव प्लवस्तारणसाधनं येषां ते मम पितामहाः युधिष्ठिरादयः गोष्पदतुल्यं कृत्वाऽतरन् स्म पारं जग्मुः किल श्लोकद्वये यच्छब्दद्वयोर्वीर्याणि तस्ये
त्यन्वयः ५ किंच द्रौणेरश्वत्थाम्नोऽस्त्रेण तन्मुक्तब्रह्मशिरोनामकेन विप्लुष्टं दग्धं इदं मदंगं मच्छरीरं कुरूणां पांडवानां च संतानस्य बीजं प्रवर्तकं वंशधर यो
पि स्वस्यैव वंशस्थत्वात्कुरुपांडवसंतानबीजं इत्युक्तं योजुगोप रक्षितवान् अतः शरणं गताया मम मातुरुत्तरायाः कुक्षिं प्रविष्टः आत्तं धृतं च कं सुदर्शनं येन तथा
भूतः स पितामहप्रभृतीनां मम स्वस्यैतेषां मतिविष्टुपरित्राणेन एवं पांडवादीनां तस्य महोपकर्तुर्गुणानुवादात्कथमहं विरज्येयमिति भा
वः ६ यत एवमतो हि विष्णोरखिलदेहभाजामंतर्बहिः पुरुषकालरूपैर्मृत्युं च प्रयच्छतः देवैतानां कालीयदमनादीनां च वाकुल्पादि दुच्चेचनं देवकीतनाका

मूल

पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन्वत्सपदं स्म यत्प्लवाः ५ द्रौण्य
स्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ६ वीर्याणि तस्याखिलदेह
भाजामंतर्बहिः पूरुषकालरूपैः प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ७ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्व
देवक्या गर्भसंबंधः कुतो देहांतरं विना ८ ॥

लात्मकैः रूपैः शरीरैः तच्चांतःपुरुषरूपेणामृतममरणं स्थितिं प्रयच्छतः स्थितिर्मोक्षो वा यथे:
च्छाविचारदिः कालरूपेण मृत्युं संप्रयच्छतः विनाशहेतोरित्यर्थः समस्तजगत्कारणस्येश्वरस्य कारणत्वेपि यदुनिकारणस्यैव वस्तुतो न्यूनत्व
श्रवणोद्यानेसच्च श्रवणमननादिपर्वतत्वान्नविषयमधुसूदनामाश्रोतिशापनायाखिलदेहभाजां इत्याद्युक्तं अन्तर्यचे सत्तांतर्वे भूत
स्य कथं मनुष्यत्वाप्रतिरिंसता विशिनष्टि मायया मनुष्यस्य संकल्पज्ञानेन मनुष्यस्वरूपं न मनुष्यस्य वा तस्य श्रीहरेस्तद्वीर्याणि वदस्व
कामस्य भाषणोपसंभावेस्यादिसत्त्वेन वदेत्यर्थः ७ अंशेनावतीर्णे सोंऽशश्चारित्रमपि कथमित्याशंक्य पृच्छति रोहिण्या इति तत्र देवक्यां जन्मश्रुतिरोहि
ण्यास्तनयं इति संकर्षणः भगवदंशावतारस्य बलरामः रोहिण्यास्तनयः स्मृतः तथा तस्य देवकीगर्भसंबंधश्च स्मृतः त्वया न वमे द
ति शेषः तदेतद्दुर्घटं देहांतरं विनैवैकेन देहेनैव तत्सुकथोभे तोरभवत् ८ ॥

भा॰पू॰
टी॰
३

कायेो गोरित्यत्राह पुरैवेति सईश्वराणामप्यीश्वरो भगवान्स्वसंबंधिन्या कालाख्यया शौर्यपराक्रमात् पुरुषविशेषणम्
न यावत्तावदुर्व्या भूमेर्भारं क्षपयन्निरसितुं इतिभावः अधिया यावच्चरेद्भुवि तावद्भवद्भिरंशैर्यदुषूपजन्यतामित्यर्थः २२ तथाच वसुदेवगृहे भगवान्
पराख्यः पुरुषः प्रकृतिपुरुषविलक्षणः साक्षाज्जनिष्यते अवतरिष्यति न कपिलादिवज्जीवान्तरावेशात् तेनावतरिष्यति किंवदवस्करैवे
त्यपि प्रायेणैतस्मादिदमुक्तं तस्य जनिष्यमाणस्य परमपुरुषस्य प्रियार्थं परिचर्यार्थं कीडार्थमितियावत् सुराणां स्त्रियोपि संभवन्तु किमुपुं
सांसत्वोमेतस्यर्थः २३ तथाऽनन्तांशोपि तस्य भगवतः आदेशात्तन्मात्रसंपुत्रं रोहिण्याः कलत्वं तोगर्भरोहिण्याः संभवतु किमर्थं तस्माद् हेतुः
पयोदात्मभावेन तौ रुद्रहरिनाम्ना वामविष्णुस्वरूपविरहितस्यास्मादिति तपोऽयं सर्वावस्थानापयोः अतएव नोपि तपोऽपि नगोचरिण्याः कलत्वमपि ।

पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदे
वगृहे साक्षाद्भगवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः २३ वासुदेवकलानन्तः सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ विष्णो
र्माया भगवती यया संमोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ श्रीशुक॰ इत्यादिश्यामरगणान्प्रजापति
पतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २७ शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुराञ्छूरसेनांश्च वि
षयान्बुभुजे पुरा २८॥

निर
त्ययिष्यामि प्रायः २४ तथा विष्णोर्मायया याकाश्यां यया मायये दं जगच्चेतनवर्गः संमोहितं सापि
भगवती स्वमायाधिष्ठात्री देवता प्रभुणार्थं तत्र भगवता दिष्टा सती तस्य कार्यार्थे यशोदाजठरे संभविष्यते २६ इत्येवंभ
गवतोक्तं वेदेन ब्रह्मणामरस्याधिष्ठ्य प्रजापतीनां दक्षादीनामपि पतिर्विभुः ब्रह्मा गीर्भिर्मह्या आसांत्वयित्वा परमं श्रेष्ठं स्वधाम स्वलोकं
ययौ २७ तदेवमवतारनिमित्तमुपपादितमथावतारप्रकारं पितुर्गेहात् व्रजगमनविनिमित्तेच यदुपपादयितुं तदुपोद्घातमुपक्रमते शूरसेना
इत्यसेनेत्यादिना पाठद्वयं प्रसमाप्ति शूरसेनस्य यदूनां पतिः शूरसेनो राजा मथुरां पुरीमधिवसन्मथुरान् शूरसेनांश्च
विषयान्देशान्बुभुजे तत्रस्थो भोगान्बुभुजे इत्यर्थः मथुपालनं चक्रे इतिभावः अत्रैव वनस्थान्नप्रत्याख्यातेः इति २८

राम
३

किं तत् कुरुक्षेत्रात् मोक्षलोकात् वासुदेवकथायाः प्रश्नः श्रीमद्भुः शृणोति कान्तकारं यङ्कं तञ्श्रोतं श्वेति मङ्गा प्रतिवक्ताचैकेन
वभायं इत्यादि प्रायेण वक्तारं यङ्कं इत्येक वचननिर्देशः श्रोतव्यमित्युक्तं प्रिय इति वक्तव्यवचनं निर्देशः यथा तस्य वासुदेवस्य पादसलिलं गांग
मं भः शृणोति तत्र च पवित्रीकरणं मोक्षहेतुः तत्र एतद्वयं पवित्रीकरणं त्रयाणां तत्रासंभवात् यथा गांगं सलिलमुपस्पृशन्तं तत्पितरं पितामहं च
नाति तद्वदितिदृष्टान्ता मिथः यथा तस्य पादसलिलमुपस्पृशं तमेकमेव कुरु पुण्यमिति तथा तत्कथाप्रश्नः पुनाति पितृश्रोतीति प्रति रूपं दृष्टा
वा५ लौकिमितः १६ तमिस्त्रप्रस्य श्रीवत्सारभमतीति वीर्याणि विस्तरतो विवक्षुस्तावदवतारनिमित्तं स्वयंभूप्रार्थनामुपपादयति चतुर्भिः भूमि
रिति दृप्ताः क्षितानृपवदवभासमाना ये दैत्यास्तेषामनीकानां सेनानां शतानां महातैर्भरिणा रोत्तरं पतितवधिकभारेणाक्रान्ता पीडिताम्

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातीति वक्तारं यङ्कं श्रोतॄंस्तत्पादसलिलं यथा १६ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः आ
क्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत १८ ब्र
ह्मा तदुपधार्याथ सह देवैस्तया सह जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः १९ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसू
क्तेन उपतस्थे समाहितः २० गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामा
शु तथैव मा चिरं २१॥
निर्ब्रह्मालं चतुर्मुखं शरणं ययौ २७ तद्वृत्तं प्रपञ्चयति गौर्भूत्वा गोरूपं विधाय एवं खिन्ना दीना अश्रूणि मुखे यस्यास्त
था भूता करुणं यथा तथा क्रन्दन्ती विभोर्ब्रह्मणोन्तिके समीपे उपस्थिता स्तुवंतो मम नेदुःखं तस्मै ब्रह्मणे स्वमात्मीयं व्यसनं चाविज्ञापयामास १८
ब्रह्मा तदुपधार्य सम्यक् ज्ञात्वा अथ देवगणैस्तया भूम्या च सह सत्रिनयनः सरुद्रः क्षीरसागरस्य तीरं जगाम १९ त
त्र तीरे गत्वा समाहितः ब्रह्मा जगन्नाथं परमपुरुषं वृषाकपिं श्रीविष्णुं पुरुषसूक्तेन तस्तुष्टाव स्तुतिमवैकं निरस्याविर्भावः २०
तथाच गगने समीरितां गिरं समाधौ निशम्य वेधास्त्रिदशान् सुरानुवाच तदेवाह गां मत्स्यादिभिः पञ्चभिः हे
अमराः सुमनसो मया पौरुषीं गिरं मत्तः शृणुत यथा नेपुर्याऽपि तथैव ब्रुवे विधीयतां क्रियतां चिरं विलं
बं माकार्षीत् २१॥ पराम२

भा॰ द॰
पू॰ टी॰
४

4

उक्तिमेवाह नवभिः श्लाघनीयेति ॥ हे शूर श्लाघनीया गुणा यस्य भोजानां भोजवंश्यानां यशस्करो निजकरो त्वं वदतीति तथा सति भगवान् एवं भूतत्वात् उक्तिमेवाह नवभिः श्लाघनीय इति । मृत्युरिति निदानभूतत्वात् तेनाभिभूय हन्याः इत्यर्थः उद्वाहमहोत्सवे शिशुप्रवेशसमये तत्रापि भगिनीं हन्याः ३७ मृत्युरिति तत्तदेहेन सह जायते । मृत्युः देहेन सहैव जायते उत्पत्तिसमय एव कालमात्रमपेक्ष्यत इति भावः अत एवाह हे वीर जन्मवतां प्राणिनां देहेनैव सह मृत्युर्जायते मृत्युश्चायं देहसमसमारम्भानुवर्तते एव किन्तु कालमात्रमपेक्ष्यत इति भावः अतएवाद्य वाब्दशतान्ते वा कल्पान्ते वा प्राणिनां मृत्युर्ध्रुव इत्यर्थः ३८ न चैवं सति जीवस्य शरीरमस्तु मृत्युग्रस्त इत्याह । देहकल्पान्तरं कल्पान्तरं तांस्तान् प्राणिनो मृत्युर्जिघांसति परिहार्य इति यावत् ३८ न चैवं सति देही तद्देहस्थो जीवः कर्मवशानुगः प्राचीनकर्मवशप्राप्तशरीरे चेतनरेव विधेयत्वेन यात् देहे पञ्चत्वं मरणमापन्ने प्राप्ते अनु पश्चात् सति देही तद्देहस्थो जीवः कर्मवशानुगः प्राचीनकर्मवशप्राप्तशरीरं तत्र स्थापनत्वं लभ्यत्वात् एवं विधं जन्म मृत्युसंपाद्यता मनुप्राप्नः कर्मानुगः शरीरान्तरं प्राप्यैव प्राक्तनं वपुः त्यजते कर्मानुगामी शरीरान्तरस्य पत्नी लभ्यत्वात् एवं विधं जन्म कर्मसंपाद्य स्वशरीरस्य नित्यत्वं नास्ति तादात्विकं मरणभयं भगिनीप्राणपरित्राणेन परिहर्तव्यम् ॥

वसुदेव उवाच ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः । स कथं भगिनीं हन्यात् स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥ मृत्युर्जन्मवतां वीर देहेन सह जायते । अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥ देहे पञ्चत्वमापन्ने देही कर्मानुगोऽवशः । देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति । यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४० ॥

इति भावः ३९ देहान्तरमनुप्राप्तत्वे तस्यैव दृष्टान्तमाह व्रजन्निति इयं प्रसिद्धा तृणजलौका तृणगत कीटविशेषः स यथा व्रजन् गन्तुमुद्युक्तः एकेन पदा तिष्ठन् एकेन पादेन वृक्षान्तरं प्राप्य पश्चात् पादं त्यजति व्रजन्निति इत्यं प्रसिद्धा तृणजलौका तृणगतकीटविशेषः स यथा व्रजन् गन्तुमुद्युक्तः एकेन पादेन तिष्ठन् स्थलं मवलम्बयन्नेवैकेन पदे पदं गच्छत्येवं देही जीवो पि पञ्चत्वमापन्ने देहे त्यजत्कर्मगतिं कर्मजन्यं शरीरं गतो धिष्ठितः प्राक्तनं वपुस्त्यजतीत्यर्थः अत एव जीवस्य कथं पञ्चता माप्तस्मात् देहमधिष्ठित एव पूर्वदेहान्तरादिष्टात्तत्वमितिन विरोधः यद्वा देहान्तरप्राप्तश्चैवापक्रमेन्द्रियप्राणादिप्रापणपूर्वकत्वाद्देहान्तरप्राप्तेः स्मृतिस्तज्ज्ञानकारणं देहान्तरादिष्टात्तत्त्वमिति न विरोधः यद्वा देहान्तरप्राप्तत्वेन्द्रियप्राणादिप्रापणपूर्वकत्वाद्देहान्तरप्राप्तेः इत्यर्थः पूर्वकमेव पूर्वदेहपरित्यागे दृष्टान्तस्तृणजलूकाख्याय यथैवमनुगन्तव्या जीवदशायामपि मृतप्राय इव तस्मिन् जीवतीति तस्य एव व्रजन्निति यथैकेन पादेन व्रजन् गच्छन् पुरुषः पुनरेकेनैव तिष्ठन्नेव गच्छति तद्वज्जीवन्नपि पुरुषः पुनर्मृतप्राय एव सन् जीवतीति तस्य एव व्रजन्निति तिष्ठन्नेव प्रविदेशं त्यजतीति व्रजंस्तिष्ठन्निति पत्त्वनिर्देशः यथाशब्दद्वयं च ४० तृणजलूका विद्यमानशरीरे एव गन्तव्यदेशमवष्टभ्यैव प्रविदेशं त्यजतीति

ति

रम
४

यतः शूरसेनो राजाभवत् ततः सा मथुरा सर्वेषां यादवभूपालानां राजधानी बभूव यत्र च यस्यां हरिर्भगवान् नित्यं संनिहितः आविर्भविष्यन् वा इति भावः २८ कदाचित् तस्यां पुर्यां शौरिः शूरसेनसुतो वसुदेवः कृतविवाहः देवक्याः सूर्यया नवोढया भार्यया सह प्रयाणे स्वगृहं प्रयातुं रथमारुरोह २९ तत उग्रसेनस्य सुतः कंसः भगिन्या देवक्याः प्रियं कर्तुमिच्छया स्वयं रौक्मैः रथशतैः परिवृतोऽपि नीरथवाहानामश्वानां प्रग्रहान् जग्राह ३० तदा देवकः उग्रसेनभ्राता दुहितृवत्सलः दुहितरि गर्भीभूते इति दुहितृवत्सलत्वात् दुहित्रे देवक्यै पारिबर्हं यौतकं प्रायच्छत् प्रयाणकाले दातुं दर्शयति हेममालिकानां गजानां मत्तानां चतुःशतं अश्वानां सार्धं पंचसहस्राणि सहितं मथुरां

राजधानी ततः साभूत् सर्वयादवभूभुजां मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः २८ तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्धं प्रयाणे रथमारुहत् २९ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया रश्मीन् हयानां जग्राह रौक्मै रथशतैर्वृतः ३० चतुःशतं पारिबर्हं गजानां हेममालिनाम् अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम् ३१ दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ३२ शंखतूर्यमृदंगाश्च नेदुर्दुन्दुभयः समम् प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलम् ३३ पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हन्ता यां वहसेऽबुध ३४ इत्युक्तः स खलः पापो भोजानां कुलपांसनः भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत् ३५ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् वसुदेवो महाभाग उवाच परिसान्त्वयन्

रथानां तु त्रिषट्शतं तथा याने गमनसाधनैः सह दासीनां सुकुमारीणां समलंकृते द्वे शते ३१ ३२ हेतावद्वरवध्वोः प्रयाणप्रक्रमे मंगलार्थं शंखादीनि ऊर्ध्वं यथा समं युगपन्नेदुः ३३ नद्यां सुमंगलमिति क्रियाविशेषणं वा ३३ ततो मार्गे पथि प्रग्रहिणं हयरश्मिधरं कंसं सम्बोध्य अशरीरिणी वाक् आह उवाच स्वतामेवदर्शयति अस्या इति यां भगिनीं प्रियचिकीर्षया वहसे सेयं प्रायशः अस्या अष्टमो गर्भः त्वां हन्ता हे अबुध इति ३४ इत्युक्तः भोजानां कुलपांसनः कुलाधम इति यावत् खलो मलः पापात्मा कंसः तथा भ्रातृत्वात् खड्गपाणिः सन् तथाभूतो भगिनीं हन्तुमारब्धः तदर्थं कचे केशेषु अग्रहीत् ३५ जुगुप्सितं निन्दितं कर्म यस्य तं नृशंसं क्रूरं निरपत्रपं निर्लज्जं कंसं परिसान्त्वयन् वसुदेवो महाभाग उवाच

दैवमदृष्टं कर्म तेन चोदितं तदनुगुणं प्रवृत्तं विकारा
किमपि प्रपद्यते इत्येतदेव विवृण्वन् तदेव जीवस्य उत्पत्तिर्नामेत्याह यत इति
त्मकं संकल्पविकल्परूपविकारं स मनो मायारचितेषु सत्वादिगुणत्रयात्मकप्रकृतिपरिणामरूपेषु पंचसु गुणेषु शब्दादि विषयेषु मध्ये
यतो यतो धावति यं यं विषयं स्मरतीति तं तमेव प्रपद्यमानमनुप्रविष्टः तेन सह जायते इयमेव जीवस्योत्पत्तिरिति भावः यं यं वापि स्मरन्भा
वं त्यजत्यन्ते कलेवरं तं तमेवैति कौंतेय सदा तद्भावभावित इति भगवदुक्तेरिति भावः ४२ तेन सहजन्मरूपोपाधिप्रयुक्तमेव जीवस्य देवमनु
ष्यत्वादिरूपनानात्वं वस्तुतस्तु सर्वत्र शरीरेषु ज्ञानैकाकारत्वेनावतिष्ठत इति सदृष्टांतमाह ज्योतिरिति यथा अदः अंतरिक्षस्थमेकरूपमेव सूर्यादिज्यो
तिरुदकेषु पार्थिवेषु पृथिवीपरिणामरूपेषु दर्पणादिषु च प्रतिबिंबितं सत् समीरस्य वायोर्वेगेनानुगतमनुवृत्तं सद्विभाव्यते समीरवेगशब्दो
ऽल्पत्वमहत्वाद्युपाधिगतधर्मोपलक्षकः विविधं भाव्यते वृद्धिह्रासादिभाक्त्वेन भाव्यते स्वतो ह्यविकारीति भावः एवमसौ पुमान्जीवः स्वतो देव

यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ४२ ज्योति
र्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते एवं स्वमायारचितेषु देह्यसौ गुणेषु रागानुगतो विमुह्यति ४३ तस्मान्न कस्य
चिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयं ४४ ॥

मनुष्यादिनानात्वरहितोऽपि स्वमायारचितेषु स्वदेहारंभकमहदादिपरिणामरूपभूतसूक्ष्मार्थेषु गुणेषु गुणपरिणामरूपेषु शरीरेषु रागानु
गतः रागो गुणकृतादिसत्ता तया वासनया लिंगशरीरद्वारा तेष्वनुगतः प्रविष्टः विमुह्यति देवोऽहं मनुष्योऽहमित्येवं नानाविधं मोहं प्राप्नोति यद्यपि दृ
ष्टांते ज्योतिरुदकाद्युपाधौ यथास्थितमेव स्वच्छं देहमपि तत्रानिच्छत्स्वरूपमिति वृष्टिभिः समीरपरिस्पंदनेन विभाव्यते दार्ष्टांतिके तु देहेष्व
वस्थित एव स तु मनसा मुह्यतीति तयोर्वैषम्यं तथापि वस्तुतो नानात्वाभावो पाधिकनानात्वमात्रेण दृष्टांतदार्ष्टांतिकभावो ग्राह्यः ४३
तस्मादस्य स्थितेरेवं विधत्वात्तथाविधवस्तुतत्वाभिज्ञः सः पुमान्नरः स्वस्य क्षेममन्विच्छन्निच्छन् कस्यचिदपि द्रोहं नाचरेन्न कुर्याद्द्वैविचेत
स्यन्कुतश्चिदपि भयमन्यथा तस्य भयमित्याह द्रोग्धुर्वै निश्चितं परतोऽन्यस्मात्भयमित्यर्थः परतः परमेश्वरात् यमात् तद्द्रोग्धुर्भयं वै भय
मस्त्येवेत्यर्थः ४४ एवं सामान्यतो हिताहितं विविच्याथ विशेषेण विवेचयति ॥

छिछोत्तरोत्तरं प्राप्यप्राक्तनं त्यजते उत्तरोत्तरवैशिष्ट्याकारेण उत्तरोत्तरप्राप्त्यसंभवादपि तु विशेष्याकारेणैव उत्तरोत्तरप्राप्तिः प्राक्तनवत्त्याग
श्चातः प्राक्तनकल्याणतरवत्त्यागप्रयुक्तभयशोकोपनिपातसंभावनया तत्परिहारो वक्तव्यः कल्पे इत्यत्र तदनुभवसिद्धं स्वप्नदृष्टं तेन दे
हान्तरप्राप्तिपूर्वकपूर्वदेहत्यागं तत्प्रयुक्तभयाद्यभावं च दार्ष्टान्तिके संगमयति स्वप्नेऽहमिति स्वप्ने यथा दृष्टश्रुताभ्यां दृष्टश्रुतमनोभिलषितलाभार्थं
मनसानुचिन्तयन् संकल्पविकल्पौ कुर्वन् मनोरथेन देहान्तरगमनराज्याभिषेकादिरूपेणाभिनिविष्टचेतनस्तद्दृष्टिर्यस्य तत्प्राप्ततो जीवः ईदृशोऽह
मानदेहसदृशं तत्किमपि विलक्षणं वा किमपि शरीरं स्वप्नमात्रावस्थापित्वेन स्वप्नदृष्टैकानुभाव्यत्वेन च स्वाप्नदेहस्य शयानतुल्यदेहतया चिं
तितुमशक्यत्वात् किमपीत्युक्तं तावत्पश्यति तत्तत्स्मृतिपश्यते अपस्मृतिः शयानदेहविषयस्मृतिरहितश्च भवत्यत एव तत्त्यागप्रयुक्तभयशो
उ ५७ कादिरहितश्च भवति ह्यतिस्वपरोभवसिद्धिं द्योतयति पत्स्यते प्रपद्यते इत्यनेन प्रथमज्ञानेन प्रविश्य ततः स्वरूपेणेति सूचितं एवं दार्ष्टान्ति

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः दृष्टश्रुताभ्यां
मनसानुचिन्तयन्प्रपत्स्यते तत्किमपि ह्यपस्मृतिः ॥ ७ ॥

केऽप्येवं गन्तव्यं इति भावः नहीदानीमस्मदादीनां प्राक्तनदेहत्यागप्रयुक्तभयशोकादिकमुपलभ्यते इति च भावः न च स्वप्नोऽपि शया
नदेहेनैव देशान्तरगमनादिकमनुभवतीति चेत् किमत्र गेहादौ शयानस्य देशान्तरगमनादेरसंभवात् तत्तदवस्थामात्रावस्थापि त
दृष्टमात्रानुभवाद्देहान्तरेणैव तदनुभवः एकार्थे दृष्टान्ते भेदसत्त्वं दार्ष्टान्तिकपरं तदयमर्थः स्वप्ने देशान्तरगमनादिमनोरथाभिनिवि
ष्टचित्तो जीवः यथेदृशं शयानदेहवदात्माभिमानविषयं स्वप्नदृश्यमानानुभाव्यफलं प्रणष्टपुण्यकर्मानुगुणपरमपुरुषसंकल्पस्तावत्काल
मात्रावस्थापि स्वप्नदृष्टैकावगम्यदेहरूपं पश्यति ज्ञानवाराधिष्ठितज्ञानवाराधिष्ठाय देशान्तरगमनराज्याभिषेकपरिच्छेदादीननुभवती
ति भावः अपगतशयानदेहस्मृतिर्यस्य तथाभूतश्च भवति तत्र भयादिसंभावनाप्रयुक्तभयादिरहितश्च भवति आराध्यस्य तथ्यस्यैव एवं दृष्ट
श्रुताभ्यां इति तदर्थ्यं खलु श्रीहृदि कं सुखं प्रतीतं प्राक्तनवत्त्वविषयस्मृतिरहितः स्वरूपेणाविशतीत्यर्थः सात्त्विकं ताभ्यां तदर्थं म
नसानुचिन्तयन् किमपि कर्मानुगुणं मोक्षरसदृष्टं किमपि शरीरं स्थानयत्नं अपस्मृतिश्च भवति प्रथमज्ञानवाराधिष्ठाय प्राक्तनवत्त्वविषय

भा० द०
पू० टी०
६

वि२

यद्यपि कस्यचिद्विषये एवं स्यात्तथापीयं मतिज्ञा न तु व्याप्तिनदिष्टस्तमात्मानं तिज्ञापरतंत्रं तस्य कर्माधीनत्वेन पुरुषाधीनत्वाभावादिति सदृष्टान्तमभ्यवस्यति अग्नेरिति योगवियोगशब्दाभ्यां प्राप्तिविलंबौ समलौ + मत्य + व दित्ते दारुणा हेतुना रतोयिष्याग्नेर्दारुविमोगयोगलो दृष्टत्वं सकाशाद्विलंबो यो प्राप्त्यो निमित्तकारणं महृष्टतो यजमानात् दृष्टादन्यन्नास्ति एवं जंतो जीवस्य शरीरसंयोगवियोगयोर्दृष्ट दृष्टतः कर्मणोऽन्योऽविभाव्यः मत्प्रतिज्ञामात्रं न हेतुः किंतु तेषां कर्मैवेति भावः ५१ एवं यावदात्मनिदर्शनमात्मात्मबुद्धिः निदर्शनं तस्याः प्रसरः यावद्बुद्धिप्रसरं विमृश्य निश्चित्य शौरिर्वसुदेवस्तं पापं पापबुद्धं कंसं बहुमानपुरःसरं बहुमानपूर्वकं पूजयामास सत्वेन विमृष्ट हृष्टमर्थितसम्मतीचकार ५२ तदेव दर्शयितुं पूजोपयुक्तं वाक्यमाह स्मा प्रहृष्टेति अंतर्भावितण्यर्थोऽत्र हसिः प्रहृष्टं विकासितं वला

अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ५१ एवं विमृश्य तं पापं यावदात्मनिदर्शनं पूजयामास वै शौरिर्बहुमानपुरःसरं ५२ प्रहृष्टवदनाम्भोजो नृशंसं निरपत्रपं मनसा दूयमानेन प्रहसन्निदमब्रवीत् ५३ वसुदेव उवाच न चास्यास्ते भयं सौम्य यद्वै साहाशरीरवाक् पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितं ५४ शुक उवाच सुस्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् वसुदेवोऽपि तं प्रीतः प्रशंस्य प्राविशद्गृहं ५५ अथ काल उपावृत्ते देवकी सर्वदेवता पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ५६ कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ५७ ॥

मन८

वदनांभोजं येन तथाभूतः वसुदेवः दूयमानेन तप्तेन सापदसन्निलज्जं कंसं प्रतीदं वक्ष्यमाणं वाक्यमब्रवीत् ५३ न देवा हनेति हे सौम्य तवास्याः स्त्रियः सकाशान्मनागपि भयं नास्ति किं तु स्याः पुत्रादितिभावः यथेभ्यो स्याः पुत्रेभ्यस्तेन तव भयमशरीरिणी वाणीसमुपस्थितं तान्पुत्रानहं तुभ्यं समर्पयिष्ये दास्यामीति तेन तु त्वं बुजदिमाचा न तु तत्रान्तेऽयमपराधरतिभावः ५४ वंतस्तस्य वसुदेवस्य वाक्यसारविद्वाक्याभिप्रायं जानन्कंसः सुहृदो भगिन्या वधान्निवृत्ते स्थवर्त्तत तत्र वसुदेवोऽपि प्रीतस्तं कंसं प्रशंस्य गृहं प्राविशत् ५५ अथ गर्भधारणयोग्यकाले समुपस्थिते सति सा सर्वदेवतांशत्वात्तत्तुल्या देवकी प्रतिवत्सरमष्टौ पुत्रानेकां कन्यां च सुषुवे ५६ तदा तां वत्सप्रतिज्ञां पालयन्वसुदेवः प्रथमं पुत्रं कीर्तिमन्नामानं पुत्रं कृच्छ्रेण दुःखेन कंसायार्पयामास तत्र हेतुं वदन्विशिनष्टि अनृतादसत्यभाषणाद्भीतो विवि

म८

राम
६

अनुजानन्ती त्वं वात्सल्ये दैन्यपत्रिका तुल्यत्वकल्याणी त्वादिंध्रिमेक्ष्यलेयमवध्याऽन्तरिमां त्वं हन्तुं नार्हसि हन्त त्वान्नर्हतां समुचयितुं सर्वोपयम
ति दीनवत्सलेति ४५ अथ सा समभिः श्लाघनीयेत्यादिना गुणकीर्तनपूर्वकं गुपलालनेन मे दृष्टं हृष्टमयसे च कव चाभिश्च चोद्यमानोऽपि
तथा योगान्तिरन्त्यं च प्रेयमाणोऽपि समं कंसः दारुणः क्रूरः हेतुगर्भमिदं दारुणत्वात्तत्र हेतुः परुषादानरासेसानुवृत्तः अम्सुरस्वभाव
भिजातः हेकोऽस्य नन्यवर्तत तथा योगादिति शेषः तस्य कंसस्य संबंधिनं निर्बंधमभ्येत्य तथा योगात्पंजत्वात्स्थानकडडुभिर्वसुदेवः प्रा
णसमपत्रिं तं कालं प्राप्तमृत्युः प्रति योद्धुं परिरिदं चैवि चिंत्य उपायमिति शेषः तत्कालपरित्यागे इदं वक्ष्यमाणं प्राप्यपद्यत उपायत्वेनाध्य
वस्यत् ४७ विचारपूर्वकं प्रतिपत्तिमेव दर्शयति चतुर्भिः मृत्युरिति उपस्थितो मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यथामति यथाशक्ति
चापोह्यपरिहार्यः एवमपि यद्यसौ मृत्युर्न निवर्तेत तर्हि न देहिनोऽपराधोऽस्ति अतः पत्रान्जनिष्यमाणान्मृत्यवे प्रणोपस्थितायकंसाय

एषा तवानुजा बाला कृपणा पुत्रिकोपमा हन्तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल। ४५ श्रीशुक उवाच एवं सामादिभिर्भेदै
श्चोद्यमानोऽपि दारुणः न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ४६ निर्बन्धं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः प्राप्तं कालं प्रति व्योढु
मिदं तत्रान्वपद्यत ४७ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ४८ प्रदाय मृत्यवे
पुत्रान्मोचये कृपणामिमां सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ४९ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया उपस्थितो निव
र्तेत निवृत्तः पुनरापतेत् ५०॥
प्रदाय प्रदास्यामीति ज्ञापयित्वा इमां स्त्रियं मोचये सा जु पापि प्रतिज्ञाया दोषं कृपणत्वमाशंक्याध्यवस्य
ति सुता इति यदि सुता मे जायेरन् संभावनायां लिङ् यदि स्यात् मे सुभगः कंसो वा महाजनो यत्नेः एवमेव न म्रियेत तेन मरिष्यति तर्हि पुत्रा
न दास्यामि मम पुत्रोत्पत्तेः कंसावस्थान स्यचपाक्षिकत्वात् तत्रापि प्रतिज्ञानदोषइतिभावः ४९ पाक्षिकत्वमेव संभावयति विप
र्ययः मम पुत्रात्कंसस्य वधस्तपर्वो तस्यावस्थितिर्मपुत्राभावो वा किं न स्यात्तदापि न दोषइतिभावः ननु परोरक्षणात्या ईश्वरस्वतंत्रा
न्नोऽत्यताऽतोऽन्वयएवनिश्चितः न विपर्यय इत्याशंक्याह धातुरीश्वरस्य गतिर्दुरत्यया वीचोनेईश्वरा यात्रा तथा न त्वोपि
दर्श्व्येदिदिपर्ययोपिस्यादितिभावः तत्रोदाहरणमालोच्याध्यवस्यति उपस्थितइति उपमाप्तोपि मृत्युः कश्चिन्निवर्तते यथा मार्कं

भा॰ द॰
पु॰ टी॰
७

देवकीं वसुदेवं च निगडैः श्रृंखलैर्गृहे कारागृहे निगृह्य बद्ध्वा माव्यजनशंकया विष्णुशंकया ऽदेवशंकयेति पाठे स्वपीडाशंकयेति पाठे स्वपीडा
शंकया तयोर्देवकीवसुदेवयोः पुत्रं जातं जातमहन्जघान ६६ निर्घृणः कथमहो लिखन्त्र लोकपरिपाटिं दर्शयति मातरमिति भुवि राजानः प्रा
यशोऽसुतृपाः परप्राणैरात्मप्राणतर्पकाः लुब्धा विषादहरणमात्रान्नविघ्नंतिहि ६७ आत्मानं प्राक्पूर्वजन्मनि विष्णुना हतं महासुरं का
लनेमिं इह तस्मिन्जन्मन्या त्मरूपेण जातं जानन्तारदवाक्याज्जानन्कंसः यदुभिः सह व्यरुध्यत विरोधं कृतवान् ६८ भोजानामंधकानां च या
दवानामधिपं पितरमुग्रसेनं निगृह्य स्वयं महाबलः कंसः शूरसेनान्जनपदान्बुभुजे अपभुक्तवान् ६९ इति दशमे प्रथमः १ यदुभिः

देवकीं वसुदेवं च निगृह्य निगडैर्गृहे जातं जातमहन्पुत्रं तयोरजनशंकया ६६ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा घ्नंति ह्यसुतृ
पो लुब्धा राजानः प्रायशो भुवि ६७ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतं महासुरं कालनेमिं यदुभिः स व्यरुध्यत ६८ उग्रसे
नं च पितरं यदुभोजांधकाधिपं स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ६९ इति श्रीभागवते महापुराणे दशमस्कंधे प्रथमो
ध्यायः १ श्रीशुक उवाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाण
भौमादिभिर्युतः यदूनां कदनं चक्रे बली मागधसंश्रयः २ ते पीडिता निविविशुः कुरुपंचालकेकयान् शाल्वान्विदर्भान्निषधान्वि
देहान्कोशलानपि ३ एके तमनुरुंधाना ज्ञातयः पर्युपासते मथुरायां स्थितास्तेऽपि व यज्ञ राधा विदुपते ४ हतेषु षट्सु बालेषु दे
वक्या औग्रसेनिना सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते ५ ॥

(युक्तप्रभातिशयशलकृदेवकी दर्शनोद्विग्नकंसस्यावस्थान प्रकारं गर्भस्थं सव्यरुध्यते येन देवप्रपंचयन् भगवतो देवकीजठरप्रकारं तत्प्रवेशप्र
दिभिरन्यैश्चासुरभूपतिभिर्भूपालैर्बाणादिभिः परिस्थितः कंसः भौमो नरकासुरः बलि मागधो संश्रयो यस्य तथाभूतः वृत्तोति मामयविष्णु
षणं वा मागधोजरासंधः यदूनां कदनमुपद्रवं चकार १ २ तथा तेयदवः केचित्पीडितास्तुर्वीदोनजनपदान्निविविशुरेकेतु ज्ञातयः
तं कंसमनुवर्तमानाः पर्यचरन् ४ तत उग्रसेनिना कंसेन षट्सु देवक्याः पुत्रेषु हतेषु सप्तमो वैष्णवं विष्णोः सं बंधियामतेजोंशइति
यावत् को सौयमनंतं प्रचक्षते सः ५ ॥

२९
७

७ अत्र वरणं त्रिहाय कर्षसमर्पयामासेत्यत्राह किमिति साधूनां दुःसहं दुःखेनापि सोढुमशक्यं किं त्वहितं न किमपि सर्वमपि सुसहमेवेत्यर्थः
७ अत्र विपत्तिं सुसहमेवेति भावः तथा विदुषां स्वात्मपरमात्मयाथात्म्यज्ञानवतां पुंसां किं त्वपेक्षितं किमपि शरीरतद्बंधादिकमपेक्षितं नास्ती
ति भावः उपेक्षितमिति पाठांतरं तदा विदुषामिति साधूनां विशेषणं कदर्याणां उपेक्षितम् अकार्यं च किमस्ति अन्वयः कदर्यशब्दः क्षुद्रपर्यायः
इदं कंसाभिप्रायकं धृतः स्ववशीकृतः आत्मा मनो यैस्तेषां दुस्त्यजं किं देहतद्बंधादिकं सर्वं सुत्यजमेवेति भावः ५८ दृष्ट्वेति व्यवस्थितिमि
ति भावेक्तः शौरेर्वसुदेवस्य तत्समत्वं सुखदुःखयोः साम्यं सत्ये च व्यवस्थितं निश्चलत्वं च दृष्ट्वा कंसस्तुष्टमना यस्मात् अतः हे राजन् प्रहसन्निदं व
क्ष्यमाणमब्रवीत् ५९ तदेवाह प्रतीति अयं तव कुमारः प्रतियातु गृहं प्रतिगच्छतु ममास्मात्कुमारात् भयं मृत्युभयं नास्ति युवयोरष्टमाद्गर्भात्

किं दुःसहं नु साधूनां विदुषां किमपेक्षितं किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ५८ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिं कंसस्तुष्टमना राजन् प्रहसन्निदमब्रवीत् ५९ कंस उवाच प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयं अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ६० शुक उवाच तथेति सुतमादाय ययावानकदुन्दुभिः नाभ्यनंदत तद्वाक्यमसतोऽविदितात्मनः ६१ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ६२ सर्वे वै देवताप्राया उभयोरपि भारत ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ६३ एतत्कंसाय भगवाञ्छशंसाभ्येत्य नारदः भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ६४ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ६५॥

देवैर्मम मृत्युर्विहित इति किल शरीरवाचेति शेषः

६० तथेति यं गोलः आनकदुन्दुभिर्वसुदेवः सुतमादाय ययौ किं त्वसतः पापिनोऽनवस्थितचित्तस्य अविदितात्मनः तस्य तद्वाक्यं नाभ्यनंदत
अनवस्थितचित्तस्य प्रसादोऽपि भयंकर इति न्यायादिति भावः ६१ नंदाद्या इत्यादि सार्द्धश्लोकत्रयमेकान्वयं देवकीरत उभयोर्नंदवसुदेव
योर्ज्ञातयः बांधवाः सुहृदोऽपि देवताप्रायाः तत्तुल्या इत्यर्थः ये तु कंसमनुव्रताः तेऽपि सर्वे असुराः सुरसंघप्राया जाताः अतएव लोकोपद्रवकारि
ताः ६२ ६३ तेन तत्कंसे भूभारायमाणानां पश्चाज्जातानां दैत्यानां भगवत्कर्तृकं वधोद्योगं ततो भगवान्नारदोऽभ्येत्यागत्य कंसाय शशंस कृपया कं
सस्य ६४ ततश्च ऋषेर्नारदस्य विनिर्गमानंतरं कंसो यदून् सुरान् संभवत्स्ववधं प्रति देवक्या गर्भे संभूतं संभविष्यमाणं विष्णुं च ज्ञात्वा ह

भा॰द॰ टी॰ ८

एवमित्थं भगवता संदिष्टाज्ञप्ता योगमाया तस्य भगवतो वचस्तथा वचस्तथेत्योमिति तथैवास्त्विति अंगीकारः पूर्वकं प्रतिगृह्याभिनंद्य तं प्रद
क्षिणीकृत्य महीं प्रविष्टा सती तथैव यथोक्तमकरोत् १५ ततो योगनिद्रया भगवद्योगनिद्रया प्रेरितया यत्तत्कर्षणाद्देवक्या गर्भे रोहिणीं प्रतिप्रणी
ते प्रापिते सति हा इति पौरजना अहो देवक्या गर्भो विस्रंसितः स्रंसनमधःपतनं रेतयान्तु विचुक्रुशुः रुरुदुः १६ ततो भक्तानामभयंकरः भ
क्ताभयंकरो विश्वात्मा भगवानंशभागेन ज्ञानस्येति शेषः सन्मात्रमंगानामस्यादेवता इति देवतात्मा भगवदंशस्वरूपश्रवणाद
नकदुंदुभेर्दशांशत्वेन जातत्वाद्गेति भावः मनसा आविवेश संकल्परूपज्ञानेनाविवेशेत्यर्थः यो मनसि तिष्ठन्निति पूर्वमेवाविष्टत्वाच
गमादंशभागेन संकल्परूपज्ञानेनाविवेशेत्यन्वयः १७ स वसुदेवः पौरुषं भगवत्संबंधि तेजो बिभ्राणः यथा रविस्तथा राजमानः

8

शुक उवाच संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १५ गर्भे प्रणीते देवक्या रोहिणीं
योगनिद्रया अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १६ भगवानपि विश्वात्मा भक्तानामभयंकरः आविवेशांशभागेन मन आ
नकदुंदुभेः १७ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह १८ ततो जगन्मंगलमच्युतां
शं समाहितं शूरसुतेन देवी दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं मनस्तः १९ सा देवकी सर्वजगन्निवासनिवासभूता
नितरां न रेजे भोजेंद्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती २०॥

दुरासदो धर्षयितुमभिसंहितुमशक्यः तेजसा युक्तः अभ
भूतानां कंसादीनां दुःखेनापि सोढुमशक्यो बभूव १८ ततः शूरसुतेन निहितं जगन्मंगलं यस्मात्तमच्युतांशः संकल्परूपविज्ञानं यस्य
तं सर्वात्मकं सर्वशरीरकमात्मनोप्यात्मनो व्याप्तमात्मभूतं भगवंतं देवकी दधार जठरे इति शेषः यथा काष्ठा पूर्वा दिक् चंद्रमसं मनस्तः पूर्वोदितमानं
दकरं चंद्रं बिभर्ति तद्वद्वसुदेवापत्यत्वसिद्धये ततो वसुदेवात् पश्चाद्देवकीजठरं प्रविवेशेत्यर्थः पूर्वदिशश्चंद्रस्येव वसुदेवदेवकीजठ
रयोर्मध्ये प्रवेशः सर्वथा इति भावः १९ साथ तस्य रक्षणरूपाद्देवकी सर्वजगत् दाधार भगवतो निवासभूता सती नितरां न रेजे रा
ज यथा भोजेंद्रस्य कंसस्य गृहे अवरुद्धत्वात् शिखा अग्नेः तोपमेयं यथा ज्ञानखलेन स्वदर्शनसतीति निर्दिष्टा सरस्वती उपनिषद्राजते त
द्वत्परमात्मगर्भत्वात् अग्निशिखेवादृष्टांतः तस्याः शिखाया मध्ये परमात्मा व्यवस्थित इति श्रुतेः ज्ञानखल इति पाठे वेदविरुद्धज्ञानवती

॥ ९ ॥ रामं ८

देवक्याः सप्तमो गर्भो बभूव कथंभूतः तयोर्हर्षशोकौ विवर्द्धयतीति तथा कंसभयाच्छोक इति भावः ५ ततो भगवान् विश्वात्मा हेतुगर्भमिदं
कंसाज्जातं भयं निजआत्मा नाथो येषां तेषां यदूनां भयं ज्ञात्वा योगमायां स्वमायाधिष्ठात्रीं देवतामादिशदाज्ञापयामास ६ तदेवाह गच्छेत्यादिना
संदिष्टैव इत्यतः प्राकृतेन देहे विभद्रे त्वं गोपैर्गोभिरलंकृतं नंदव्रजं गच्छ तत्र गत्वा किं विधेयं इत्यत्राह नंदस्य गोकुले व्रजे वसुदेवस्य भार्यास्ते ७ त
था अन्याश्च तस्य भार्याः कंसात्संविग्नाभीताः तत्र तत्र विवरे पर्वतबिलादिषु प्रच्छन्ना वसंति ८ अधुना मामकं मदीयं शेषाख्यं धामांशं देवक्या जठरे गर्भ
रूपेणावस्थितं तस्माद्देवकीजठरात्सन्निकृष्य समाकृष्य रोहिण्या जठरे सम्यग्निवेशय यानेन रोहिण्याः तनयः प्रोक्तः इत्यादि श्लोकेन प्र

गर्भो बभूव देवक्या हर्षशोकविवर्द्धनः ५ भगवानपि विश्वात्मा विदित्वा कंसजं भयं यदूनां निजनाथानां योगमायां समादिशत् ६
भगवानुवाच गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले ७ अन्याश्च कंससंविग्ना विवरेषु वसं
ति हि ८ देवक्या जठरे गर्भं शेषाख्यं धाम मामकं तत्सन्निकृष्य रोहिण्या उदरे सन्निवेशय ९ अथाहमंशभागेन देवक्याः पुत्रतां शु
भे प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि १० अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामवरप्रदां ११
नामधेयानि कुर्वंति स्थानानि च नरा भुवि दुर्गेति भद्रकालीति विजया वैष्णवीति १२ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च मायाना
रायणीशानी शारदेत्यंबिकेति १३ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि रामेति लोकरमणाद्बलभद्रं बलोच्छ्रयात् १४ ॥

श्लस्योत्तरगतं भवति ९ अथाहमंशभागेन मदंशांशभूतेन संकर्षणेन सह देवक्याः पुत्रत्वं प्राप्स्यामि त्वं तु नंदस्य पत्न्यां यशोदा
यां संभविष्यसि १० सर्वेषां कामानां इष्टार्थानां वराणां च प्रदात्रीं सर्वकामप्रदानामधीश्वरीं त्वां नानाविधैरुपहारैर्नैवेद्यैरन्यैश्च बलि
भिः प्रजाभिर्नरा अर्चयिष्यंति एवं मनुष्याः कामान्वंतीति भावः ११ तथा भुवि तव स्थानानि मंदिराणि नामधेयानि च कुर्वंति करिष्यंति तत्र नामा
नि दर्शयति दुर्गेति सार्द्धेन १२ १३ तथा त्वया देवकीजठरात्संकृष्टो नत एव प्रवृत्तिनिमित्तात्संकर्षणशब्दवाच्यो लोकरमणाल्लोकरंज
नान्निमित्ताद्राम इति रामशब्दवाच्यो बलाधिक्यान्निमित्ताद्बलभद्रशब्दवाच्यं भविष्यति प्राहुर्वदंति यथार्थं तेभ्यो निमित्तेभ्यः तच्छब्दैर्वदह्रि
ष्यंतीत्यर्थः १४ ॥

भा॰द॰
टी॰
९

स्तुतिमेवाह यावदध्यायसमाप्ति तावत् तिथिरूपाः संभावितैर्भेदैर्विशिष्टं स्तुवंति सत्यव्रतमिति सत्यसंकल्पं चानेन प्रतिज्ञातार्थो यथा प्राप्नोति इति लक्षितं सत्यपरं चिरं स्थितं सत्यं सर्वत्र सत्यं दन्तदेवेभ्यः प्राणेभ्यश्च तत्सत् अथ यद्देवाश्च प्राणाश्च तत्सत्यं तदेकया वाचाव्यवह्रियते सत्यमिति श्रुतेः ततः परं विलक्षणं इदं साध्यं अत्र सत्यव्रतत्वादीनि हेतवः कथं सत्यव्रतत्वं तत्राह त्रिसत्यं त्रयः अर्थात् उत्पत्तिस्थितिप्रलयकालाः सत्या यस्य तं प्रकृतिरूपकालत्रयशरीरकमित्यर्थः प्रकृत्याद्यात्मकस्य सर्वस्य जगतः स्वतियोग्यत्वेन सत्यसंकल्पत्वमभिप्रायः वाद्याहत संकल्प इत्यर्थः यतः सत्यव्रतमत एव सत्यस्य योनिं सत्यस्य चिदचिद्वस्तुप्रपंचस्य योनिं कारणं सत्ये निर्विकारे परे व्योम्नि निहितं कर्तारि अधितिष्ठितमित्यर्थः त्रिसत्यं सत्यस्य योनिमिति लीलाविभूतिमत्त्वमुक्तं निहितं च सत्ये इति नित्यविभूतिमत्त्वं एतदुभयं सत्यपरत्वादिहेतुः तथा सत्यस्य सत्यमतोऽपि निर्विकारत्वात् न सेतस्यादिति नेत्यनेत्यर्थः स्यात् नामधेयं सत्यस्य सत्यं इति

७

देवा ऊचुः सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः २७ ॥

प्राणा वै सत्यं तेषामेष सत्यमिति श्रुतेः तदर्थं स्तुवन्ति तावत्त्वमिति सत्यं भाष्याद्वर्गत्वात् विस्तरभयान्नालिख्यते ऋतसत्यनेत्रं सत्यमादित्यः असावादित्यः सत्यमिति श्रुतेः ऋतसादश्च यो दृक्शब्दार्थं देवः चंद्रादित्ययोर्नेत्रं प्रकाशितारमित्यर्थः यदादित्ये इति च सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतेः यस्यात्मा नेत्रं यस्य तं चक्षुषी चंद्रसूर्यौ इति श्रुतेः यद्वा एवं प्रत्यक्षस्य कर्मणो पूर्वजयो वा तौ ते

सं॰५

प्रत्यक्षमपि तद्वेय तयाएव मनसा तादात्म्यानुगमे सेदिति पण्यक्रमेण तेषां प्रयोगात् तेषामनुष्ठेयं कर्म सत्यमप्यमानमर्थः तयोर्नेतारं सत्यात्मकं स्वरूपेणापि निर्विकारं अनेन प्रधानव्यावृत्तिः एवंभूतं त्वां वयं शरणं प्रपन्नाः प्रपद्यामः इति इति नीतेय स्य प्रतिपादितं तस्मादेतस्माद्वस्तुपरं तु रूपं ब्रह्म लोके तत्त्वतः प्रतीयमानं तेषां परं नास्तीत्यर्थः न तत्त्वमात्रमिति यथा तथा हि सत्यं स्वरूपमिति वैयर्थ्यापत्तेः तदुपपादयति अथेति प्राणाश्चारेति हि देवेभ्यश्च तत्तेभ्योऽपि कदाचित्ज्ञानादि संकोचाभावाय परमात्मा सत्यं निर्विकारं इत्यर्थः नियोनित्यानां चेतनश्चेतनानामिति श्रुतेः तत्संवादः २७ अथ त्रिसत्यत्वमेवोपपादयंति त्रिसत्त्वं जगत् इत्येवं तद्रूप

सम
९

तां प्रभयाजितान्तरां अन्तराणि दिगन्तराणि यस्याः शुचिविद्युद्वत्स्मितं यस्यास्तां भवनं गृहं विरोचयन्तीं देवकीमालोक्य कंसः प्राह उक्तिमेव दर्शयति
एष इत्यादिना इति घोरेत्यतः प्राक्तनेन मम प्राणहरः प्राणान्हरिष्यत्येव स हरिः ध्रुवं गुहां देवकीजठरं श्रितः यदियं देवकी नेदृशी एवं विधप्र
भान्विता नासीदतो न संशयो माश्रितः २१ अर्थतंत्रो देवकार्यप्रयत्नोयं हरिर्मम विक्रमं यथा न निहंतीति तथात्र विषये मया पापेनाप्याशु किं
करणीयं किं घटनीयं यथैनां हन्मीति तर्हि अस्याः स्त्रियः तत्रापि स्वसुः तत्रापि गुरुमत्या गर्भिण्या वधोयं यश आदीनि हंतीति द्व
पयति अनुकूलमित्यायुर्विशेषणं अनुकायमिति पाठांतरं तदा शरीरं यश आदीनि हंतीत्यर्थः २२ स गुरुमतीं हंता यं जीवन्नपि

तां वीक्ष्य कंसः प्रभयाजितान्तरां विरोचयन्तीं भवनं शुचिस्मितां आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमी
दृशी २१ किमद्य तस्मिन्करणीयमाशु मे यदर्थतंत्रो न विहंति विक्रमं स्त्रियः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हन्त्य
नुकूलमायुः २२ स एव जीवन्खलु संपरेतो वर्त्तेत योऽत्यंतनृशंसितेन देहे मृते तं मनुजाः शपंति गंता तमोंधं तनुमानिनो
ध्रुवं २३ इति घोरतमाद्भावात्सन्निवृत्तः स्वयं प्रभुः आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधकृत् २४ आसीनः संविशंस्ति
ष्ठन्भुंजानः पर्यटन्पिबन् चिंतयानो हृषीकेशमपश्यत्तन्मयं जगत् २५ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः देवैः
सानुचरैः साकं गीर्भिर्वृषणमैडयन् २६ ॥

संपरेतः मृतः प्रायः खलु यः अत्यंतनृशंसितेन अतिक्रूरचेष्टितेन वर्त्तेत तनुमानिनः देहात्माभिमानिनो देहे मृते नष्टेपि
मनुजास्तं शपंति स चांधतमो नरकं ध्रुवं गंता गमिष्यति २३ इतीत्थं घोरतमाद्भावात् समतो वधोद्योगात्स्वयं प्र
भुस्तां हंतुं समर्थोपि निवृत्तः ततः हरेर्जन्म प्रतीक्षन् वैरानुबंधं विशेषाविद्वेषं कुर्वन्नास्ते २४ आसनादिक्रियास्वपि हरिमेव चिंतया
नः जगत्तन्मयं हृषीकेशमयं अपश्यत् २५ तत्र देवकीसन्निधौ नारदादिभिः सानुचरैर्देवैश्च सह ब्रह्मा चतुर्मुखो भवो रुद्रश्च समा
गत्य गीर्भिरुपनिषत्सारकारिणीभिर्वाग्भिः वृषणं कामानां वर्षितारं भगवंतमैडयन् तुष्टुवुः एतेनालिंगवचनं गणादीडे लिङ् नारदा
द्यभिप्रायकं बहुवचनं वृषणमिति पाठे कामवर्षितारं भगवंतमैडयन्नित्यर्थः २६ ॥

स्व

एवंविधत्रिजगदुत्पत्त्यादिकारणत्वेन स्तुत्याप्यकारणं तु श्रेयइति कारणत्वसमन्वितयतत्वेन स्तुत्युपास्यत्वमपि त्वन्निष्ठमेवेत्यभिप्रा
येण स्तुर्वन्ति त्वयीति हे शंभो जाड्यमलसत्त्वथान्निश्रुदसत्त्वमयैध्यान्मस्थानं वियदइति यावत् यस्य तस्मिन्नश्रुदसत्त्वप्यकेदिप
स्थितः अवतारनिपश्रवेण दिपरः उद्दृषावासमाधिनाश्वाविशेषं चेतः येस्तथाभूताः चेतसेकइतिसंधिरार्षः समाधिनात्वय्या
वेशितचेतसो पलेदिता इतिवा महत्त्वसदाचार्येण कर्णधारस्थानीये न कृतेन सोनिधापितेन प्रदर्शितेनतनपादयोतेनपाद्व
मलनपस्तवेनभवाः संसारः स एवाब्धि संगोत्वत्सपदंकुर्वन्ति सदिवसुखेनातितरंतीत्यर्थः २२ नकेवलं तेस्वयमेवगोवत्सपदंकुर्वं
तीत्यभिप्रायेण स्तुवंति स्वयमिति हे शुमन्नित्यादिश्रुतेमव शुभदीतिपाठे शुभद्रवाणेवमितिसमस्तपदं स्वर्गादिस्थानोपेतंभवार्णवं

त्वय्यंबुजाक्षामलसत्त्वधाम्निसमाधिनावेशितचेतसैके त्वत्पादपोतेन महत्कृतेन कुर्वंतिगोवत्सपदंभवाब्धिं
२१ स्वयंसमुत्तीर्य सुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदाः भवत्पदांभोरुहनावमत्रतेनिधायपाताःस्वद
नुग्रहोभवान् २२ येन्येरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः आरुह्यकृच्छ्रेणपरंपदंततःपत
न्त्यधोनादृतयुष्मदंघ्रयः २३॥

श्रीपुंडरीकमपिक्रदभ्रमनल्पंसौहृदं त्वद्भक्तिरूपंयेषांतथाभूतास्तेस्वयं समुत्तीर्यत्व
त्पादपोतेनैवस्वतरणः भवतः पदांभोरुहमेवनौस्तामत्रैवनिधाय इयमेवसंसारोत्तारसाधनमस्तीतिप्रदर्श्ययातास्त्वत्पदंप्रा
प्नुवंति विभुर्विश्वपाणिलिनोपक्रांतमत्यैश्वर्येत्वप्रतिपादनमुपसंहरतिएवंसदनुग्रहः साधनामनुग्रहशीलः २२ तलिदि
तरमध्वत्पदांभोरुहनावमवर्तमानानांसमाधिनावेशितचेतसेकइत्युक्तविपरीतानांगतिंवदंतः स्तुवंति यइति हेअरविंदाक्षये
ऽन्येपूर्वश्लोकद्वयोक्तेभ्योऽन्येयेजनाः विमुक्तावयमितिवृथामानिनः त्वय्यस्तभावाद्भक्तिशून्याः हेतोरविशुद्धबुद्धयः येषां
तथाभूताःपरंपदंलोकेश्वमादिरूपमुत्कृष्टस्थानंकृच्छ्रेणप्रयासेनारुह्यापिसुकृतविशेषाद्वैराग्यादिरूपंश्रेष्ठंजन्मप्राप्यापि
इत्यर्थः अनादृतयुष्मदंघ्रयः अनादृतयुष्मदंघ्रयः अनुपासितभवच्चरणाः संतस्ततोधःपतंतिपुनःनीचजन्मानमाप्नु
वंतीत्यर्थः २३ अनादृतयुष्मदंघ्रीणांनकाहिचिदयःपतनमस्तीतिवदंतः संतःस्तुवंति तथेति॥

२०

एकं परं ब्रह्म अयनमाश्रयो यस्य सः द्वे सुखदुःखे फले यस्य त्रयः सत्वादयो गुणा मूलं यस्य चत्वारो रसा धर्मार्थकाममोक्षा यस्य पंचशिफाः जटा उत्तरमूलानि
भूतसूक्ष्मकानि यस्य षडात्मानो ऊर्मयो मनःषष्ठानींद्रियाणि वा यस्य सप्त त्वगसृङ्मांसरुधिरमेदोमज्जास्थिशुक्ररूपा धातव एव त्वचो यस्य अ
ष्टौ हस्तौ पादौ शिरः कंठो वक्षो जठरस्पृष्ठे ते विटपाः शाखा यस्य नव द्वाराणि छिद्रकोटराणि यस्य दश छदः दश प्राणादय एव [illegible] प्राणापान
व्यानोदानसमाननागकूर्मकृकरदेवदत्तधनंजयरूपाः प्राणा एव छदाः पत्राणि यस्य द्वौ जीवपरमात्मरूपौ खगौ पक्षिणौ यस्मिन् स आ
दिवृक्षः प्रवाहानादिः शरीराख्यो वृक्षः एकस्त्वमेवायनमाश्रयो धारको यस्य तथाभूत इति भावः २८ अथ सत्यस्यैव नित्यत्वमुपपादयंति अस
तः परिदृश्यमानस्य चिदात्मकस्य सतो जगतः प्रसूतिः जन्मकारणं त्वमेक एव त्वमेक एवास्य संनिधानं संतिष्ठते यत उपसंह्रियतेऽस्मिन्निति
संह्रियतेऽस्मिन्निति संनिधानं प्रलयाधिकरणमित्यर्थः त्वमेक एवास्यानुग्रहः अनुगृह्णातीति प्रदाने नेस्यनुग्रहः स्थितिकारणं इत्यर्थः

एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः २८ त्व
मेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये २९ बिभर्षि रूपा
ण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य सत्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानां ३०॥

ननु नाद्यसत्यपरः कश्चिन्नानाजीववादमिन्नं पश्यंतीत्यत्राहुः त्वन्माययाऽपहृतं चेतो येषां मतत्वेन विपश्चित अज्ञाः न शब्दोऽयं निषेधार्थकः
तत्र तत्र लोपो नञ इति नलोपाभावः ये अज्ञास्त्वां नानाजीवरूपेणावस्थितं पश्यंतीत्यभिप्रायः पश्यंतीत्युक्तेन द्विजीवविलक्षणं परस्वरूपं
दृश्यते कुतो नानादर्शनं मोहितं नाभिजानाति मामेभ्यः परमव्ययं इति त्वदुक्तेरिति भावः यद्वा एवं सत्वं जगत्कारणत्वमुपपाद्य कार्यको
रणयोरनन्यत्वात्त्वस्य च नानात्वे जडवादं निराकुर्वंति त्वन्माययेति त्वां नानात्वं विशिष्टं जगत्पश्यंतीत्यन्तः पृथक् सिद्धं जगत्पश्यंतीत्य
र्थः २९ त्वमनुग्रह इति स्थितिकारणत्वमुक्तं तच्चावतारैरिति स्वावतारमन्वादिशुभवेषेणेत्यभिप्रायेणाहुः बिभर्षीति अवबोध आत्मा ज्ञान
स्वरूपश्च संबोधनं यद्वाऽवबोधः स्वरूपमात्मा यस्य तथाभूत आत्मावस्थानित सम्पस्तं पदद्वयं यद्वाऽवबोध इति समस्तं पदमवबोधे ज्ञाने स्वरूपे जीवेश्च
रांतरात्मतया वा स्थितस्त्वमस्य चराचरस्य लोकस्य क्षेमार्थं रूपाण्यवताररूपाणि बिभर्षि कथंभूतानि सत्वोपपन्नानि शुद्धसत्व

न चैवं मायिकत्वादिसजातीयत्वप्रसङ्गो नैवेत्याह न नामरूपे इति मनोवचोभ्यां वचसा देववाक्येन तदनुसारेण मनसा चानुमेयस्वभाव
स्य सर्वसाक्षिणः तव गुणकर्मजन्मभिः सह नामरूपे न निरूपितव्ये गुणकर्मजन्मनामरूपाणि इतरसजातीयतया निरूपणीयानि
यतः श्रुत्यप्रमयास्य स्थूलमनण्वप्रक्षुत्वमगोत्रमवर्णमचक्षुःश्रोत्रं तिष्ठन्ति ति कर्तव्यजायमानत्वादिभिरितरसजातीयानि गुणा
दीनि प्रतिषिध्यन्ते यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च यस्य चेतनकर्मवत्त्वे वेदितव्याः बहु
धा विजायते इत्यादिना विलक्षणानामेव गुणादीनां श्रवणात् जन्मकर्म च मे दिव्यमिति यो वेत्ति तत्त्वतः इति वदन्ते चेति भावः यद्यपि
देवादिविलक्षणगुणकर्मादिमत्त्वं तथापि ते वेदक्रियायां प्रतियन्ति ब्रह्मादिना मन्त्ररूपाणि तदतिरत्नमतत्त्वतो यान्ति तथापि
अथापि त्वां वेदावगतयज्ञादिक्रियायां प्रतियन्ति आराधयन्तीत्यर्थः ३७ इन्द्रादिनामरूपेभ्यः स्वाराधारणे नामरूपाणि प्राप्य स्वादिकं वदन्तः

न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः मनोवचोभ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियन्त्यथापि हि ३७ शृण्वन्गृणन्संस्मरयंश्च चिन्तयन्नामानि रूपाणि च मङ्गलानि ते क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते ३८ दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः दिष्ट्याङ्किता त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां

स्तुवन्ति स्म एवं कीर्तियज्ञं मानसे तव मङ्गलानि नामानि रूपाणि च शृण्वन् स्वयं गृणन्नितरांश्च संस्मरयन्ति यो भवति गणेन श्रोतस्त्वलितौ तदुभया
सक्तियो नामानि स्मारयन् रूपाणि चिन्तयंश्च संस्मरयन्नितितरजर्थस्त्व विवक्षितः क्रियासु वैदिका स्त्रीसनाटनभोजनादिक्रिया
स्वपि त्वच्चरणारविन्दयोरासक्तचित्तमतिर्यस्तथाभूतः स भगवान् भवाय संसाराय समर्थो न भवति तेनेति पाठे भवाय न कल्पते
किंतु मोक्षायैवेत्यर्थः ३८ आत्मनो भूभारहरणप्रयोजनमाह दृष्ट्वा विकुर्वन्तः स्तुवन्ति दिष्ट्येति दिष्ट्या आनन्दद्योतकमव्ययं हे हरे
अस्या अविता हिरण्यं तवेश्वरस्य जन्मना भवतः त्वत्पदात्पादविन्यासेन च यश्च इतिपदच्छायायाऽस्याः भुवो भारोपनीतोऽपनी
तप्रायः इदं दिष्ट्यास्माकं मानवस्त्वत्यर्थः एवं भूलरत्नापि सुशोभनैर्ध्वजवज्राङ्कुशादिचिह्नैश्चारुभिः पदकैः पादविन्या
सैरलंकृता तव त्वया तदनुकम्पितां च गां भूमिं द्यां च स्वर्गं द्रक्ष्यामः नित्यविभूतिमिव द्रक्ष्याम इत्यर्थः ३९ ॥

पादे

हे माधव ते तावकास्त्वद्भक्तास्तु तथा त्वद्भक्तिरहितवत् कदाचिदपि मार्गात् उत्तमज्ञानात् न भ्रश्यंति नाधः पतंति तत्र हेतुं वदंतः तान्वि-
शिनष्टि त्वय्येव बद्धं सौहृदं भक्त्यात्मकं यैरिति न भ्रश्यंति किंतु त्वयाऽभिगुप्ता अभितो रक्षिताः तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति
त्वदुक्तेरिति भावः हे विभो विनायकानीकपमूर्धसु विघ्नसेनापतिशिरस्सु भयरहिता विचरंति जीवदशायां विघ्नानुपहत्य त्वद्भक्तियोगा-
त्तत्त्वं प्राप्नुवंतीति भावः २४ यद्यपि संकल्पमात्रपरिकल्पिते निखिलप्रपंचे त्वत्संकल्पमात्रेणैव जगत्त्राणं तु भवतो नावतारमपेक्ष्य
मेतत्तथाप्युपासकानामुपासनालंबनार्थमवतरसीति स्तुवंति सत्त्वमिति स्थितौ स्थितेः पालनं तस्मिन्निमित्तभूतायां स्थितये भवान्
विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं सत्त्वमयं वपुः शरीरं श्रयते बिभर्ति संश्रयणे प्रयोजनं दर्शयंस्तद्वपुर्विशिनष्टि शरीरि-
णां श्रेय उपायनं श्रेयसे उपेयतेऽनेनेति [illegible] उपासकस्योपायनं येन वपुषाऽऽलंबनभूतेनोपलब्धेन सत्त्वजनो

तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्धसु प्रभो २४
सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेय उपायनं वपुः वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते २५
सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा गुणः २६ ॥

वेदक्रियादिभिस्तवार्हणमाराधनं समीहते कुरुते वेदक्रिया वेदमूलवर्णाश्रमचोदितो यज्ञादिः क्रियायोगः उत्तरभागे चोदित उपासनं तपस्त-
दुक्तं कृच्छ्रादिकमनशनादि तपः समाधिर्वैदिकक्रियातपोभ्यामनुगृहीते निर्विकल्पचित्तैकाग्र्यं यदि भवान्सत्त्वं न संश्रयेत्तदा तस्याराधनं न प्राप्नोति
नादाराधकानां त्वामारोपितुमसमर्थः स्वतो भवान्नाराध्यस्तेन त्वयैतदर्थं सत्त्वं संश्रयत इति भावः २५ एतदेव स्पष्टं कुर्वंतः स्तुवंति हे धातः
विश्वकारण भवत इदं विज्ञानं ज्ञानाश्रयकमज्ञानभिदापमार्जनं तस्मात्तेन सत्त्वेन देवादिभेदापि मानापमार्जनं [illegible] सत्त्वमत्वयं धाम ते
ऽस्यं निजमसाधारणं वपुर्न चेद्भवानाश्रयते चेत्तर्हि यस्य वपुषः येन कारणेन कालकर्मादिरूपेण गुणेन सत्त्वाद्यस्तमः प्रकाशते
अनिमिषतस्तस्य तस्य ते स्वैर्यत्तैर्गुणप्रकाशैर्गुणकार्यैर्भवाननुमीयते कार्यलिंगकारणेन भवतः देवमनुष्यादिविलक्षणमिति नज्ञायते किंतु तत्तत्स
जातीयतयानुमीयते भवानाश्रयते नार्हं तत्स्वरसाधारणादिदेवमनुष्यादिसंभाविता निर्गुणचेष्टिता नेगुणचेष्टिताति
य

ग्रामाणामाकरो येन तानां आमाणां तद्दितानां चाकरा अथ भूता मही मंगलभूयिष्ठा बभूव २ नद्यस्तु प्रसन्नानि निर्मलानि सलिलानि यासु तथाभू-
ताः ह्रदास्तु जलरुहाणां श्रीर्येषु वनानां राजयः पंक्तयस्तु द्विजानां पक्षिणां अलीनां भृंगाणां च कुलानां संघानां सन्नादो येषु तानि स्त-
वकानि यासु तथाभूताः ३ वायुस्तु शुचिर्निर्मलो रिदित्तः पुण्यगन्धवहः सुगन्धिः सुखस्पर्शश्च ववौ प्रससार द्विजातीनां त्रैवर्णिकानां
मग्नयः शुर्विशान्तास्तदा समिन्धत ३ धिदी प्रोजज्वलुः समेधिताः इति पाठेऽपि स एवार्थः मदा शान्ताः अकलुषाः ४ असुरद्रुहां दे-
वानां च मनांसि प्रसन्नान्यासन् तस्मिन् भगवति जायमाने सति दिवि दुन्दुभयः ध्वनुः ५ ६ कुसुमानि समन्ततः प्रमुचुरित्यन्वयः ७
जनार्दने जायमाने निशीथे घोरात्रे तमसान्धकारेणोद्भूते व्याप्ते सति मेघा मन्दं मन्दं सागरमनुलक्ष्य जगर्जुर्यथा सागरो ध्वनति तद्वत्

दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् मही मंगलभूयिष्ठपुरग्रामव्रजाकरा २ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रि-
यः द्विजालिकुलसन्नादस्तवका वनराजयः ३ ववौ वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः अग्नयश्च द्विजातीनां शान्तास्त-
त्र समिन्धत ४ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां जायमानेऽजने तस्मिन्नेदुर्दुन्दुभयो दिवि ५ जगुः किन्नरगन्धर्वास्तु-
ष्टुवुः सिद्धचारणाः विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ६ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः मंदं मंदं जलधरा
जगर्जुरनुसागरं ७ निशीथे तम उद्भूते जायमाने जनार्दने देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः आविरासीद्यथा
प्राच्यां दिशीन्दुरिव पुष्कलः ८ तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं

सादरमिति पाठेऽप्यादरयुक्तं यथा तथा अनुजगर्जुरित्यर्थः ७ तथा देवरूपता या देवतांशत्वात्तत्तुल्यायां देवक्यां सर्वेषां गुहाशयोऽन्तर्यामी स-
क्लिबले ऐश्वर्यतेजःप्रभृतीनामाश्रयो विष्णुराविरासीत् आविर्बभूव यथा प्राच्यां दिशि पुष्कलः षोडशकलापरिपूर्ण इन्दुस्तद्वत् ८ तमवतीर्णं
भगवन्तं वसुदेवो ददर्शेत्यन्वयः कथंभूतमद्भुतं महदाश्चर्यरूपत्वादाश्चर्यं विषय भुजं ३ येन तानि येनैव यस्य च त्वा रोदायस्पर्शात्
दीर्घं यस्यायुधानि यस्य द्विरावृत्तेन च अम्बुजसदृशे श्रीवत्सलक्ष्म चिह्नं यस्य आर्षत्वाद्विलोपः यद्वा श्रीवत्समेव लक्ष्म तदस्यास्तीति आर्षो हि-
त्वान्मत्वर्थीये चित्तस्तु हितः इति टिलोपः श्रियं लक्ष्मीं वत्सलापत्यदोषनिरसनात् कुलसमाभूषितो निर्व्याजा कौस्तुभं गले शोभी

एतद्दिष्ट्या संकल्पमात्रनिर्वर्तितजगदुद्धरणस्य तव स्वभवावतारप्रयोजनं भक्तजनानुग्रहः एवं युक्तमथावतारादिमित्तमाविष्कुर्वंतः स्तुवंति नेति
हे ईश अभवस्य कर्माधीनो नास्ति रहितस्य तव भवस्य जन्मनः कारणं निमित्तं विना विनोदं लीलार्थं संकल्पं विना अत्र तर्कयामहे बत ताश्रयं गति
तेः साधारणत्वात् किं स्मयः यथा सर्वस्याभिज्ञस्यापारो विनोदमात्रानुकूलसंकल्पमूलकृत स्वदेहजन्मापीत्यभिप्राये तोऽभवदिति यतो विनोदादे
व निमित्तादिवि यथा संसारेण ज्ञानविरोधिना प्रकृत्या जगत उत्पत्त्यादयो विकारास्तस्याश्रये आधारभूते त्वरात्मनि च त्वयि कृताः तमेव विनो
दमभवस्य तव भवकारणं मन्यामहे इत्यर्थः आत्मयात्मनि कृता इत्यनेन उत्पत्त्यादयो विकाराः प्रकृतिगता न स्वरूपगता इति सूचितं ४० यथा मत्स्या
द्यवतारपरिग्रहेण अस्मान् रक्षितवानेवमधुनापि भारापहारद्वारा स्मान्यासीत्याहुः मत्स्यादिरूपैः परिरक्षितो वतारो मे ने तथा भक्ता त्वमस्मा

न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ४० मत्स्याश्वक
च्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ४१ दिष्ट्याम्ब ते
कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ४२ श्रीशुक उवाच इत्यभि
ष्टूय पुरुषं यद्रूपमनिदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं ४३ इति श्रीभागवते महापुराणे दशमस्कंधे द्वितीयोध्यायः २
श्रीशुक उ० अथ सर्वगुणोपेतः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १ ॥

नन्विलोकीं च यथा पासि रक्षितवांस्तथा
भुवापि भवो भारं हरापनयेदेव यदूत्तम ते तुभ्यं वंदनं नमस्कारः अर्थः ४१ देवकीमाहुः दिष्ट्येति हे अम्ब न भेतव्यं कंसभयात् समर्थोयं श्रेयस्तत्कुले
मद्धेतुः परमपुरुषो भगवान् साक्षात्तव कुक्षिं प्राप्तः अतः मुमूर्षोर्भोजपतेः कंसात् भयं तव माभूत् तवात्मजो यदूनां गोप्ता भविता भविष्यति ४२
इति स्तुत्वा यथा यस्य भगवतो रूपमनिदं तथा स्वमनसानुसारेण तं परमपुरुषमभिष्टूय ब्रह्मरुद्रौ पुरस्कृत्य देवाः स्वर्गं ययुः ४३ इति दशमे द्विती
याः २ अथ भगवदवतारं वर्णयति अथेति यर्हि अजनस्य कर्मायत्तो यस्य तीति रहितस्य भगवतो जन्माथ तदा कालः सर्वगुणैरुपेतः अत
एव परमशोभनः तदेव प्रपंचयति अजस्य भगवज्जन्मनक्षत्रं रोहिणी तस्मिन् शांतर्क्षग्रहतारकं शांतान्यृक्ष
लान्यन्येषु च नक्षत्रेषु सर्वादयस्तारकाश्च अश्विन्यादि अतिरिक्तानि यस्मिन् तथाभूते १ ॥

यः प्रसक्ते: परः सर्वेबुध्दिरद्र स एव तत्सृष्टेः प्राक्करणत्वेनावस्थित इति शेषः स भवान्माया स्वशरीरभूतया महदादिद्रष्ट्येवं तद्रूपेण परिणामपरि
णामया त्रिगुणात्मिकया इदं यदि दृश्यमानं स्थूलविश्वं तदात्मकत्वाद्विगुणत्रयपरिणामरूपत्वेन तद्रूपजीवप्रवर्तत्वेन च तदात्मकं जगत् सृष्ट्वा
ऽनु पश्चाज्जगत्प्रविष्टः स्थितःसंकल्पत्रयज्ञानेन प्रविष्टत्वाद्दृश्याप्यप्रविष्ट इव भाव्यसे प्रवेष्ट इव भाव्यसे विभाव्यसे विज्ञायसे इत्यर्थः
तथा च श्रूयते तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति चिद्रूपेण विकि + जगज्जन विकारै रस्पृष्ट इव + यमात्मप्रवि
स्य सत्यमेवाभवत् निखिलदोषमपरिच्छिन्नज्ञानानन्दस्वरूपमेवाभवदिति तदर्थः इवशब्दो मतिरिक्तार्थकः अप्रविष्ट इव तत्र तद्दो
षास्पृष्ट एव विभाव्यसे इत्यर्थः १४ ननु का योऽप्रविष्टस्य मम कार्यान्तरागेव सत्करणतया वस्थानं कर्थं तत्कार्यगतविकारास्पृष्टत्वे
।तस्मिन्स्तनं दुर्जरवीर्यमुल्बणं घोराङ्कमादाय शिशोर्ददावथ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत्
११ सा मुंच मुंचालमिति प्रभाषिणी निपीड्यमानाखिलजीवमर्मणि विवृत्य नेत्रे चरणौ भुजौ मुहुर्निस्विन्नगात्रा क्षिपती रुराव
ह १२ तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा रसा दिशश्च जनाः पेतुः क्षितौ वज्रनिपातशंकया + शब्दप्रति
नेदिरे १३ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवाप
तन्नृप १४ पतमानोऽपि तद्देहस्त्रिगव्यूत्यन्तरद्रुमान् चूर्णयामास राजेंद्र महदासीत्तदद्भुतं १५ ईषामात्रोग्रदंष्ट्रास्यं गिरिकंद
रनासिकं गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजं १६॥

स्वनेन सपर्वता मही भूः सग्रहा द्यौश्च चचाल रसातलं दिशश्च
प्रतिनेदिरे प्रतिशब्दवत्यः जनाः वज्रनिपातशंकया अशनिनिपातशंकया क्षितौ निपेतुः १३ व्यथितौ पीडितौ स्तनौ यस्याः सा नि
शाचरी व्यादाय मुखं वितत्य केशादीन्प्रसार्य गोष्ठे व्रजे निजरूपमास्थिता मृता पूतनास्यस्वाभाविकरूपगतत्वादिति भावः हे नृप
वज्रेण हतो हे वृत्रासुर इवापतत्‌ १४ तस्या देहः पतमानोऽपि षट्‌क्रोशवर्तिनो द्रुमांश्चूर्णीचकार हे राजेंद्र तच्छरीरं महदद्भुतमा
सीत्‌ १५ अद्भुतत्वमेव दर्शयितुं तद्रूपं विशिंषन्‌ तद्वीक्ष्य गोपगोप्यश्च बिभ्युरित्यन्वयः ईषेति त्रिभिः ईषा लाङ्गलदण्डः तत्प्र
माणो ग्रा दंष्ट्रा यस्मिंस्तदास्यं यस्मिन्‌ गिरिकंदरे इव नासिके यस्मिन्‌ गंडशैलवदुन्नतौ स्तनौ यस्मिन्‌ रौद्रं भीमं प्रकीर्णा
अरुणा मूर्धजाः केशा यस्मिन्‌ १६॥

वल्गुसुंदरं स्मितं येषां तैः सल्लहितैरित्यर्थः तथाभूतैः स्वांगयोर्नेत्रांतयोर्विसर्गः प्रसरो येषां तैश्च वीक्षितैः कटाक्षैः व्रजौकःस्थानां येषां
तेषां गोपानां मनो हरंती अंभोजेन करेण पद्महस्तरूपा लीलया उपलक्षितां रूपिणीं प्रशस्तरूपवतीं पतिं श्रीकृष्णं द्रष्टुमागतां लक्ष्मीमिव तां वनि-
तां गोप्यो ऽमंसत मन्यंत ६ स यो विद्रूपो बालग्रहः तत्र तत्र व्रजस्थाने शिशून्विचिन्वती अन्वेषयंती यदृच्छया नंदगृहे बालं ददर्श स्वसोदं
यावलोकनप्रवरणाभिर्गोपीभिरनिवारिता ददर्श सर्वैः कथंभूतं असतामंतकं मृत्युं तर्हि निर्भया कथं ददर्श यतो विशिष्टश्छिप्रतिच्छन्नं ति-
रोधापितं निजं स्वासाधारणं ऊर्वधिकं तेजो येन भस्मिभस्मना आहितं तिरोहितमग्निमिव स्थितं ७ तथा सचराचरात्मा सर्वांतरात्मा स वेधुः
द्भगवान् अत एव तां बालमारिकाग्रहं बुध्वा निमीलितेक्षणो येन तथाभूतः स्वयं मंत्र्वरत्वे सत्यपि प्रकराणि स्वसंकल्पमात्रेणैव हंतुम

कौ१ तर्कौ२ कुमारि२

वृतस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां अमंसतांभोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां प-
ति ६ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहे ऽसदंतकं बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पे ऽग्निमिवाहितं भसि ७ विबुध्य
तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः महेश्वरत्वे सति बालभावं विभावयामास चराचरेश्वरः ८ अज्ञात-
मत्ताय निशाचरी हरिं निसर्गविज्ञातजगद्विचेष्टितं अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः ९ तां तीक्ष्ण-
चित्तामतिवामचेष्टितां वीक्ष्यांतरा कोशपरिच्छदासिवत् वरस्त्रियं तत्प्रभया च धर्षिते निरीक्ष्यमाणे जननी ह्यतिष्ठतां १०

मर्त्योऽपि बालभावं बालत्वं विभावयन् प्रकटयन् क्रीडितवान् इत्यर्थः ८ अथ सा निशाचरी तं बालं दृष्ट्वा उत्संगे हरिं निस-
र्गतः स्वभावतो विज्ञातजगद्विचेष्टितं प्रभावं निसर्गत इति पदेन तस्य सर्वज्ञत्वं स्वाभाविकमेव न तु कर्मायत्तमित्यभिप्रेतं अनंत-
कमात्मनो मृत्युभूतमज्ञात्वा ऽनंतं त्रिविधपरिच्छेदरहितमप्यात्मनः चेष्टानुकरणेन परिच्छिन्नतां प्राप्तमिव स्थितमिति भावः स्व
कौ नं एकमारोपयदंकं निदधे इत्यर्थः यथा ऽबुद्धिर्मूढो नर एव रज्जुरिति धीर्यस्य सः सुप्तमुरगमंके निदधाति तद्वत् ९ रोहिणीयशोदे
पितां नन्ववारयेतामित्याह तामिति कोशपरिच्छदासिवत् चर्मनिर्मितं कोशपरिच्छदमावरणं विधाय प्रस्थेन असिवत् खड्गमिवांत-
स्तीक्ष्णचित्तां क्रूरतरामपि बहिर्वामचेष्टितां शोभनचेष्टामत्र कुलचेष्टितामिति यावत् वरस्त्रियं श्रेष्ठस्त्रीयं प्रवत्थितां परस्त्रियमिति

भा.टू.
९.टी.
२८

अथ कवच मंत्र जप रूर्वकं [illegible] रक्षा विधानं दर्शयति अथैत्यादिना द्विता घ लोमयत्र। प्रक्षालितेन जलेन दिश्यवध्यो योगन्दिश्यां भगवद साधारणो अजः न मत्थमलोपाति। रक्षितः भवांस्तु वांधिवेत्ता अथ दद्दु जानुजानुनी अपरिमाणो जीवस्यांप्तरा स्तत् यामे वेशयोगपः जानु उरुस्तः यज्ञाराध्यो यज्ञभुक् फलदश्च कटितट मध्युत अश्रितोत्र च्यावयती स्फुलः दयास्यो हयग्रीव जठर मध्यात् ह्र्त्केश आश्रवस्तित्वउदरं च तेषां समाहार रक्षतीशः पातु वस्तिमत्र कोपः वसुदरं हृत्केश मिति त्रिमोत्र विवक्षितः अथावाद जौ प्रिमोच्य रे कमित्युपक्रमो पसंहाराभ्यां पादादि शिरः पर्यंता वयवेक्रमस्यात्र विवक्षितत्वम तीते जठरं नाभेरुपरिभागेत तउपरिभागउद रं इति विवेकः केशशेदात्र लोमपरः कंठमिनः सर्वव्यापकः इत्युक्तावितियातु यज्ञाग त्यर्थ बुध्यापोः सर्वज्ञः अतएव विष्ठ

अथवाद जौ प्रिमाणिमात वजान्वयो रूयज्ञोच्युतः कटिस्तटं जठरं दयास्यः हृत्केशः वस्तुदरमीशस्तत्कंठं विष्णुर्भुजं मुखं रुक्मं ईश्वरः खं चक्रायुतः स्फग तोपरेतु पश्चात्त्वत्या पर्श्वयोर्द्वैत्र रसीमधुहाजितश्च कोणेषु शंख उरुगायउपर्युपेंद्रः स्तार्क्ष्यः क्षितौ हलधरः पुरुषः समंतः २४ इंद्रियाणि हृषीकेशः प्राणान्नारायणोवतु श्वेतद्वीपपतिश्चितं मनोयोगेश्वरोवतु २५ पृश्निगर्भस्तु मे बुद्धिमात्मानं भगवान्परः क्रीडंतं पातु गोविंदः शयानं पातु माधवः २६ व्रजंतमव्याद्वैकुंठ आसीनं त्वाश्रियः पतिः भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः २७॥

तिष्ठन्नैवपोन सततं विष्णुर्व्यापकः विष्णुव्या प्राविति पातु उवं उरवस्थिलो को संख्या हक्रमाः पादू विष्णे पाय स्पसः कं मकानमीश्वरः सर्वनियंता ईशः सर्वाधिपतिरिति तेन पीभरुकं विष्णुरादेनवा तिमात्र ईश्वरशब्देन तु प्रशासन र्वव्यापाधारकत्व २३ एवं पादादि शिरः पर्यंत रक्षां विधाय ये दिस्तुरक्षां विदधं चक्रीत्यतः पर स्वक्रधरः पश्चात्पृष्ठतः सहगतो भादासद्विलो हरिराश्रितानिंदरः पार्श्वयोस्तु यज्ञरसी धनुः तद्वै विभ्रताविति शेषः मधुहा जित अथ ऊर्ध्वो मधुहा सिद्धाणेः जितः श्वेतर्थः कोणे घाग्नेयादिषु रक्षं शंखोस्या नैऋत्यादिता न्मत्व धीयो च उपरि धीयादि उपेंद्रः क्षितावधस्ताद्धलधरः संकर्षणः समंतात्सर्वतोऽवकाशो दिशः को ष्विरिति चेत्तत्र सवं पुरुषः सर्वप्राणि हृदयेतत्रावस्थितः २४ एवं बहिरंगरक्षां संप्रार्थ्य पांतरंगरक्षां प्रार्थयामासुरिंद्रियाणि हृषीकाणां इंद्रियाणामीशोन्तः प्रविश्य यत्ता योगेश्वरो योगाति

२६

नै२

अथ कृष्णाविरगभीरे ऽस्ति तोयस्मिन् स्थूलिनवदसो हेजघने ताभ्यां भीषणं कृता ःसेतुव इव भुजा वृहन्त्यं ग्रीवयस्मिन् शून्यं तोयं यस्मिंस्तथा भूतो हृदइव उदरं यस्मिन् १७ तत्कलेवरं वीक्ष्य गोपा गोप्यश्च संतत्रसुः कथंभूताः पूर्वं पतनात्पूर्वं तस्याः निःस्वनितः शब्दैर्भिन्नानि हृत्कर्णमस्तकानि येषां तथाभूताः १८ तथा तस्या उपरि क्रीडंतं न कुतोपि भयं यस्य तं बालं च वीक्ष्येति पूर्वेणान्वयः जगृहुः स्थूलरूपेण वा तूर्णं यथा तथा समभ्येत्य जाताः तस्या मरणात् बालस्य जीवनाच्च संभ्रमो यासां ता गोप्यः जगृहुरादधुः १९ ततस्ता गोप्यः यशोदारोहिणीभ्यां सह बालस्य सर्वतः शोक्तस्य गोपुच्छभ्रमणादिभिरुपायैः रक्षां चक्रुः २० तदेव प्रपंचयति गोमूत्रेणेत्यादिश्लोकद्वयेन

अथ कृष्णगभीरात्स्थूलिनारोदभीषणं वपुः सेतुभुजोर्वङ्घ्रिशून्यतोयहृदोदरं १७ संत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः १८ बालं च तस्या उरसि क्रीडंतमकुतोभयं गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः १९ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः २० गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २१ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत २२

दर्शयति गोमूत्रेणेति तावद्गोपुच्छभ्रमणेन संस्नापयित्वा ततो गोरजसा च स्नापयित्वा गोमूत्रशकृता गोमयेन द्वादशस्वंगेषु द्वादशभिः केशवादिभिर्नामभिः रक्षां चक्रुः २१ एवमनाचांताव तस्य मेणरक्षां विधाय पलब्धाप्याचांताः विशेषतोरक्षां चक्रुरित्याह गोप्य इति संस्पृष्टसलिला आचांताः गोप्यः आत्मनि स्वशरीरे करयोरितरेष्वंगेषु पृथगेकैकशो न्यस्याकारादिद्वादशांतानि मातृकाबीजानि विन्यस्याथ बालस्याप्यन्ते करयोरंगेषु च बीजन्यासमकुर्वन् चिकीर्षितात्रादिभगवत्सामग्रस्थितविभुकेन च पृथग्न्यासे तत्तस्य वीर्यस्फूर्तेर्भवति तावत्स्वांगेषु बीजन्यासं विधायाथ तत्क्रवचम आपदर्थेषु तदर्थं न्यायास्सुमतिरिति तत्वा यदा बालस्यांगेषु बीजन्यासं चक्रुरित्यर्थः २२

ता२

भा०द० पू०टी० २७

यतो स्तनपानात् ... पिप्रायेत्याह आदिशब्दः लोकबालघ्न्यादिभिः प्रत्येकं संबंधः जिघांसयापि हरये स्तनं द
त्त्वापि सद्गतिमसतां भाव्यां गतिं मुक्तिमवाप ३६ यतो ऽप्रियं गरलं यत् स्तनं दत्तवती ... पि केनचिद्गत्वा संबंधमात्रेण सद्गतिमवाप किंतु पु
नः भगवत्कृत्यास्त्र सद्गतिं प्राप्तवंतीमात्रः किंपुनरिति श्रद्धया भगवत्प्रियाचरणेन युक्तया परया भक्त्या श्रद्धया च परमात्मने श्रीकृष्णा
य किंचित्प्रियतमं यच्छन् समर्पयन्सद्गतिं प्राप्नोति किं पुनर्वक्तव्यमित्यर्थः प्रियं यच्छन्सद्गतिं प्राप्नोतीत्यत्र दृष्टांतः रक्ता अनुरक्ता स्तस्य
श्रीकृष्णस्य मातरो यशोदादयो यथा प्रियतमं स्तन्यं यच्छंत्यः सद्गतिं प्राप्तवत्यस्तद्वत् ३७ न तु मातृत्वेनैव सद्गतिप्राप्तिरसिद्धेत्याशंक्य पद्भ्यां
तलस्पर्शं कारयित्वा तासु पिबन्नत्यंतमासंगवत्करोति पद्भ्यामिति सार्धैस्त्रिभिः लोकवंदितैः ब्रह्मादिभिः वंद्याभ्यां भक्ता ...

२७

पूतना लोकबालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिं ३६ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने
यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ३७ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः अंगं यस्याः भगवानपिबत्स्तनं ३८
यातुधान्यपि सा स्वर्गमवाप जननीगतिं कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ३९ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं
भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ४० तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं न पुनः कल्पते राजन्संसारोऽज्ञान सं

समाक्रम्य २

क्रम्य समाक्रम्य भगवान्यस्याः पूतनायाः अंगं समाक्रम्य स्तनं विषहरणेन मय्यपिबत् ३८ सा यातुधानी पूतनापि स्वर्गं निरतिश
यानंदरूपं जननीगतिं हरिमवाप किमु तत्र कृष्णेन भुक्तः स्तनयोः क्षीरं यासां ता मातरः जननीगतिमवापुरिति वक्तव्यमित्यर्थः ३९
[illegible] पौरबीभक्षामूदीदिमात्रेतराभिप्रायकं बहुवचनं अनुमातरः पशवत्यर्थकः यथा गावस्तद्वदित्य
र्थः ३९ तासां मुक्तिरसिद्धेति दृष्टांतस्तदुपपत्तिरित्याह तत्स्तनं विशिनष्टि यासामंगवत्पुत्रस्नेहेन स्नुतानि पयांस्यलं ... भग
वानपिबत् कथंभूतः देवकीपुत्रः कैवल्याद्यखिलार्थदः कैवल्यप्रकृति स्वरूपादि यमुक्तिरिति यावत् तत्पुरुषार्थचतुष्टयप्र
दः कैवल्यादिपुरुषार्थप्रदानाय देवकीपुत्रत्वेनावतीर्ण इत्यर्थः ४० कृष्णे अविरतमविच्छेदं यथा तथा सुतेक्षणं सुतबुद्धिं कुर्वती
नां तासां मातॄणां हे राजन्नज्ञानसंभवः संसारः पुनर्नकल्पते न वर्तत इत्यर्थः ४१ ॥

एम २७

कूष्माण्डादयोऽप्यवान्तरविशेषाः २८ देहादीनि द्रुह्यन्तीति तथा २९ वृद्धग्रहा बालग्रहाश्च ते सर्वे विष्णोर्नामानि गृह्णन्तीति तथा तेभ्यो भीरवः भीता नश्यन्तु ३० इत्थं प्रणयेन स्नेहेन बद्धाभिर्यन्त्रिताभिर्गोपीभिः कृतं रक्षणं यस्य तम् माता आत्मजं माता यशोदा स्तनं दुग्धं पाययित्वा सम्यवेशयत् शाययामास ३१ तदा नन्दादयो गोपा मथुरायाः सकाशाद्व्रजमागताः सन्तः पूतनायाः देहमवलोक्यातीव विस्मिता बभूवुः ३२ वसुदेवोक्तं यथार्थमेवाभूदिति सोदाहरणं विस्मयं तेनून इति आनकदुन्दुभिर्वसुदेवः समागतो यमुत्पातमाह स एवोत्पातोऽधुनास्माभिर्दृष्टः आनकदुन्दुभिः ऋषिर्योगी वा पूर्वं जन्मनि सन्नधुनैवं रूपेणानन्दे संजातः वतेति विस्मये ऋषि त्वमत्र तीतिसिद्धार्थं दर्शितं

डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः २८ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः २९ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ३० इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं पाययित्वा स्तनं माता संन्यवेशयदात्मजं ३१ तावन्नन्दादयो गोपा मथुराया व्रजं गताः विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ३२ नूनं बतर्षिः संजातो योगेशो वा समास सः स एव दृष्टो ह्युत्पातो यदाहानकदुन्दुभिः ३३ कलेवरं परशुभिश्छित्त्वा तत्ते व्रजौकसः दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितं ३४ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ३५ ॥

व

योगित्वं तपःप्रभावकृतं तत्र हेतुर्दर्शितं इति विवेकः समास पाठे स वसुदेवः ऋषिर्योगी योगेशो वा सन्नद्युनैव संजातः कुतः यत उत्पातं समागतः आनकदुन्दुभिः यमुत्पातमाह सोऽधुनास्माभिर्दृष्टः एवेत्यर्थः ३३ तत्तस्मात् व्रजौकसः सहसा पूतनाकलेवरमवयवशः परशुभिश्छित्त्वा दूरे क्षिप्त्वा काष्ठैर्वेष्टितं कृत्वादहन् ३४ विस्मयान्तरमाह दह्यमानस्य देहस्य धूमोऽगरुसौरभः अगरुसंनिभः कृष्णागरुतुल्यगन्धः समुत्थितः सोऽगरुसंनिभो बभूवेति शेषः अन्वयः अगरुसौरभ इति पाठे अगरोः सौरभ इव सौरभः यस्य सः स तथा तत्र हेतुं वदन्विशिनष्टि कृष्णेति श्रीकृष्णस्य भगवतो निर्भुक्तं स्तन्यानुभवस्तेन हेतुना सद्यस्तत्क्षणमेव हतं पापं यस्य तस्य कृष्णनिर्भुक्तेति पाठान्तरं तदा कृष्णेन हेतुना निर्भुक्तः सपद्याहतपाप्म तस्येत्यर्थः ३५ ॥ ॥

भा.द.
स्क.टी.
२८

स्फु

तथापि यत्कृष्णचेष्टितं श्रुत्वेत्यत्र उत्सवेषु मान्त्रयोरतिमनोज्ञानि श्रेयस्यथ्यं वा यस्मिन्सति सुखेन तत्रोपि न यत्नायभवति
तथाविधं ... कथाशल्यं दृषियं हृत्तापे स्य परगच्छति श्रवैरोगत्वं श्रवमर्तः करणं च श्रूयात हृरोभगावतिरो रागस्त्वरुतेषु
भगवत्कृत्येषु स्वमेव भवति तद्देवचरित्रं श्रवण। उत्त्वः ततो लप्य थात्र थाकावदल देवस्तर इति पाठे हारं मनोहारि चेष्टितं तस्यार्थः
बहुमिष्टं मन्यसे चेद्वदस्व तत्र नत्वा मद्दीपितो हृदि मम श्रुतिर्भावः किंतदित्यत्राह मानुषं लोकं मानुषाकारं प्राप्य तज्जातिमनुपतन्
ति मनुष्यंयतेम कुर्वतः कृष्णस्य यद्दन्यादृषितत्तनानिर्देशनरूपबालचेष्टितादन्यत्स्यष्टाद्भुतं लोकाचरितं बालचेष्टितं वदे स्वरूप
भः २ एवमापृष्टो व्यासपि बालचेष्टितानि विवक्षुस्तावच्छकटासुरवधात्मकं चेष्टितं वर्णयति कदाचिदित्यादिना इत्यत्र

यच्छृत्वते पैतरतिर्वितृष्णास्वं च गुरुस्यापि विरागपुंसः भक्तिर्हरौ तत्पुरुषेच सख्यं तदेव कथयो वदमन्यसे चेत ३ श्री
शुकउवाच कदाचिदौत्थानिक कौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां वादित्रगीत द्विजमन्त्रवाचकैश्चकार सूनोरभिषेचनं सती ४ नंदस्यपत्नी
कृतमज्जनादिकं विप्रैःकृतस्वस्त्ययनंसुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः औत्था
निकौत्सुक्यमना मनस्विनो समागतान्पूजयतीव्रजौकसः नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत्

कृतेन उत्थानं गृहाद्बहिः शिशोर्निष्क्रमणं तत्संबंधी औत्थानिकं तस्मिन्कौतुके उत्सवे च याप्लवः स्नानं यस्मिन्तस्मिन्दिने जन्म
र्क्षे नक्षत्रे रोहिणीनक्षत्रेण योगो यस्मिन्नि ... समवेतानां संगतानां योषितां मध्ये वादित्रादिभिः शोभितमभिषेचनं सू
नोः यशोदा चकार ४ अन्नाद्यैरन्नवासोभिः स्रग्भिरन्यैश्चाभीष्टैर्धेनुभिश्च पूजितैर्विप्रैः कृतं स्वस्त्ययनं मज्जनादिकं ...
स्य ... यस्यादिशा ... संजातनिद्रं ... अशीशयत् शायययामास ५ औत्थानिके उत्सवे औत्सुक्यमनाः तथाभूता मनस्विनी उदारयमवणा ... साय शोदा स
मागतान्व्रजौकसः पूजयंती सुतस्य रुदितं नाशृणोत् ... स्तनार्थी रुदन्चरणावुदक्षिपदूर्ध्वे मचालयत् २८॥

भक्ति २

१२

राम
२८

२५

व्रजौकसः कटधूमस्य सौरभ्यमवघ्राय किमिदमत्याश्चर्ये गिरं कुतो वास्य सौरभ्यमागतमित्येवं वदंतः व्रजं जग्मुः ४२ ते मथुराया
आगता नंदादयः गोपैर्व्रजस्थैर्वर्णितं पूतनाया आगमनादिप्रकारं तन्निधनं मरणं शिशोः श्रीकृष्णस्य स्वस्ति सुखेनावस्थानं च श्रुत्वा
सुतरां विस्मिता बभूवुः ४३ प्रोष्य देशांतरं गत्वा पुनरागतो नंदः उदारधीः विपुलानंदयुक्तबुद्धिः स्वपुत्रमादाय मूर्ध्न्युपाघ्राय हे कुरूद्व
ह परमां मुदं प्राप ४४ पूतनाहननादिश्रवणफलमाह य इति यः पुमानेतत्पूतनामोक्षं दर्शनादिनिःसाध्यान्यापि प्राय कैवल्यं
यच्च श्रीकृष्णस्यार्भकं कर्म चेष्टितं तच्छ्रद्धयुक्तः समाहितचित्तो निशम्याकर्ण्य गोविंदे गतिं लभते तत्पर्यवसायिनीं गतिं ज्ञानं भक्तिं मुक्तिं यावत् ४५

कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४२ ते तत्र वर्णितं गोपैः पूतनागमनादिकं श्रुत्वा
तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ४३ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्व
ह ४४ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं निशम्य श्रद्धया मर्त्यो गोविंदे लभते रतिं ४५ इति श्रीभागवते महापुराणे द
शमस्कंधे षष्ठोऽध्यायः ६ श्रीशुक उवाच एवंविधानि चान्यानि सस्त्रीकाणां च योषितां श्रीनंदमन्नेपां कुर्वन्नवदृष्ट्येनंद
वेषमाने १ राजोवाच येनयेनावतारेण भगवान्हरिरीश्वरः करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो २

इति दशमे भागवतचंद्रिकायां षष्ठः ६ एवं लालवत्सपूतनानिर्हरणमुक्तिप्रदानादिरूपं भगवद्भावचेष्टितमभिधायाथ
चेष्टितांतराणि विवक्षुस्तावच्छ्रोतुः परीक्षिद्भावमुत्पादयति एवमिति एवंविधानि दुष्टनिर्हरणमुक्तिप्रदानादिरूपाणि १२
अन्यान्यपि बहूनि बालचेष्टितानि स्त्रीयोषितां सस्त्रीकाणां गोपानामनिशमानंदं चकुर्वन् स विष्णुर्जनार्दनो भगवान्नंदस्य
गृहे वृषभ एव बभूव १ तदिलानिव दयानि भगवान् करोदीति पिपृच्छिषुस्तावदितरावतारचेष्टितेभ्यः श्रीकृष्णावता
रचेष्टितान्यतिविलक्षणानि वदन् पृच्छति राजा येनेति भगवान्हरिरीश्वरो येनयेन मत्स्याद्यवतारेण यानि यानि कर्माणि करोति
चकार तानि नोऽस्माकं श्रोत्रसुखावहानि तथाहे प्रभो मनोज्ञानि मनःप्रीतिकराणि च भवंत्येव तथापि २॥

ग.नृ.
सू.टी.
२९

मत्तोयेऽस्य मात्रे दे वर्जितास्ते योगशीलानामनन्ततेवाद्यशीलानां मासिष्य कदाचिदपि विफलान भवंती हि कृपा वालकमादायेसन्नयः तव
सदा गृह्णतोऽस्य सत्वपि दोषावि: कराग्रमन्नं मिष्टान्नभाषणे [illegible] दम्भो वंचनं ईर्ष्या त्वहंसाहिंसा भ्रमहोह: मानो हंकार: १२ द्विजोत्तमे: करा पि:
सोमगृह्णमि मे च्छे नृपाकृते: संस्कृते: पवित्रोऽऽषध्या येष्ठ तेजीलेरभिषिच्य स्नापयित्वा १४ स्वस्त्ययनं वाचयित्वा वनेदरा [illegible] पणोपस्त
माहितचित्तं कृत्वाग्निं सवपयित्वा मदाग्रणं पदृस्सोपेतमन्नं द्विजातिभ्य: प्रादात्त्वयच्छत् १५ स्रग्वस्त्रालंकृतोरदत्वा दिभि: सर्वे ऐश्वर्यैः
: वासो सिस्रज: हेमसौलास्त्रा सा: संतोतितया गाश्चात्मजस्याभ्युदयार्थे द्विजातिभ्य: प्रायच्छत्ते च मन्त्रविदो युक्ता: समाहिता द्विजातयो
ऽन्वयुंज त्वमृगयुस्तुराशिषइतिशेष: १६ यदभिप्रायेणाशिषोऽन्वयुंजस्ताश्चतथ्यो न कभवारित्याह तेवि मेयोऽस्या शिषस्तद्रेप्रोक्ता: करा

येसत्यान्नतदंभे र्ष्याहिंसामानविवर्जिता: नतेषांसत्यशीलानामाशिषो विफलो रुता: १२ इतिवालकमादाय सामर्ग्यजु
रुपाहृतै: जलै: पवित्रो षधिभिरभिषिच्याद्विजोत्तमै: १४ वाचयित्वास्वस्त्ययनं नक्षत्रोपाःसमाहित:कृत्वाचाम्प्नं द्विजाति
भ्य: प्रादादन्नं महागुणं १५ गाव: सर्वगुणोपेता वास: स्त्रग्रुक्ममालिनी: आत्मजाभ्युदयार्थाय प्रादात्तेचान्वयुंजत १६
विप्रामन्त्रविदोयुक्तास्तैर्या: प्रोक्तास्तथाशिष: तानिष्फला भविष्यंति न कदाचिदपि स्फुट १७ एकदारोहमारूढं लालयंती
सुतंसती गरिमाणं शिशोर्वोढुं नसेहेगिरिकूटवत् १८ भूमौ निधाय तं गोपी विस्मिता भारपीडिता महापुरुषमादध्यौ जगतामा
सकर्मसु १९ दैत्यो नाम्ना तृणावर्त: कंसभृत्य: प्रचोदित: चक्रवातस्वरूपेण जहारासीनमर्भकं २०॥
चिदपि स्फुटं वचनं निष्फलानभ

विष्यंले १७ अथ तृणावर्तासुरवधाख्यकम् यदपि भगवतो वालविचेष्टितं विवक्षुस्तावदुपोद्घातत्वेन चेष्टितमाह द्वाभ्यां एकदेति
कदाचित्सतीयशोदाख्या ग्रहमसंगमारूढं सुतं श्रीकृष्णं लालयंती गिरिकूटवत् शिशोर्गरिमाणंभारं वोढुंनसेहेतदुक्तं भगवत्यादिभिः
परिहरणार्थं चिकीर्षितकार्यविषयो गायच तदंकादवरोहे च भगवता सहभारेन सेहेइतिभाव: १८ कदाचिदपि सा शिशोरेवं विपरीतगरिमा
नदृष्ट इति विस्मिता भारेण पीडिता च ततः सिद्धभूमौ निधाय गोत्यागतशंकया महापुरुषं भगवंतमादध्यौ ध्यातवती ततो जगतां कर्मसु गा
हीपकर्मसु न्यासमवृत्तावभव यतः श्रीकृष्णोदेहवर्तिनं जगतं भारेण पीडितासती परब्रह्मकं मध्ये कर्मस्वापन्न तु जगद्दुर्वहं तं भगवं

तदूर्ध्वः। अथोमिन्त्रापततो ऽसुरात्मकस्य शकटस्याधोऽलंघमानमेव खट्वायां शयानस्य शिशोः श्रीकृष्णस्याल्पकस्यातो प्रवा
लवत् मृदुश्च यो ऽघ्रिस्तेन हतं शकटं वर्त्मविपरीतमवर्त्तत तदेव दर्शयितुं विशिनष्टि विध्वस्तानि नानारसवन्ति कुप्यभाजना
नि सुवर्णरजतव्यतिरिक्तकांस्यादिमयानि पात्राणि यस्मिन् व्यत्यस्ते चक्रे ऽक्षश्च अधारदारुविशेषश्च यस्मिन् विभिन्नः कूब
रं युगं यस्मिंस्तच्च दृष्टमिति शेषः ७ यशोदाप्रमुखा व्रजस्त्रियो याः श्रेयांसि कर्मणि समागताः स्ताश्च नंदाद्या गोपाश्च
दृष्ट्वा ऽद्भुतदर्शनेनाकुलाः संभ्रमोन्नाः कथमेतच्छकटं स्वयमेव विपर्यस्तं विपरीतमभूदित्येवं ब्रुवंतश्च बभूवुः ८ माहिये ते कुशकाः
आलीवविषादेन ऊचे वेनमोहिता जनाः यशोदायाश्च आसमंतात्सर्वतः परिवृत्य परिवेष्ट्य ९ तदासव्यवसिताशकटगमन

अथः शयानस्य शिशोरथाल्पक प्रवालमृद्वंघ्रिहतं व्यवर्त्तत। विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभि
न्नकूबरं ७ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः। नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै
शकटं विपर्यगात् इति ब्रुवंतो ऽतिविषादमोहिता जनाः समंतात्परिबभूवुरान्नवत् ८ ऊचुरव्यवसितमतीन्गोपान्गोपी
श्च बालकाः। रुदतानेन पादेन क्षिप्तमेतन्न संशयः ९ न ते श्रद्दधिरे गोपा बालभाषितमित्युत अप्रमेयं बलं तस्य बाल
कस्य न ते विदुः १० रुदंतं सुतमादाय यशोदा ग्रहशंकिता कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ११ पूर्ववत्स्थापितं
गोपैर्बलिभिः सपरिच्छदं विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः १२॥

तद्विपर्यासगोचरा मतिर्येषां तान् गोपान् गोपीश्च
प्रति बालकाः श्रीकृष्णस्य समंततः [illegible] क्रीडंतः ऊचुः किमिति एतच्छकटमनेन बालकेन रुदता पादेन क्षिप्तं विपर्ययं
प्रापितमत्र न संशयः कार्य इति ९ ते नंदादयो गोपा न श्रद्दधिरे विश्वासं न चक्रुर्बालस्यैतन्न संभवत्येतच्च बालकाः किं जानंती
ति बालकस्याप्रमेयमपारं बलं च न वै विदुः १० ततो रुदंतं सुतमादाय बालग्रहशंकमाना ग्रहएव विप्रैः कृतमि सूक्तैः स्तोमम
न्त्रैः कृतस्वस्त्ययनं कृतानिष्टपरिहारकर्माणं स्तनमपाययत् ११ ततो बलिभिर्बलिष्ठैः पूर्ववत् स्थापितं बलिभिर्गंधमाल्यादि
कृतशोभिः प्रजाभिः सहितं सपरिच्छदं यथापूर्वं स्थापितं विप्रा हुत्वाग्निमिंधनं यामास अभ्यर्हादिकोपविप्रा आचार्यां चक्रुरित्य

गोपान्

भा॰द॰
द॰टी॰
३॰

मंतरिक्षात्पतितं शिलायां पतितमतएव विशीर्णसर्वावयवाः यस्यतं दैत्यं रुद्रशरेण विद्धं त्रिपुरमिव करालं भयंकरं संघीभूता स्त्रियो रुदत्य ददृशुः २९ ततस्तस्य दैत्यस्य उरसि लंबमानं कृष्णमादाय मात्रे यशोदायै प्रतिप्राप्य समर्प्य विस्मिता बभूवुः विहायसा गगनमार्गेण पुरुषा देन दैत्येन नीतमप्यपि मृत्युमुखात्समुक्तस्वस्तिमंतं बालं लब्ध्वा नंदप्रमुखा गोपा गोप्यश्च नितरां मोदं संप्रापुः किल ३॰ अथ गोपानां पिथ्यः सं तोषवादमाह अहो इति वाक्यमत्यद्भुतं रक्षसा विहृतो गमितो विनाशं प्रापित एष बालः पुनरप्यगाद्दैवात् आश्चर्यमेतद्भूतं विस्मयः उक्तमेवेत्यदिति तत्र वचैव विदहुः हिंस्र इति क्रूरः खलः स्वपापेनैव विहतः साधुस्तु समत्वेन समस्मिल्लोके भयात्मुक्तो

तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः २९ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानं तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं गोप्यश्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदं ३॰ गोपा ऊचुः अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोभ्यगात्पुनः हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ३१ किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदं यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून्प्रणयन्नुपस्थितः ३२ शुक उवाच दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने वसुदेववचो भूयो मानयामास विस्मितः ३३ एकदार्भकमादाय स्वांकमारोप्य भामिनी प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ३४॥

भवतीति ३१ नस्माभिः किंचित्तपः किमिति नस्माभिः तपश्चाद्यनात्तप्तं किं किंचिच्चीर्णं पूर्वजन्मनि संपादितं अस्माकं तत्कार्य यस्मात्संपरेतो मृतोपि बालकः पुनरपि स्वबंधून्नः सम्यगुपस्थितः दिष्ट्या भाग्येन प्रणयान्वेषयन्नुपागतो दृष्ट्वा अन्यथैतद्दुर्लभमिति भावः तपः कृच्छ्रचांद्रायणादि पूर्तं वापीकूपतटाकादि इष्टमेवाइष्टम्यो तं दत्तं दानं तेषां समाहारं बंधून्प्रणयन्निति पाठे बंधून्प्रत्युपस्थित इत्यर्थः ३२ एवं विधान्यन्यान्यप्यद्भुतानि बहुशो दृष्ट्वा वने बृहद्वने कृते अधीके दृष्ट्वा नंदगोपो विस्मितः पुनर्वसुदेवस्य वचो नेत्रस्यैव दिनं स्वतो ज्ञातास्य गोकुले उत्पातसंचोमानयामास सत्यमेवाभूदित्यमन्यत ३३ अथ भगवान्स्वमातुः कुतूहलं प्रदर्शितवान्सावधानमाह एकदेति प्रस्नुतं स्रवंतं स्तनं पाययामास स्वकर्तृकंभता स्नेहेन परिप्लुता पूरिता आद्रा ३४॥

30

भा॰३

राम
३०

कर्पभलः सन्तं गोकुलं चक्रवातरूपेण तृणावर्त्ताख्यो वनरेणुभिर्व्रजौकसां चक्षूंषि मुष्णन् पिधापयन् महता घोरेण शब्देन दश प्रदिशः ईरयन्निति
पीठमास्थितम् २१ तदा गोष्ठं मुहूर्त्तं रजसा तमसा च रजोऽन्धकाराभ्यामावृतमभूत् यावद्यशोदा यतो यत्र न्यस्तवती निद्रितवतो तत्र देशे सुतं नापश्यन्नद
दर्श २२ तदा गोपीजनः परमन्यमात्मानं च नापश्यत् कुतः यतो विमोहितः तत्र हेतुः तृणावर्त्तनिसृष्टाभिः सिकताभिरुपद्रुतः २३ ततो स्वराक
ठिनात् पवनचक्रात् पांशुवर्षे सति सुतपदवीमविलक्ष्य बहुऽबला माता यशोदा अतिकरुणं यथा तथा अनुस्मरन्ती भुवि पतिता यथा मृतवत्सा गौ
स्तद्वच्छुशोच २४ तत्र तस्या रुदितमाकर्ण्य भृशमतितरामनुतप्ता धियो मनांसि यासां ताः अश्रुपूर्णमुख्यो यासां ताः तथाभूता गोप्यः तत्रागत्य नन्दसूनुं श्रीकृ

गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः २१ मुहूर्त्तमभवद्गोष्ठं रजसा तमसावृतं सुतं
यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः २२ नापश्यत्कश्चनात्मानं परं चापि विमोहितः तृणावर्त्तनिसृष्टाभिः सिकताभिरुपद्रु
तः २३ इति खरपवनचक्रपांशुवर्षे सुतपदवीमबलाविलक्ष्य माता अतिकरुणमनुस्मरन्त्यशोचद्भुवि पतिता मृतवत्सका यथा
गौः २४ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः रुरुदुरनुपलभ्य नन्दसूनुं पवन उपारतपांशुवर्षवेगे २५
तृणावर्त्तः शान्तरयो वात्यारूपधरो हरन् कृष्णं नभोगतो गन्तुं नाशक्नोद्भूरिभारभृत् २६ तमश्मानं मन्यमान आत्मनो गुरुमत्तया
गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २७ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे

= १० ९ कृ

स्तमनुपलभ्याऽदृष्ट्वा रुरुदुः उपारतः पांशुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या रुदितमनुनिशम्येत्यन्वयः २५
वात्याचक्रवातः तद्रूपधरस्तृणावर्त्तः श्रीकृष्णं हरन् शान्तवेगः कृष्णं विन्नभोगतः परं नभो गन्तुं नाशक्नोत् तत्र हेतुः भूरिभारभृ
दिति २६ तं बालं गुरुमत्तया आत्मनः स्वस्मात् अश्मानं ह्यपि पतितः कण्ठलग्नं पाषाणं तुल्यं मन्यमानः यद्वा आत्मनः स्वस्माद
पि गुरुमत्तयाऽश्मानं बालव्याजं परं मन्यमानः सन् महता गले गृहीतः तमुत्स्रष्टुं त्याजयितुं नाशक्नोत् २७ गले ग्रहणेनैव निश्चेष्टो
निर्गते अन्तर्लोचने यस्य सः दैत्यः अव्यक्तमस्पष्टं शब्दं वाचो यस्य सः तथाभूतः निर्वेक्त्रगलत्वादिति भावः बालेन श्रीकृष्णेन सहितो व्य
सुर्गतप्राणो व्रजे न्यपतत् २८ ॥ रा० श्रा० व०

रा१

भा.द.
द.टी.
म३१

प्रणेष्यद्दद्भुर्व्यर्थयानि नोऽपदसमागतस्तत्राह महद्विचलनमिति हे भगवन्महतां भवादृशानां विचलनं स्वाश्रमादन्यत्र संचरणं विघ्नयासेन दीनचेतसां गृ
हिणां नृणां श्रेयसा ये कल्पते ऽन्यथा तु कदाचिदपि न कल्पते न तु स्वार्थं किंतु महत्त्वानुग्रहार्थमेवेत्यर्थः ४ त्वया बाल्ययोर्नमस्क्रिया कार्येति
वक्तुं तस्य विज्ञानातिशयमाह ज्योतिषामिति यज्ज्ञानमतीन्द्रियम् [illegible] मतीन्द्रियस्तानसाधनं ज्योतिषामयनं गमनं तत्सात्पाद्यत्र ज्योतिःशा
स्त्रमित्यर्थः तत्साक्षाद्भवता प्रणीतं येन ज्योतिषामयनेनान्यो ऽपि पुमान्परावरं भूतभाविभवत्वेद ५ दिव्यदृष्टिमाह त्वं हीति हे ब्रह्मवि
दां श्रेष्ठ त्वमनयोर्बालयोः संस्कारान्नामकरणादीन्कर्तुमर्हसि देवहत्त्वान्मंत्रविदांश्च त्वमेव कर्तुमर्हसीति भावः नेतु नाहं त्वं हि
तस्मात्त्वं नृणां जन्मना ब्राह्मणो गुरुः नृणामिति सामान्यनिर्देशमपि ब्राह्मणानां च क्षत्रियादीनां च ब्राह्मण एव गुरुः स्वभावतो गुरुरित्यभिप्रेतं ६ अ

31

महद्विचलनं नृणां गृहिणां दीनचेतसाम् निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित् ४ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानम
तीन्द्रियं प्रणीतं भवता येन पुमान्वेद परावरं ५ त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि बालयोरनयोर्नृणां जन्मना ब्रा
ह्मणो गुरुः ६ गर्ग उवाच यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा सुतं मया संस्कृतं ते मन्यते देवकीसुतं ७ कंसः पापम
तिः सख्यं तव चानकदुन्दुभेः देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ८ इति संचिन्तयञ्छ्रुत्वा देवक्या दारिकावचः अ
पि हन्ता गताशङ्कस्तर्हि तन्नोऽनयो भवेत् ९॥

अस्मादिदं नेदं प्रतिज्ञातकार्यमित्यभिप्रायेण प्रत्याचष्टे यदूनामाचा
र्यत्वेन प्रसिद्धो ऽहं यदि त्वत्पुत्रं संस्कुर्यां तर्हि मया संस्कृतं त्वत्पुत्रमपि देवकीपुत्रमेव पापमतिः कंसः [illegible] मत्कर्तृ
कसंस्कारेण लिंगेन देवकीसुतमेवायं वसुदेवपुत्र इत्यर्थः ७ ननु यदुकुलाचार्येण त्वया संस्कृतं कथं चिह्नं [illegible] तत्र वसुदेवस्य
पुत्रः तथापि देवक्यां जात इति कुतो ज्ञायते तत्राह सख्यमिति नंदवसुदेवयोः सख्यं प्रसिद्धमेव वर्तते अपरो एकत्वाभिहितो
देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति किं तु पुमानेव सः भवेत् [illegible] वसुदेवेन सख्यान्नंदस्य सन्निधावेव निहित इत्येवं देवकी
दारिकावचश्च चिन्तयन् गताशंकः गतसंशयः हंतापि हन्यात् ततो हि तन्नो ऽस्माकं महाननयः अनीतिः स्यादिति यावत् तस्मादि
दमुक्त्वा गर्गस्तूष्णीं बभूवेत्यर्थः ९॥

मन्यते

राम
२१

हे राजन् पीतप्रायस्य पीतप्रायस्तनस्य स्तनस्य पानस्येत्यर्थः पीतमिति भावे क्तः पीतं पानमस्यास्तीति पीतः अर्शआदित्वान्मत्वर्थीयोऽच् तत्प्रायः यद्वा अभ्यक्ताभ्यासेन इति विलक्षणार्थे क्तः प्रायःशब्दः सदृशवाची सत्यज्ञानतिरिक्तार्थपरः तस्य सुतस्य रुचिरं सुंदरं स्मितं यस्मिं स्तन्मुखं लालयती जुंभतो दिलालनं कुर्वती जृंभतः सुतस्य मुखे इदं वक्ष्यमाणं वाच्यात्मकं जगद्ददर्श अपश्यदिति पाठांतरं ब्रह्मांडांतर्वर्तिस्मितं सुतं लालयती पीतप्रायस्य जृंभतः मुखं विहरणतः सुतस्य मुखे इदं जगद् ददर्शेत्यन्वयः ३५ तदेव जगदर्भ तपदार्थानाह खमाकाशं रोदसी द्यावापृथिव्यौ पार्थिवकमय्ययं ज्योतिरनीकं ग्रहनक्षत्रतारकादि ज्योतिश्चक्रं सूर्यादीनामितरेषोगर्बंधः नगान्गिरीन्तद्दुहितॄर्नदीः यानि स्थावरजंगमात्मकानि भूतानि च ददर्शेत्यन्वयः ३६ हे राजन् सा मृगशावाक्षी यशोदा सुतस्य मुखे विश्वं दृष्ट्वा कंपवि

पीतप्रायस्य जननी सा तस्य रुचिरस्मितं मुखं लालयती राजन् जृंभतो ददृशे इदं ३५ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ३६ सा वीक्ष्य विश्वं सहसा राजन् संजातवेपथुः संमील्य मृगशावाक्षी नेत्रे आसीत् सुविस्मिता ३७ इति श्रीभागवते महापुराणे दशमस्कंधे सप्तमोऽध्यायः ७ श्रीशुक उ॰ गर्गः पुरोहितो राजन् यदूनां सुमहातपाः व्रजं जगाम नंदस्य वसुदेवप्रचोदितः १ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः आनर्चाधोक्षजधिया प्रणिपातपुरःसरं २ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं नंदयित्वाब्रवीद्ब्रह्मन् पूर्णस्य करवाम किं ३ ॥

थुमत्वेलोक्य संजातो वेपथुः शरीरकंपो यस्यास्तथाभूता स्वकीये नेत्रे निमील्य विस्मिता अभव ३७ इति भागवतचंद्रिकायां सप्तमः ७ ॥ अथाष्टमे गर्गेण कृतं संस्कारस्य तत्तच्चिह्नमहात्म्यमभगवतो मात्रे विश्वरूपदर्शनं तद्विस्मापनादिरूपं चरितमुच्यते अष्टमेन गर्गः यदूनां पुरोहितो वसुदेवेन प्रचोदितो नंदस्य व्रजं जगाम १ अधोक्षजधिया भगवद्ध्यानपूर्वकं प्रणिपातपूर्वकं तथानर्चार्चितवान्नंदः इति शेषः २ आतिथ्यं निवेदितपदार्थादिकं आतिथ्यं [illegible] तं कृतं अर्घ्यपाद्यं सूपविष्टं गर्गं सूनृतया मधुरया गिरा नंदयित्वा हर्षयित्वाब्रवीत् ३ तदेवाह ब्रह्मन्निति आदिनाय हनामदंमितः पूर्णस्य सत्यकामस्य तव किं करवाम न किमपि पूर्णभोगात्किंकरवामेत्यनेन तु प्रश्नोऽयमेवेत्यर्थः एवकारेण स्य परब्रह्मानं

न॰

प्रेजाइतिशेषार्थः २

भा०द०
स्क०टी०
३२

इत्यादीनि वहूनि नामानि आह यशोमति रेवं वेदन न ताहृश इत्यर्थः अनेनात्रापि परमं ऐश्वर्यं तेन सूचितं यथा इह मेव वेद किं पुनरन्यो यो न वेदे त्यर्थः २५ जातकफलमाह एष इति वः युष्माकं मेषः श्रेय ऐहिकं माधास्यति करिष्यति गोपानां गोकुलं चनंदयतीति नंद अनेनयुतेन दु र्गाणि दुःखानि अञ्जः अनायासेन तरिष्यथ कमव्ययं २६ हे व्रजपते अराजके रक्षकरहिते जगति यत्तथा रक्ष्यमाणा उत्सवैः पी डिताः साधवो यमेतद्बलिनः अनेन बलवता सह एधिता अस्मिन् जन्मनि समेधिता रक्षमाणाः दस्यून् जिग्युर्जितवन्तः अनेन परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनाय इति भगवदुक्तेरभिप्रेतार्थ एव परित्राणार्थमेव जात इति च भावः २७ हे महाभागाः ये तस्मिन् यजमानवाः प्रीतिं कुर्वन्ति तान् अरयः शत्रवो नाभिभवन्ति यथा विष्णुपक्षान् असुराः यथा देवान् असुरास्तद्वत् अत्र प्रीतिस्य

१०:२
२४

एष वः श्रेय आधास्यद्गोपगोकुलनंदनः अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ १६ पुरानेन व्रजपते साधवो दस्युपीडि ताः अराजके रक्ष्यमाणा जिग्युर्दस्यून् समेधिताः १७ य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः नारयोऽभिभवन्त्येतान्वि ष्णुपक्षानिवासुराः १८ तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः १९ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां २० कालेन व्रजताल्पेन गोकुले राम केशवौ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः २१॥

हे नर्मोपास्तिकाभक्तिरभिप्रेतात्परिपाल्येन महति संभवमुक्तका मको पायश्च ये एतस्मिन् भक्तिं कुर्वन्ति मानवाः तेषाम् अभिभवो नेति भावः विष्णुपक्षानिवासुरा इति दृष्टांते न्यायेन दर्शितमुक्तं तद्देवाय त्ताभवाः कंसादयस्त्वासुरसंपत्ता भिजा नाहयन्ति प्रेत १८ तस्मादेवं भाविकत्वात् हे नंद त्वदीयमनः कीर्त्या प्रभावेन नारायणसमो नारायण एव तुल्योऽयं भविता तस्मादेनं समाहितः सावधानचित्तः संगोपाय रक्षस्व पालय १९ इति इत्यमात्मानं शक्तिसंपादितं गर्गे स्वगृहं गते सति नंदः प्रमुदितः आशिषां अभिमतार्थजातेन पूर्णं स्वमात्मानम् अमन्यत २० अथ भगवतः कानिचित् क्रीडां अतःव र्णयन् तेषु प्रदर्शनादिमाह कालेनेति गच्छता अतिक्रमेणेन अल्पेन कालेन व्रजे रामकेशवौ पाणिभ्यां सह जानुभ्यां पाणिभ्यां चेत्यर्थः रिंगमाणौ चंक्रमणं कुर्वन्तौ सरीसृपन्ताविति यावत् विजह्रतुः क्रीडां चक्रतुः २१॥

राम
३२

एवं प्रार्थितं तं गर्गं प्रत्याह नंदः अलक्षित इति अस्मिन् गोकुले मामकैर्मदीयैरप्यलक्षितः रहसि निर्जने देशे स्वस्तिवाचनपूर्वकं द्विजातिसंस्कारं द्विजातिनामवश्यकर्तव्यं संस्कारं तद्यथोक्तादिरादितं कुर्विति सर्वथा १० इत्थं सम्प्रार्थितो द्विजो गर्गः स्वेन कर्तुमिष्टमेव तत्कालं कयो नामकरणं रहसि गूढः सन् चकार ११ तदेव दर्शयति अयमिति रोहिण्याः सुहृदो रमयन्निति नस्य नामशब्दस्य प्रवृत्तिनिमित्तं प्रदर्शितं बलाधिक्यात् बलेति शब्दस्य तथा यदूनामपृथग्भावात् तस्मिन् पित्रादिप्रतिपत्त्या [illegible] संकर्षणेति [illegible] संकर्षणादिशब्दाभिधेयं इत्यादि [illegible] गर्भसंकर्षणात् संकर्षणात् [illegible] संकर्षणेत्यपि [illegible] सर्वथा गर्भसंकर्षणात् संकर्षणो [illegible]

नंद उवाच अलक्षितोऽस्मिन् रहसि मामकैरपि गोकुले कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं १० श्रीशुक उवाच एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् चकार नामकरणं गूढो रहसि बालयोः ११ गर्ग उवाच अयं हि रोहिणीपुत्रो रमयन् सुहृदो गुणैः आख्यास्यते राम इति बलाधिक्याद्बलं विदुः यदूनामपृथग्भावात् संकर्षणमुशन्त्युत १२ आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः १३ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते १४ बहूनि सन्ति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १५॥

इत्युत्पत्तिप्रभृति [illegible] नामानि [illegible] आसन्निति प्रतियुगं तनूः [illegible] उपाददतः [illegible] इदानीं [illegible] भविष्यति [illegible] परमपुरुष [illegible] वाचकः [illegible] वाचकः तयोरैक्य [illegible] सा [illegible] वसुदेवापत्यत्वं [illegible] प्रागयमिति अयं श्रीमान् [illegible] वसुदेवापत्यत्वात् वासुदेव इत्यभिज्ञाः संप्रचक्षते [illegible] नामानि [illegible] वसुदेव इति [illegible] नेत्यर्थः

भा॰द॰
श्री॰टी॰
३३

ततो वयस्यैस्तुल्यवयस्कैर्व्रजबालकैः सहरामः समं रामेण सहितः कृष्णो व्रजस्त्रीणां हर्षं जनयन् विक्रीडे २७ रुचिरं सुंदरं कौमारमकं चापल्य
मवलोक्य तस्य कृष्णस्य मातुः यशोदायाः शृण्वंत्याः सत्याः इति वक्ष्यमाणप्रकारेणोचुः २८ तदेवाह वत्सानिति असमये दोहनात्पूर्वं क्व
चित् क्वचिद्वत्सान् मुंचन् क्रोशे आक्रोशे संजातो हासो यस्य तथाभूतो भवति स्तेयं चौर्यार्जितं तत्र दध्यादि तत्रापि स्वाद्व
त्तरं दधि पयश्चात्ति खादति कल्पितैः स्तेययोगैश्चौर्योपायैः स्वयं भोक्ष्यमाणो मर्कान् प्रति विभज्य ददाति तेषामपि मध्ये
यः कोऽपि नात्ति चेत्तर्हि भांडं भिनत्ति मर्कान्भोक्ष्यन्विभजति स चेन्नास्तीति पाठे मर्कं नवनीतं मर्कं तु परिमाणं स्यान्नवनीतं प्रच
स्तं इत्यभिधानाद्विभजति संविभ्य इति शेषः यदा स मर्कटो नास्ति चेत्स्वभक्ष्यं व शिष्टनवनीतमपि तैर्भांडं भिनत्तीत्यर्थः द्र

ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २७ कृष्णस्य गोप्यो रुचिरं वीक्ष्य
कौमारचापलं शृण्वंत्याः किल तन्मातुरिति होचुः समागताः वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वा
द्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्यु
पक्रोश्य तोकान् २९ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित्
ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३०॥

33

चिन्नवनीतादिद्रव्यालाभे सति स
छलनिद्रितया तदलाभे सति सगृहकुपितः स्वगृहे कुपितः सगृहकुपितः इति पाठे स कलहः सगृहं यथा स्यात्तथा कुपितः तेषां
तोकानां स्वयं क्वचिद्विसृज्य उपक्रोश्य रोदयित्वा याति २९ कल्पितैः स्तेययोगैरित्युक्तं तत्प्रपंचयति हस्ताग्राह्य इति उच्चस्थे नवनी
तादिभांडे हस्तेनाग्राह्ये सति पीठकोलूखलाद्यैर्विधिं तदुपायं रचयति शिक्यस्थभांडे अंतर्निहितं दध्यादिवयुनं
ज्ञानं यस्य तथाभूतः छिद्रं रचयति शिलोत्क्षेपणादिभिः छिद्रं करोतीति तद्वित् छिद्ररचनाभिज्ञः ध्वांतागारे अंधकारावृते गृहे धृतम
णिगणं दिव्यमणिभूषितं स्वांगमेवार्थप्रदीपं तदर्थप्रकाशं स्वांगं स्वशरीरं स्वयं पतति सन्निधापयति इत्येवं कस्मिन्समये कः
रोतीत्यत आह काले यस्मिन्काले गोप्यो गृहकर्मसु प्रवीणाश्चित्तास्तदेवं करोतीत्यन्वयः ३०॥

राम
३३

विहारमेव वर्णयति तौ रामकेशवौ घोषौ पादस्वरणविशेषौ विलसन्तौ तेषां घोषेण व्रजगतं तत्कर्दमे घ्रियमाणा अङ्घ्रि
यं प्रसारितजानुव्रजगतं यथा तथा पश्चात् कृतजानु सरीसृपन्तौ पद्भ्यां सरीसृपन्तौ पुनः पुनः रतिशयेन वा चरन्तौ तेषां घोषाणां नादेन तत्संघोष
स्य व्रजस्य नादे गत्वा हृष्टं मनो ययोस्तौ लोकं मिलन्तस्ततः पश्चात् जनमनुसृत्य विश्वतराणि पूर्णान्यङ्गान्यभूत्पुनरप्युपेत्य मातरौ रोहिणी यशो
दयोरन्ति समीपमुपेयतुरुपजग्मतुः २२ तन्मातरौ रामकेशवयोर्मातरौ घृणया कारुण्येन स्नुवन्त्यौ पयः पूर्णस्तनाभ्यां पयः स्रवन्त्यौ पङ्काङ्गरागे
रुचिरौ सुतौ बाहुभ्यामुपगृह्य उरसि संधाय स्तनं दत्त्वा पुत्रौ निपाय प्रपिबतोः सुतयोर्मुखं सुन्दरं स्मितमल्पदशनाः सहसा दन्ता यत्र
स्मितं मुखं मन्दहासं प्रमोदं प्रापतुः २३ यर्हि यदा अङ्गनानां दर्शनीया कुमारलीला ययोस्तौ यावन्तौ अन्तर्व्रजे व्रजमध्ये व्रजस्त्रियो वत्सानां

तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतु
रन्ति मात्रोः २२ तन्मातरौ निजसुतौ घृणया स्नुवन्त्यौ पङ्काङ्गरागरुचिरावुपगृह्य दोर्भ्यां दत्त्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मु
ग्धस्मिताल्पदशनं ययतुः प्रमोदं २३ यर्ह्यङ्गनादर्शनीयकुमारलीलावन्तर्व्रजे तदबलाः प्रगृहीतपुच्छैः वत्सैरितस्तत उ
भावनुकृष्यमाणौ प्रेक्षन्त्य उज्झितगृहा जहृषुर्हसन्त्यः २४ शृङ्ग्यग्निदंष्ट्र्यसिजलद्विजकण्टकेभ्यः क्रीडापरावतिचलौ
स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थां २५ कालेनाल्पेन राजर्षे रामः कृष्ण
श्च गोकुले अघृष्टजानुभिः पद्भिः विचक्रमतुरञ्जसा २६॥

मातरौ निरीक्ष्य तत्कारुण्या हर्षं संयोजयन्त्यः कथंभूतौ ताभ्यां प्रगृहीता
नि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ अनुकृष्येति पाठे तासां गृहीतवत्सपुच्छयोर्वा इत्यर्थः नितरां क्रीडापरावतिचलौ इति पाठे क्री
डापरौ अतएवातिचलौ सर्वत्र चरतां वालित्वलौ इति पाठे ताभ्यां सह सत्तौ निषेद्धुं वारयितुं गृह्याणि गृहोचितानि कर्माणि
कर्तुं च यदा तयोर्जनन्यौ न शेकाते न शक्ताः तेनाकुला निश्चयं गता ये पुत्रापत्यर्त्तेन समर्था अनवस्थां समर्थाः मनसो दारत्वादयः दंष्ट्रिणः श्वा
दयः द्विजाः पराद्याः तदा ते मनसा उभावतितरां मनसोऽनवस्था प्राकृतं व्याप्तवुरिति गृहिणीनां प्रेमपराकाष्ठा प्रदर्शिता २५
हे राजर्षे अघृष्टजानुभिः पद्भिर्विचक्रमतुः अदात्विजानुभ्यां क्रमणं कृत्वा विस्मयात् गमनं चालित्यं चक्रतुरित्यर्थः २६॥

मा॰ द॰
प॰ टी॰
३४

ज्योतिश्चक्रं तेजः सूर्यादि जलं समावरणं जलं नभश्चाकाशः स्वर्लोकः विवरणं तलादीनि वैकारिकाणि सात्विकाहंकारकार्याणि
श्रोत्रादीनि दशेन्द्रियाणि मनश्च मात्रास्तामसादिशब्दादितन्मात्राणि पंच त्रयो गुणाः सत्वरजस्तमांसि ३७ एवमेतद्विचित्रं वि
श्वमेकदेवगीदृश्यविचित्रतामवदर्शयन्ति शिना हि जीवाः हे च्छाः सर्वोत्पत्तिनिमित्तगणस्तो भकस्वकालः परिणामहेतुः स्व
भावश्च जन्महेतुः कर्मचाशयो वासनाच ते लिंगानां शरीराणां भेदाय स्मिंस्तत्सदृशात्मानमात्मना यशोदयास्मै नवपदि
तवरजंच सत्तोस्मै तत्रापि विदारितेव्यात्मेव्यामेव लोकस्याः संशयमवाप ३८ शंकामेव दर्शयति किं इति एषः शिणारसम्य
देवविश्वदर्शनद्रयः किं स्वप्नः जागरावस्थायां न हि स्वप्नः सम्भवति इति मरपविलर्कयति उत देवमायेति तथाच घटपटादीनिवमर्व
किं न पश्यतीति विमृश्य शंकते किं च वैतिवत्समादेवबुद्धिविपर्यासः भ्रम इति यावत् तथाचेऽप्यन्यः दर्शनेपि यथावत्कं यंम

34

ज्योतिश्चक्रं जलं तेजो नभः स्वर्विवरणानि च वैकारिकानींद्रियाणि मनो मात्रा गुणास्त्रयः ३७ एतद्विचित्रं सहजोवका
लस्वभावकर्माशयलिंगभेदं मनोस्तनौ वीस्य विदारितास्ये व्रजसंहृतात्मानमवापशंकां ३८ किं स्वप्न एतदुत देवमा
या किं वा मदीयो बत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ३९ अथो यथावन्न वितर्क
गोचरं चेतोमनः कर्मवचोभिरंजसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४० ॥

तीति रलोनबुद्धिमोह इति विमृश्य शंकते अथोऽथवा मदीयस्यामुष्यार्भकस्यापि सतः अयं कश्चनाचिंत्यः औत्पत्तिकउत्पत्ति
सिद्धः स्वाभाविक इति यावत् आत्मनः स्वस्य योगः ऋद्धिस्थाविलविम्बत्वादिकल्याणगुणयोगः तन्मूलक इत्यर्थः ४० चरमं
पक्षमाश्रित्यायमीश्वर इति निश्चित्य तं शरणं मतिं वर्ष्ण इति चेतसा बुद्ध्या मनः कर्मणा मनो व्यापारेण वचोभिश्चांजसा
तत्त्वतः साक्षाद्वा यथावद्यथात्म्यनादो विश्वं नवितर्कगोचरं नानाविधतर्कागोचरं यदाश्रयं यदाधेयं यतउत्पद्यते इति
शः येन जीवति प्रतीयते यस्मिन्लीयते वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशंति इति श्रुत्यर्थं प्रत्यभिज्ञान सामर्थ्याद्यतोक्षेनप्रतीयते इति यदापत्ति
तत्स्मान्जायते जीवति यस्मिन्लीयते तिपदानामध्याहारः ते सुदुर्विभाव्यं दर्शियं तथाचेतोमनः कर्मवचोभिः तर्कितुमशक्यं पदं

परमात्मनः २

पतोर

वत्स२

एवंकुर्वंश्चौ॰रायमित्युत्संगेकृत्वातिप्रागल्भ्यात्सुशासतिजल्पतित्वमेवचोरोऽहमेवगृहस्वामीतिवदतीत्यर्थः वालोस्वांच्छितेगृहेमेहना
दीनिमत्तोत्सर्गादीनिकुरुतेस्तेयोपायैर्विरचितानकृतिःकमियेनतथाभूतोपित्वत्समीपेयथासुप्रतीकःसाधुस्तथदास्ते एवमिस्यस्त्रीभयेन
यनेयस्मिन्तच्छन्नकृतीपत्त्कंप्रवर्तनस्तूपमन्वमालोकिनीभिर्यामोत्ता॰प्रत्याप्रितान्यथाश्वोर्यादिव्यापारायस्यास्तथाभूतापिप्र
हसितंमुखंयस्याःसायशोदापालंभुपुत्रमाहेतिउपन्नेच्छत ३१ कदाचिदपवादांतरेसत्प्रपालभांत्तामहद्वाश्चर्यमभूदितिकथयन्ना॰
हएकदेतिस्पष्टोर्थः ३२ सायशोदाहितामिच्छतीकृष्णमृतर्गृहीत्वोपालभ्यनिर्भर्त्स्यभयेनसंभ्रांतेप्रेक्षणेचपललोचनेयस्यतंश्री
कृष्णममाषत ३३ भाषणमेवाहकस्मादितिहेऽदांतात्वंत्वपलगात्रउद्धतस्वभावेतिवाकस्माद्धेतोर्भवान्नाहसिमृदंभक्षितवान्ना
पा१ हीत्त्वितवानित्यत्राहनवलैवयस्येनएतेत्वभक्षितवानितिवदंतीत्यर्थः ३४ एवमुक्तःकृष्णआह नाहंइति हेअंबनाहंभक्षितवान्ममखदो

एवंधाष्ट्यान्युशतिकुरुतेमेहनाद्यानिवास्तोस्ते यैःपायैर्विरचितकृतिःसुप्रतीकोयमास्ते इत्थंस्त्रीभिःसभयनयनश्रीमुखालोकिनीभि
र्व्याख्यातार्थाप्रहसितमुखीनत्युपालब्धुमैच्छत् ३१ एकदाक्रीडमानास्तेरामाद्यागोपदारकाः कृष्णोमृदंभक्षितवानितिमात्रेन्य
वेदयन् ३२ सागृहीत्वाकरेकृष्णमुपालभ्यहितैषिणी यशोदाभयसंभ्रांतप्रेक्षणाक्षमभाषत ३३ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः
तै२ वदंतितावकाह्येतेकुमारास्तेग्रजोप्ययं ३४ नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः यदिसत्यगिरस्तर्हिसमक्षंपश्यमेमुखं
३५ यद्येवंतर्हिव्यादेहीत्युक्तःसभगवान्हरिः व्यादत्ताव्याहतैश्वर्यःक्रीडामनुजबालकः ३६ सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः

सर्वंमायावैभववतीतिभावः एतेवदंतीत्येतत्सत्यमितिचेत्तर्हिसर्वैः इति यदिएतेसत्यागिरोवाचोयेषांतथाभूतास्तर्हिमुखसदंममपश्य ३५ एवमुक्तया
जनन्यायदिमत्युक्तोव्यादेहीतिविवृतंकुरुविशिष्टः भगवान्हरिः मादृशानिरेवतमकेरोमस्कृ आत्मनेनेविश्वरूपदर्शनोपयोगकेनयत्नेनविशिनष्टि अव्याहतम
श्र२ व्यातरदशायामप्यच्युतमैश्वर्यमौपचारिकसाधारणपराभवशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचसत्यकामःसत्यसंकल्पइत्यादिवेदांता
वगतंसर्वशक्तित्वादिकंयस्यतथाविधःस्यात्संक्रीडार्थंमनुष्यजोबालकस्तोनमनुजबालकत्वापत्तिस्तत्राह क्रीडयानिमित्तभूतयामनुजबालकः
नतुकर्मणेतिभावः ३६ सायशोदातत्रतस्मिन्मुखेविश्वंददर्शतदेवप्रपंचयति जगज्जंगमंस्थास्नुस्थावरंतदंतरिक्षंलोकाःपर्वतद्वीपसमुद्रसहितःभूर्लो

भा॰द॰
ए॰टी॰
३५

वसूनां प्रवरो श्रेष्ठो द्रोणः धराख्यया भार्यया सह ब्रह्मणश्चतुर्मुखस्यादेशात् गोरक्षणादि करिष्यमाणस्तं ब्रह्माणमुवाच भूभा
रावतरणाय भगवानवतरिष्यति पयःप्रदानेनापि भगवंतमाराधयितुं गोरक्षणमनयस्व त्वं प्रेजे निष्ठंतु त्वं तु गोरक्षणं धुंमा
ययाप्यदो गोवेषु जनिष्यति मह्यमेवं ब्रह्मणो वाक्यमादेशः ४८ उक्तमेवाह जातयोरिति भुवि लोके जातयोर्नौ आवयोः पुत्रभावेनोत्पन्ने
विश्वेश्वरे हरौ ब्रह्मादीनामपि देवे भगवति हरावाश्रितोतिदुरंतपराभक्तिः स्यात् यथा भक्तिः स्यात्तथा उपदानेन्यर्थः तस्मार्थेनायां दे
तुं वक्ष्यतीति विशिनष्टि यया भक्त्या दुस्तरं उपायांतरेण तं तु मर्त्यः संसारं तितीर्षति पापमंजसा अनायासेन तरेत् ४९ तथेत्युक्तं तथैवाह
एवं भगवान्ब्रह्मणा एवेह लोके व्रजे नंद इति विख्यातो जज्ञे तथा सैव धरा यशोदाभवत् यशोदारूपेण जज्ञे ५० हे भारत गोपीषु मध्ये दंपत्यो

श्रीशुक उवाच द्रोणो वसूनां प्रवरो धरया सह भार्यया करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ४८ जातयोर्नौ महादेवे भुवि
विश्वेश्वरे हरौ भक्तिः भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ४९ तथास्त्वित्युक्तवान् दत्वा व्रजे द्रोणो महायशाः जज्ञे नंद इ
ति ख्यातो यशोदा सा धराभवत् ५० ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५१ कृ
ष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५२ इति श्रीभागवते दशमस्कंधे ऽष्टमो
ध्यायः ८ श्रीशुक उवाच एकदा गृहदासीषु यशोदा नंदगेहिनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि १ यानि यानीह
गीतानि तद्बालचरितानि च दधिनिर्मंथने काले स्मरंती तान्यगायत २॥

यशोदानंदयोः पुत्रभक्तेः पुत्रीभूते तां शास्त्रे जनार्दने भग
वति ततो व्रजस्य वराणां किरासीत् ५१ उक्तं तयोः पुत्रभक्तेः तोष्ट्वरिस्तत्राह कृष्ण इति ब्रह्मणश्चतुर्मुखस्यादेशं वरदानात्मकं सत्यं कर्तुं सत्य

दितं२

यापुत्रभक्तस्य लीलया बालचेष्टितं रामेण सहितो व्रजे वसन् तेषां प्रीतिं चकार चतुर्भुजस्यादेशा एवं नंदयशोदयोः फलमश्रेयः प्राप्तो दशस्यो
ध्यायः रामेण सहितो लब्धो चकार गमित्युत्तरार्थः ५२ इति भागवते दशमे भावार्थदीपिकायां टीकायामष्टमः ८ इत्थं प्रदर्शितविश्वरूपस्य
कृष्णस्याथापरिमिततपःफलेन प्रदर्शनमोदनवमेन एकदेति व्यायांतरे विष्टा सुदामोबन्धस्वत एव पुत्रस्य दाम्ना स्वयमेव
दधि निर्ममंथ १ तस्य श्रीकृष्णस्य बालचेष्टितानि गायपद्यादिरूपेण कविभिर्वर्णितानि सर्वाणि तदा दधि निर्मंथने काले

दशमस्कं

राम
३५

35

ग्रं

ममाहं ममेत्येवं संकल्पयेत स एव ममतन्निवृत्त्युपायः इत्यध्यवस्यति अहमिति ममासौ नंदः पतिः एष मे सुतः सगोप्याः सहगोधनाश्च गोप्यो मे मदीया इत्थं तीव्रजेश्वरस्य नंदस्य समस्तद्रव्यगोष्ठी अस्मीति कुमतिरहं ममताबुद्धिर्यन्मायया यस्य संकल्पेनाभूत् स एव भगवान्मम गतिरहं ममतानिवृत्त्युपायः ४२ इत्थं गोपिकायां यशोदायां विदिततत्त्वायां सत्यां तथापि यथा तथाभूतायां सत्यामेव सकलस्य ईश्वरः विभुः स्वस्य संवंधिनीं पुत्रस्नेहरूपां यो वैष्णवीं मायां व्यतनोदा(च्छादितवान् ४३ सद्यस्तदैव नष्टस्मृतिर्गोपी परमात्मस्मृतिर्यस्याः सा गोपी आत्मजमारोप्य क्रोडीकृत्य प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा यथा पूर्वं तथा बभूव ४४ मायावैभवं प्रकटयितुमाह त्रय्या वेदस्य कर्मभागेन तत्त्वोपदिष्टत्वेन महत्त्वेन उपनिषद्भिर्वेदान्तरभागैः सर्वकारणत्वोपास्यत्वशेषित्वादिना सांख्ययोगैश्च ज्ञानयोगकर्मयोगाद्यैर्भक्तियोगैः कर्मप्राप्यत्वेन सात्वतैः पंचरात्रसंहिताभिः परव्यूहविभवार्चान्तर्यामित्वेनोपगीयमानं महात्म्यं यस्य तं हरि

अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती। गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ इत्थं विदित तत्त्वायां गोपिकायां स ईश्वरः। वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ४३ सद्यो नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं। प्रवृद्धस्नेहकलिलहृदयासीद्यथा पुरा ४४ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः। उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४५ राजोवाच नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं। यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४६ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं। गायंत्यद्यापि कवयो यल्लोकशमलापहं ४७ ॥

मात्मजं हरिं सा विदिततत्त्वापि तदैव केवलमात्मजममन्यत ४५ श्रुत्वैवं विधयशोदानंदभाग्यातिशयं तत्कारणं पृच्छति राजा नंदः इति द्वाभ्यां हे ब्रह्मन् नंदः एवं विधमहोदयः उत्तरं फलं यस्य तत् श्रेयः पुण्यं किं कर्माकरोत् यशोदा च महाभाग्यमेव तत्र यत्र यशोदायाः विशिनष्टि यस्याः स्तनं हरिः पपाविति ४६ किं तत् कृष्णस्य उदारार्भकेहितं पितरौ वसुदेवदेवक्यौ नान्वविंदेतां कृष्णस्य उदारार्भकेहितं लोकस्य शमलापहं तत् कवयो अद्यापि गायंति ईदृशं कृष्णोदारार्भकेहितं दर्शननिमित्तं किमिति प्रश्नार्थः ४७ इत्यष्टमाध्यायार्थः

इति ॥

भा०द०
टी०
३६

तामागतां मात्तयष्टिं प्रियातां प्रसमीक्ष्य सत्वरस्तस्मादिति ; ततउलूखलात् अवरुह्य भीतः पलायितवान् तदा मातमपसरंतं सुतमन्व
धावत् यतो वा चोदितंतत्र ममाप्यमथवा सहे तस्करीत्या वाङ्मनसापरिच्छेद्यं वेभेवं पश्चामन्वधावदित्येतदद्भुतविचित्रं मित्याभिप्रायेणा
विशिनष्टि यं श्रीरूपं योगिनां मनो पि प्रवेष्टुं नेच्छमममथमामपतमन्वेयावत् कथंभूतं मनः तपसेरितं प्रवर्तितं ९ अन्वंचमा
नाऽनुधावंती बृहत्योः श्रोण्योभारेणाक्रांता गतिर्यस्याः शोभनो मध्यप्रदेशो यस्याः जवेनहेतुना विस्रंसितात् केशबंधनाच्च्यु
तैः प्रसूनैरनुगम्यमाना यस्याः सा जननी परामृशत् स्पर्शितवती ; १० ततः कृतागसं हिंसाभीषयंतीभयं प्रापयंती अवागुरत् ताड
यितुमुद्यतहस्ताभवत् कथंभूतं तत्तमांजनपरायोयेन तमंजनोसर्वतः प्रसरंती मषीकज्जलं ययोस्ते अक्षिणी स्वपाणिना कषं

अत्तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोवरुह्यापससार भीतवत् गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ९
अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृ
शत् १० कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयं
त्यवागुरत् ११ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा १२ न चांतर्न बहिर्यस्य
न पूर्वं नापि चापरं पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः १३ तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजं गोपिकोलूखले

तमर्दयंतं भयेन विकले चकिते ईक्षणे यस्य तं ११ तदा बुद्ध्वा तमपि सा सुतं भीतं विज्ञायार्भकवत्सला सत्ययष्टिं त्यक्त्वा ततश्चमावान
भिज्ञा दाम्ना रज्ज्वा तं बद्धुमियेषेच्छतवत् १२ ननु कृतवीर्यं यदनभिज्ञा प्राकृतमिव ववंधेत्याह द्वाभ्यां नेति वंधो हि वहिरेवसंवीते
न दाम्नांतराग्रहे तत्संभवति तच्चेतिपरीते शेषाद् पूर्वापरं इतियोजगतः तत्त्वरूपं रवावधिरेवपूर्वंउत्तरावधिश्च वहिश्चांतश्च
व्याप्यवर्त्तते तस्मात् जगदेतं भूतेन व्याप्येन तन्मात्रा वधं वध्यतेन संभवतीत्यभिप्रायेणाह जेगच्चयइतिकार्यकारणशरीराकार्याभावमिव
यत्नं ईदृशामान्या पिनिरर्णयं १३ मर्त्यस्येव लिंगं शरीरं यस्य तं उलूखलं यथा धारेतं केवलमात्मजं मत्वा गोपी दाम्ना सारधेन उलूखले
उलूखलेवधेनोयमचकारयथाविद्वत् तमर्त्यं यथा तद्वत् १४ कृतागसो तएव वध्यमानत्यं सतः तद्वेभ्यानार्थमुपासंदाम येनतलेभनमभे
रांक सर्वेस जगत्कारणात वातेदानां तेन तत्सहसेर तथा चतत्सत्थकं सिद्धं वस्त्वंतरभावात्स्वनिष्ठवस्तेसात्मनके वधनं नसंभवतीत्यभिप्रायेणाह
—नचापूर्वापरभागवत्त्वात्वेन पूर्णत्वेन अपरस्तः परिवेष्टनेन भवति नन्वेत दसीत्यारुन चांतरितिकिंच व्यापके
न व्यापकस्यवंधो भवति ४

राम
३६

36

कथंभूता क्षौममिति वासः प्रभृतीनां द्वितीयानां विभ्रतीत्यनेनान्वयः पृथुकटितटे कांचीबद्धं क्षौमं वस्त्रं जातः निर्मथनाख्यव्यापारजः कं-
पो यस्य तत् पुत्रस्नेहेन स्नुतयोः पयःस्राविणोः कुचयोर्युगं च रज्ज्वाकर्षणे श्रमो ययोर्भुजयोश्चलंतौ कंकणौ कुंडले च स्विन्नं प्रस्वेदभरितं वक्त्रं
च विभ्राणा कवराद्विगलितो मालत्या यस्याः प्रीतिमावहन् दधिमंथनदंडं धृत्वा निवारयामास ४ तं निषेधं तत्स्नेहसंगमात्तस्मै हेनस्तु तत्स्त-
नमपाययत् कथंभूता स्मितेन सहितं मुखं पश्यंती ईक्षती तदा अधिश्रिते चुल्लोपरि स्थिते पयसि उत्सिच्यमाने गाढाग्निसंपर्कोत्थोद्विकिरिच्छति त्रा४
अतृप्तं स्तन्यपानादतृप्तं पुत्रमुत्सृज्य जवेन वेगेन ययौ जलप्रक्षेपादिना क्षीरतापं शमयितुं जगाम ५ स उलूखलः स्फुरः जातकोपः ६

क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुं-
डले च स्विन्नं वक्त्रं कवरविगलन्मालती निर्ममंथ ३ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः गृहीत्वा दधिमंथानं
न्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं अतृप्तमुत्सृज्य जवेन सा ययावुत्सि-
च्यमाने पयसि त्वधिश्रिते ५ संजातकोपः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं
चापि न तत्र पश्यती ७ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं हैयंगवं चौर्यविशंकितेक्षणं
निरीक्ष्य पश्चात्सुतमागमच्छनैः ८॥ स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरंगतः ६
उत्तार्य गोपी सुशृतं पयः

द्विर्दंतैः स्फुरितं चलं तं च अरुणमधरोष्ठं संदश्य मृषा अश्रूणि यस्य तथाभूतो दृषदश्मना अल्पपाषाणेन दधिमंथभांडं भित्त्वा रहः एकांते अंतरं
गतः हैयंगवीनं नवनीतं जघास भक्षयामास भक्ष्यादिस्पर्शः ६ ततो गोपी यशोदा सुशृतं पयः उत्तार्य चुल्ल्या अवरोप्य पुनस्तत्र
प्रविश्य दध्यमत्रकं दधिमंथनभांडं भग्नं विलोक्य च स्वसुतस्य कर्म जहास तं सुतं तत्र न पश्यती ७
ततः उलूखलांघ्रेः उपरि स्थितं शिक्ये स्थितं नवनीतं मर्कटाय कामं ददतं चौर्याद्विशंकिते चंचले ईक्षणे यस्य तं निरीक्ष्य पश्चात् पृष्ठतः शनैरागमेति ८॥

भा॰ द॰
टी॰
३७

यमलार्जुनमुक्तिदत्तरूपं चरित्रं तत्प्रसंगेनाह कृष्णस्त्विति मातरि उलूखले कृष्णं बद्ध्वा यशोदायां गृहकृत्येषु व्यग्रायां प्रवृत्ता चेता
यां सत्यां कृष्णः प्रभुः श्रेष्ठ विशेषणाप्रादिमोचने समर्थः पूर्वं धनदस्य कुबेरस्यात्मजौ गुह्यकौ यक्षौ २२ नलकूवरमणिग्रीवाख्यौ
श्रियान्वितौ संतौ परमदाढ्यौ मदान्निमित्तान्नारदस्य कुपितस्य शापेन वृक्षतां तरुजन्म प्रापितावर्जुनाख्यौ ददर्श २३ इति
दशमे नवमः ॥९॥ एवं यमलार्जुनयोर्विवरणे राजा कथ्यतामिति यद्विगर्हितं कर्म येन वा देवर्षेर्भगवतः कुपितः तदेतत्कर्मेत
योः शापस्य कारणं हे भगवन् कथ्यतां येन देवर्षेस्तमः इति पाठे येन वा देवर्षेस्तमः क्रोधः इत्यन्वयः १ तस्यानुचरौ मार्दङ्गिनः रुद्रस्यापि दि

कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ २२ पुरा नारदशापेन वृक्षतां प्रापितौ मदा
त् नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ २३ इति श्रीभागवते दशमस्कन्धे नवमोऽध्यायः ९ राजोवाच कथ्यतां भ
गवन्नेतत्तयोः शापस्य कारणं यत्तद्विगर्हितं कर्म येन वा देवर्षेः कुपितो यतः १ श्रीशुक उवाच रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्म
जौ कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ २ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पि
ते वने ३ अन्तः प्रविश्य गङ्गायामम्भोजवनराजिनि चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र
कौरव अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ५ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशङ्किताः वासांसि पर्यधुः शीघ्रं विव
स्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ७ ॥

श्लोकत्रयं स्पष्टार्थं २ ३ गङ्गायामन्तर्मध्ये कथंभूतेऽम्भोजानां कमलानां राजयो यस्मिन् करेणुभिरिभीभिर्गजाविव युवतिभिः सह
चिक्रीडतुः क्रीडां कृतवन्तौ ४ हे कौरव भगवान् देवर्षिर्यदृच्छया तत्रागतो देवौ तौ ददर्श क्षीबाणौ मदोन्मत्तौ समबुध्यत ज्ञातवान्
५ कुत इत्यत्राह तौ दृष्ट्वेति देव्यो विवस्त्राः सत्य एव तं दृष्ट्वा व्रीडिताः शापशङ्किताः वासांसि पर्यधुः गुह्यकौ नैव पर्यधत्तां किं तु नग्नावेवासा
तौ ६ सुरस्य कुबेरस्यात्मजौ दृष्ट्वा मदनाशनरूपानुग्रहार्थं शापं दास्यन् सन् वक्ष्यमाणं प्राह श्रीभगवद्विषयक
प्रेमरूपप्रयोजनाय चेति केचिद्व्याचक्षते ७ ॥ ॥

राम
३७

37

तेन द्व्यङ्गुलोनेन दाम्ना सह अन्यद्दामो तत्संदधे १५ यस्मिन्संहिते [त] तदपि न्यूनमभवदित्येवं यद्यद्दाम संधातुं जग्राह तत्सर्वं न्यूनमेवाभवत्तदा
एवं स्वगृहस्थानि सर्वाणि दामानि संदध्य येन न तु तथापि निरगात् इत्यर्थः तद्दृष्ट्वा सुस्मयन्तीनां गोपीनां मध्ये स्वयं विस्मिताभवत् १७ ततो वि
[२ तस्याः] श्रमप्रस्वेदभरितं गात्रं यस्याः विस्रस्तं कबरस्रजश्च यस्याः स्वमातुः परिश्रमं दृष्ट्वा तत्स्नेहकृपया स्वबन्धने अनुकूलमासीत् १८ तेनैतावता तस्या
तत्र भङ्ग इत्याह एवमिति स्ववशेन स्वतन्त्रेणापि स्ववशत्वमेवाह यस्य वशे अधीने ब्रह्मा ईश्वरसहितमिदं जगद्वर्तते तेन कृष्णेन हरि
णा एवमित्यर्थमंग हे राजन् भक्तवश्यता संदर्शिता सर्वत्र स्वतन्त्रोऽप्यहं भक्तेष्वपरतन्त्र इति दर्शयितुमवध्यत इत्यर्थः तथा चाह श्रीव
त्तांकमिश्राः ऋषेर्न्यायी नमस्तव किल जन्तुर्वैदिकगिरः पराधीनत्वात्तु प्रणतपरतन्त्रे प्रभुमहे इति तथा भागवते पितृवमस्कोयउ

तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः। द्व्यङ्गुलोनमभूत्तेन संदधेऽन्यच्च गोपिका ॥ १५ ॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे। तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्त बन्धनम् ॥ १६ ॥ एवं स्वगेहदामानि यशोदा संदधत्यपि। गोपीनां सुस्मयन्तीनां स्मयन्ती विस्मिताभवत् ॥ १७ ॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः। दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबन्धने ॥ १८ ॥ एवं संदर्शिता ह्यङ्ग हरिणा भृत्यवश्यता। स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥ नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया। प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥ २० ॥ नायं सुखापो भगवान्देहिनां गोपिकासुतः। ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥

[कृष्ण]
तं ऋषेर्भक्तपराधीनस्य स्वतन्त्र इव द्विजेति १९ नतु सत्यं भक्तपरतन्त्र इति गोपीषु न भक्तेति तत्प्रसादं लभ्यमीश्वरस्य तत्राह नेति भ
क्तिप्रयोजनविभाव प्रसादं तं चाह दृष्टान्तं यत्तत् प्रयोतं विरिञ्चस्तत्रपं विमुक्तिदात् कृष्णात् तो गोपी लेभे न तादृशं न स्वाङ्ग
कृष्णस्थलमाश्रयालक्ष्मीरपि लेभिरे भ्रमं सर्वकालं उपासना लिङ्गादिभक्तिः सामोदाः परिविशिष्टेति भावः २० तथा चैवं भक्तानामेवा
यं सुलभो नान्येषामित्याह नायमिति अयं भगवान् गोपिकासुतो यथा दृष्टभक्तिमतामात्मा स्वयमेव प्राप्तः मवालेव तारणे स्त
व स्थानीयः येषां तेषां ज्ञानिनां यथा सुखावाप्यः सुखप्राप्यः न तथैव तरेषां इत्यर्थः सुखोऽयं इति पाठे तुल्ये न वो हुपाकाद्यर्थः
२१ अहो आश्चर्यमेतत् य संसारे बन्ध मक्षप्रापादिमोचनोऽपि भगवान् लौकिकेन दाम्ना बद्ध इत्येतदभिप्रायेणाय

प्रदर्शयत्यर्थेन स्यातीकारार्थे निश्चिनोति असत इति तस्य खलस्य स्यात् आत्मौपम्येनेति दरिद्रः केवलमात्मदृष्टान्तेन भूतानीक्षते
यथा स्वस्याघातादिना दुःखादिकं तथा प्राणिमात्रस्यापीत्यात्मौपम्येन भूतानि पश्यन्न तेभ्यो द्रुह्यतीत्यर्थः १३ एतमेवार्थं सदृष्टान्त
माह यथा कण्टकविद्धाङ्गः लिङ्गैरन्तर्गतसुखदुःखादिव्यञ्जकमुखविकारस्तम्भादिभिर्जीवसाम्यं गतः स्वेतरजीवानां स्वस्य च
तौल्यं मन्वानः तां कण्टकवेधजां व्यथां दुःखं कण्टकवेधं वा नेच्छति तथैवमविद्धकण्टको नेच्छतीति नेत्यर्थः १४ किंच दारिद्र्यं परं तपस्या
त्मकं साधनमपीत्याह दरिद्र इति चतुर्भिः निरहंस्तम्भः निर्गतोऽहंकारस्तम्भश्च यस्य सर्वैर्मदैर्जनविद्याधनकुलादिभिः मुक्तः यदृच्छया स्वप्र
लब्धमन्नरोगादिकृच्छ्रं कायशोषणादिकं प्राप्नोति तत्तस्य महासापरं केवलं तत्स्वेच्छया तपः १५ तदेवाह नित्यमिति क्षुधा क्षामः क्षीणो देहो

असतः श्रीमदांधस्य दारिद्र्यं परमांजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३ यथा कंटकविद्धांगो जंतोर्नेच्छति
तां व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छयाप्नोति तद्धि त
स्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते १६ दरिद्रस्यैव यु
ज्यंते साधवः समदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति १७ साधूनां समचित्तानां मुकुंदचरणैषिणां उपेक्ष्यैः
किं धनस्तंभैरसद्भिरसदाश्रयैः १८॥

यस्य स तस्य तत्र हेतुरन्नकांक्षिणः तत्रापि हेतुर्दरिद्रस्येंद्रियाणि विशुष्यंति स्वयमेव हिंसा
च विनिवर्तते १६ एवंविधस्य दरिद्रस्यैव समदर्शिनः साधवो युज्यंते संगता भवंति ननु परिशुष्केंद्रियस्यापि विषयतृष्णा न पा
पात्कीमदाद्या को विशेष इत्यत्राह सद्भिरिति सद्भिः हेतुभिस्तं तर्षं विषयतृष्णां क्षिणोति क्षपयति ततश्च तर्षकलेवरे ततो नश्य
ति तत्तेस्त तर्षं क्षपयतः आरात्समनंतरं एव विशुध्यति १७ अतः श्रीमत्तेः रहित समदर्शिनां साधूनाम् तदेवोपेक्ष्यैः
स्तंभैस्तंभहेतुभिर्धनैरसद्भिरनर्थमूलमदहेतुत्वेन दुष्टैरत एवासतामाश्रयैस्तैराश्रयो येषां तैरीतिर्वा एवंविधैर्धनस्तंभैः
किं न किंचिदपि प्रयोजनमित्यर्थः यद्वा महापरनाम प्रियनिकमेव प्रियः स्यादित्यत्राह साधूनामिति धनेन स्तंभो येषां ते
रसदाश्रयैः सदाश्रयणरहितैस्तत्समागमरहितैरित्यर्थः अत एवोपेक्ष्यैरसद्भिः किमिति १८॥

38

तदेवाह नैवेति जोष्यान् [illegible] विषयान् जुषतः सेवमानस्य पुंसः श्रीमदात् संपन्मदात् अन्योऽभिजात्यादिरादिशब्देन विद्यादिसंग्रहः
अभिजात्यादेर्जनितो मदः श्रीमदवत् बुद्धिभ्रंशकरः रजोगुणः रजोगुणकार्यकामक्रोधादिवर्धनो न हि किंतु श्रीमद एव नितरां बुद्धि
भ्रंशकरः रजोगुणश्चेत्यर्थः तदाह यत्रेत्यादिना यस्मिन् श्रीमदे सति स्त्री संग द्यूत मधुपानादि न पुरुषार्थसाधनानि भवंति ८ किंच यत्र श्री
मदे सति इमं देहं जरादिरहितं मन्यमानैरत एवाजितेन्द्रियैरत एव निर्दयैः पशवो हन्यंते ९ इमं देहमनेनाभिप्रेतं दर्शयति देवसंज्ञितमपि र
देव स्वर्देवादिसंज्ञितमपि शरीरमंते तदारंभकप्रारब्धावसाने कृम्यादिसंज्ञितमेव दग्धे वा भस्मसंज्ञितं तथा हि भेदितं वा विट्संज्ञितं भस्म यथा
कृमिसंज्ञितं इत्यर्थः तत्कृते एवंविधशरीरसुखार्थं योऽसौ भूतानि द्रुह्यति तथा यतो भूतद्रोहान्निरयो नरकः स भवति तं न किमपि हितं
च जानातीत्यर्थः १० नन्वेतत् किं चित् संज्ञितमस्तु जीवदशायां स्वाधीन तद्देहसुखार्थं यतितव्यमेव तच्च तद्दशायामपि न नियतं हन्त मत्तो यादृश

नारद उ॰ न ह्यन्यो जुषतो जोष्यान् बुद्धिभ्रंशो रजोगुणः श्रीमदादभिजात्यादिर्यत्र स्त्री द्यूतमासवः ८ हन्यंते पशवो यत्र निर्दयैरजितात्मभिः
मन्यमानैरिमं देहमजरामृत्यु नश्वरं ९ देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः १० देहः कि
मन्नदातुः स्वं निषेक्तुर्मातुरेव च मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं को विद्वानात्मसा
त्कृत्वा हंति जंतून् ऋतेऽसतः १२॥

देह इति अन्नदातुः पितेति द्वयोरर्थो नां देहेष्वर्था ते ऽन्नदः अन्नदस्वं तथा जीवदशायामनियमेनान्नदानादी
नां स्वके न भवतीत्यर्थः किमिमनेन लोके प्रसिद्धिः श्रोतस्मार्तवन्तु परिणाम [illegible] त्वाद्युत्पादकेन वर्द्धते तस्य तथा रेतःप्रभवत्वात् निषेक्तुर्गर्भ
धातुः तथा मातुः पितृमातामहस्य च कन्यादाने काले तथा [illegible] पितरं [illegible] पिपालतां च मातृ इति भावः क्रेतुर्दास्यदानेन
स्वीकर्तुः बलिनः बलात्कर्तुः ११ एवं साधारणं जन्मनियमे नियतत्वप्रभवेत्यात्मदेहप्रभवः उत्पत्तिस्तु स्थितेर्वाप्ययो लयश्च यस्य तं इमं
देहमात्मसात् कृत्वा मे तिष्ठत्वात्मसमीपे देहे कर्माविनाश्यकं भूमानं तस्य इति देहाभिमानिनः श्चैवं तु विद्वांस्तु मन्यादेवं तथैव देहमहं
देहं साधारणमव्यक्तप्रभवाप्ययंच विद्वान् ज्ञानं अहंत्वं साधारणेदेहसमाभिमानिन एक एवात्मा विना को विद्वानात्मसात्कृत्वा सर्वे
ने मत्वा जंतून् हन्यात् देहं विद्वांस्तु पुनर्देहाभिमानेन न हन्यात् साधारणत्वमविद्वांस्तु देहाभिमानेन हन्यादित्यर्थः ऋतेऽसतो विद्वान्

भा॰ टी॰ द॰ पू॰ ८९

द॰ श्री भा॰ टी॰ द॰ पू॰ अ॰ १०

भा॰द॰
पु॰टी॰
३९
पत्रे ४

स्यन्वेच नीस्यनुसरतोस्यन्वगुलत्खलं निकर्षयता दामोदरेणाहेतुना तरसा बलाडुत्कलितं धुत्पाटितावंघ्रिवंधौ मूलभागौ ययोः पर
स्पश्रोरूस्यस्य विक्रमितेनातिवर्पाः कपोयेषु तेस्कथा दयोपयो ॥ तत्रश्चंडः शब्दो याभ्यां तथाभूतौ निष्पेततुः २७ तत्र तदर्जुनयोर्द्वयो
र्वीपरमया श्रिया शोभया ककुभो दिशः स्फुरंतोप्रकाशयंतो कुलयोर्द्वयोस्थितौ सिद्धौ भामिनीमान् वह्निरुद्धलितवृद्धस्थितौ
सिद्धौ उपेत्य हस्य समीपमेत्य कुजयोर्जातवेदा इव सिद्धावुपेत्य उत्थितेतिवाऽखिललोकानाथं ईश्वरं श्रीकृष्णं शिरसाप्रणम्य
बद्धांजलियुग्मौ विगतरजः रजोगुणकार्यययोस्तौ सात्विकौ इत्यर्थः निर्मलो वाचो नलकूबरमणिग्रीवौ इदं वक्ष्यमाणमूचतुः
न्नोपवालमपवां देवोकिमितिप्रणतौ इत्यत्राहतुः हेकृष्ण कृष्णमहायोगिन्निचित्यप्रभावे केवलं गोपबालकस्त्वमपितु परमपुरु

बालेन निकृषिपतान्यगलत्खलं तद्धा मोदरेण तरसोत्कलितं घ्रिवंधौ निष्पेततुः परमविक्रमितातिवेपस्कंधप्रवालवि
टपोद्भूतचंडशब्दौ २७ तत्र श्रिया परमया ककुभः स्फुरंतो सिद्धावुपेत्य कुजयोरिव जातवेदाः कृष्णं प्रणम्य शिरसाऽ
खिललोकनाथं बद्धांजली विरजसौ विदधतुः स्म २८ नलकूबरमणिग्रीवावूचतुः कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पु
रुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः २९ त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः ॥

षः कोसौ पः आद्यो जगत्कारणभूतः न तु कार्यकारणयोः आद्यशः सालद्वारणे दृष्टान्तः कथं चिदचिदात्मकस्य जगतस्त्वद्वि
त्वादेः कारणमित्यत्राहतुः व्यक्तं नामरूपाभ्यामव्यक्तं नामरूपाभ्यामव्यक्तं चेदं विश्वं ब्रह्मणः सर्वशक्तित्वादिकल्याणगुणैर्बृहतस्त
वरूपं शरीरं विदुर्वेदांतान्मनतीत्यर्थः वेदांताश्चयस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य
धाः सूक्ष्मचिदचिद्धरीरकत्वेन कारणावस्थः स्थूलचिदचिद्धरीरकत्वेन कार्यावस्थश्च त्वमेवेति भावः एवं केवलमुपादानकारणमे
वापितु निमित्तकारणमपीत्यभिप्रायेण तदुपपत्तियुक्तमाहतुः त्वमेक इति एकशब्देनाधिष्ठातृत्वमाह सर्वभूतानां
निदेहात्मेंद्रियाणां ईश्वरः नियंता तत्रासवः प्राणः आत्मा मनः सर्वान्तिदेवमतव्याप्तिरूपेण अयं त इति भूतानि देहस्तेषां
देहादिसंबंधोपादानोपपत्तिसार्वज्ञ्यादिगुणयोगेनांतः प्रविश्य नियंतेत्यर्थः एवं विचित्रजगत्कारणत्वं चोक्त्वा अथ तदुभयनिवं

न१

राम
३९

तस्माच्छ्रीमदान्धत्वेन दुःखार्थं पर्यवसायित्वात् तत्पापमाध्व्या वारुण्या मत्तयोः श्रीमदेनान्धयोरजितेन्द्रिययोः स्त्रीवश्ययोर्युवयोस्तमोमदं महता
नरकं तमः दण्डं हरिष्याम्यपनयामि १९ यद्यस्माल्लोकपालस्य पुत्रौ भूत्वापि तमोऽभिभूतौ नग्नतां स्वात्मनो विवाससं नग्नमात्मानं न विजानीतः २० अतः
स्थावरतामर्हतः विवाससमात्मानमजानतोर्वस्त्राच्छादनरहितत्वजन्मप्रयुक्तमिति भावः इत्थं शापमुक्त्वा तिस्थावरतामित्यादि ... एव
मेव सर्वदा स्थावरता तौ यथा न स्यात्तथा ईक्षतः यद्वा किमर्थमेवं निरपराधेऽपि नौ शापं प्रयच्छसीत्याह तत्र ... जन्मनः प्राप्य यास्यातां यथा
दृष्टौ श्रीमदान्धौ स्यातां एवं तज्जन्मनः पश्चात् ... इत्यर्थः प्रकारान्तरेण पुनरुक्तमिति तत्रापि स्थावरत्वेऽपि

तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदान्धयोः तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः १९ यदिमौ लोकपालस्य पुत्रौ भूत्वा
स२ तमःप्लुतौ न विवाससमात्मानं विजानीतः सुदुर्मदौ २० अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रा
पि मदनुग्रहात् २१ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यथः २२ श्रीशुक उवाच
एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमम् नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ २३ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः
जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ २४ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्म
हात्मना २५ इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २६ ॥

मत्प्रसादेन हेतुना स्मृतिः पूर्वजन्मस्मृतिः स्यात् तथा मदनुग्रहाद्धेतोर्दिव्यवर्षशते वासुदेवस्य वसुदेवसूनोर्भगवतः सान्नि
ध्यं लब्ध्वा वृत्ते तत्सत्वे सतीते सति पुनः स्वर्लोकतां देवत्वं लब्ध्वा वासुदेवे भक्तिर्ययोस्तौ तथाभूतौ भविष्यथः २२ स देवर्षिरित्य
ुक्त्वा बदर्याश्रमं गतः नलकूवरमणिग्रीवौ तु सहजातौ अर्जुनौ वृक्षौ बभूवतुः २३ भागवतमुख्यस्य नारदस्य तद्वचः सत्यं कर्तुं हरिः
श्रीकृष्णः शनकैरुलूखलमाकर्षन् यत्र यमलार्जुनौ स्थितौ तत्र जगाम २४ तद्वचः सत्यं कर्तुमित्येतदेव प्रपञ्चयति द्वाभ्यां देवर्षि
रिति यद्यतो देवर्षिर्नारदः मम प्रियतमः तत्तस्मात् महात्मना यन्नारदेन धनदात्मजौ उद्दिश्य यद्गीतं तत्तथैव साधयिष्यामि करिष्या
मि २५ इत्यभिप्रायेणार्जुनयोरन्तरेण मध्ये ययौ आत्मनः स्वस्य निर्वेशमात्रेण उलूखलं तिर्यक्पतितमभ्
ल

लथ्यार

भा॰द॰ वासुदेवायेत्यनेनाभिप्रेतं विवृण्वन्नाह तत्त्वावतारयाथात्म्यमाह हेतुः यस्येति शरीरिणामत्वादिप्राणिनां [illegible] शरीरिणः कर्मकृतशरीरे
१० टी॰ रहितस्य यस्य ते अवताराः सर्वेनिःसमाभ्यधिकैः कर्महतदेहिभ्यो संगतैर्संभाविते स्तैस्तैस्तद्ववलक्षणप्रतिनियतैर्वीर्यैर्ज्ञायंते कर्म
४० कृतदेहिभ्यो विलक्षणत्वेनज्ञायंत इत्यर्थः ३४ सभवानिति सर्वस्य साधुलोकस्याशिषां समीहितस्वर्गापवर्गादिपुरुषार्थानां भवा
बा॰४ योत्पादनाय विभवाय तदुत्तरापि वृद्धये च पतितस्तासां पालकश्च भवितुमित्यर्थः अंशभागेन बलरामेण सह यद्वा सङ्कल्पस्यज्ञानेन
दोत्तं॰४ नतु कर्मणेति भावः सांप्रतमधुनाऽवतीर्णः यद्वा सांप्रतमिति युज्यत इत्येतदर्थको निपातः पतिर्भवानाशिषां पतिः प्रभुर्दाता
सोऽमवार्थविभवार्थं चांशेनावतीर्ण इतियुक्तमेवेत्यर्थः ३५ मङ्गलावताराः साधारणानामनन्यसंपाद्यानो नमस्कुरुतः विश्वमंग
लावह त्वमम्मंगलतमजन्मविमोचने नापरोऽस्त्येवं प्रदर्शितमितितथा संबोधनाभिप्रायः स्वयमंगलस्यान्येषां मंगलावहत्व

40

यस्यावताराज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ सभवान्सर्वलोकस्य भवाय विभवाय
च अवतीर्णोऽशभागेन सांप्रतं पतिराशिषां ३५ नमः परमकल्याण नमः परममंगल वासुदेवाय शांताय यदूनां पतये न
मः ३६ अनुजानीहि नो भूमन्सर्वानुचरकिंकरे दर्शनं नो भगवतऋषेरासीदनुग्रहात ३७ वाण्या गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनां ३८॥

सद

मनुपपन्नमितितदपि सिद्धमेवेत्यभिप्रायेणपरमकल्याणेति संबोधनं यं लायोऽभिवृद्धिकरस्तिन्याशायापिपाशासोऽक्रमो जनराम्नयवः
षड्भंषः ३६ इत्थं स्तुत्यात्मनोः कृतार्थत्वाय तद्गृहसपर्यं तदस्यं प्रार्थयमानौ विज्ञापयतः अनुजानीहीति हे भूमन्निरवधिकानंदकनिलवा
न्चेरान्किंकरौ [illegible] करोम्यथामवावसरंप्रार्थ्येत्यर्थः किमिदं प्रार्थये तेनोच्यते ‘नत्वे स्तवाचरस्य
नुग्रहादेव भगवतः पुरुषार्थनिधेस्तव दर्शनं नो आवयोरासीन्महाफलत्वात्त्वदासदास्यमेवानुग्रहाणेतिभावः ३७ किंचनवयोर्वा
ण्यादयः त्वद्गुणानुकथनादिप्रवणाः यथास्युस्तथानुग्रहाणेत्याचतुःवाणीतिश्रवणौ श्रोत्रे कर्मसु इज्यात्मपरिषेचतव पादयोः स्मृत्यांस्मृ
रणेनोऽस्तु निवासो जगद्यस्य तत्तस्य संबंधि जगत्प्रणामे निवासत्वार्थः परनिपातो वा तव प्रणामे शिरः भवत्तनूनां त्वन्मूर्तीनां सतां च दर्शने दृष्टि

राम
४०

यथा त्वमेक इति। श्लोकत्रयं त्वमेव काल इति लयकारणं त्वं कालो मृत्युः त्वं महानित्यादिना सामानाधिकरण्यमुक्तम्
ते इति विवेकः हे भगवन्नत्र पक्षे न कारणत्वप्रयुक्तदोषपरिहारः भगवल्लिप्सेनैवावतारदशायामपि षाड्गुण्यप्रवर्त्तिका वि
भूति पक्षेऽन्तर्देवताविशेषत्वं च ३० महान्महत्तत्कारणत्वात् स्वेच्छाशरीरं कृत्वा तत्सामानाधिकरण्यं एवमन्यस्मादपि द्रष्टव्यं न के
वलं महत्त्वेनापि तु तत्कारणभूता रज आदिगुणत्रयात्मिका सूक्ष्मा नामरूपविभागानर्हापि प्रकृतिरपि त्वमेव तथा पुरुषो
जीवात्मा त्वमेव कुतः भूतः अध्यक्षः देहप्रभृति जीवपर्यन्तानामपि ज्ञाता क्षेत्राणि शरीराणि क्षिपयन्ति इन्द्रियसहितानि तानि वेत्तीति
तथा युगपत्सर्वेन्द्रियवृत्तिविदित्यर्थः ३१ ननु तेन प्रकारेण विदुरित्यनेनैव विधिं तात्केवलं वेदान्ता एव विद्युना त्विन्द्रियाणि प्रसिद्धेऽतत
देवविशदयन्तो उपपादयन्तः गृह्यमाणैरिति यथा श्रोत्रादिभिर्गृह्यमाणैः शब्दादयो न श्रोत्रादीन् गृह्णन्ति तथा त्वया गृह्यमाणैः

त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३० त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्त्वतमोमयी त्वमेव पुरुषोऽध्यक्षः सर्वक्षे
त्रविकारवित् ३१ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३२ तस्मै तु
भ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३३॥

विकारैस्त्वं गृह्यसीति भावः ननु त्वयाप्यस्य सम्यक्कारणत्वसम्भवात् सोपाधित्वादुपपत्तिः कारणत्वादुपपत्तिरित्यत्राहतुः को न्वि
ति गुणैः कार्यैरिन्द्रियैः संवृतः आवृतः संहित इति यावत् स कोऽत्र प्राक् सिद्धं गुणेभ्यः प्रागेव तत्कारणतया तत्प्रकाशकतया
च सिद्धं त्वामिदं ज्ञातुं विषयीकर्तुमर्हति गुणसंवृतः को न्वर्हति त्वमनेन योगेन विष्णुरूपमनासक्त्या तु मर्हतीति स त्विदं तु मनेनाप्युपा
स्यत्वं परिहृतं यथा नन्वतः जीवोऽज्ञात्वापि तस्मादाहतुः को न्विति ३२ एवमुक्तविधस्य भगवतः सर्वेश्वरत्वं जीवादिज्ञेयत्वं च
संदधतौ नमस्कुरुतः तस्मा इति तस्मै तस्माद्विशिष्टाय भगवते षाड्गुण्यपूर्णाय धर्मपरित्राणार्थं वसुदे
वात्मजत्वेनावतीर्णाय सर्वकर्त्रे आत्मद्योतगुणैः स्वप्रकाशभावैर्गुणैश्छन्नमहिम्ने ब्रह्मणे वासुदेवाय महिम्ने ब्रह्मा
त्मज्योतिर्गुणैश्छन्नमहिम्ने इति पाठे आत्मज्योतिः स्वप्रकाशैर्गुणैश्छन्नमहिमा वेत्यर्थः स्वरूपेण तु तेषां निरतिशय

भा० द०
पु० टी०
४१

एवमन्यानां तेषां मध्ये केचित्केवलतार्किका इदं न घटते इति वदंतः तद्बालके भीषिते व्रजगृहे न विश्वसितवंतः अन्ये तु बालस्य बालकृत्ये केन तद्बौ
तस्यारत्नोसंख्येयं संशयमुक्तचेतसो येषां तथावभवुः ५ अथ भगवन्मायामोहितस्य नंदस्याचरितमाह उलूखलमिति मृदसहृदनं
यस्य सन्नंदो विलोकयन्दामबंधादमोचयत् ६ अत्र कश्चिद्बालके क्रीडासिद्धिमोफलो नीतिश्च स्वमानसमच्युतः फलार्थी धान्यमा
दाय ययौ सर्वफलप्रदः फलविक्रयिणी तस्यच्युतधान्यकरद्वयं फलैरत्नस्य इत्तो फलभांडमभरदिति चेति श्लोकद्वय मध्ये कृष्णस्य ते न
त्रैलोक्यस्य फलानि विक्रीणीते इति बंधनविमोचनवतानंदेनोक्तो अतः स्वयं स्वर्गापवर्गफलदोपि केवलं बालइव फलार्थी सन्मा
तरं दृष्ट्वा धान्यमंजलिनादाय ययौ तथा फलविक्रयिणी स्त्री तस्याच्युतस्य मुग्धं तथा यस्मात्स करयोर्द्वयं फलैरत्नस्य फलविक्रयिणी तथा

न ते तदिदं जगद्गृहे न घटते इति तस्यैव बालस्योत्पाटनं तत्र वृत्तं केचित्संदिग्धचेतसः ५ उलूखलं विकर्षन्तं दाम्ना बद्धं स्वमात्म
जं विलोक्य नंदः पृदसहृदनो विस्मितोऽभवत् ६ गोपीभिः स्तोभितो नृत्यन्भगवान्बालवत्क्वचित् उद्गायति क्वचिन्मुग्धस्तद्वशो
दारुयंत्रवत् ७ बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ८ दर्शयंस्तद्वि
दां लोके आत्मनो भृत्यवश्यतां व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ९ सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् जन्मद्व
मघभवतो विप्रेभ्यो देहि गाः शुचिः १०॥

यत्फलभांडं तद्रत्नैरपूरि तमप्यर्थं करद्वयच्युतेन धान्येन रत्नात्मकता माप्तं तेन
फलभांडं पूरितमभूदित्यर्थः अथ भगवतः कांश्चिद्बाल्योचितप्रकारान्दर्शयति गोपीभिरिति क्वचित्स्तोभितः उपच्छंदनेनोद्यो
प्रापितः करतलादिना प्रोत्साहितो वा उद्गायति सति गोपीजन इति शेषः दारुयंत्रवत् कृत्रिमपांचालिकावत्तद्वशः गोपीवश्यः
पृथुइयानतुल्य नत्यपालितपाठे तद्वशः स्वकर्तृकत्वमुद्गायति ७ क्वचिदाज्ञप्तः आनयेति नियुक्तः पीठादिकमानेतुमसमर्थः इव वि
भर्ति उवाह पीठे विष्टरं उन्मानं प्रस्थादि पीठं भाजनं पादुकमिति पाठे भाजनं कांस्यादिपात्रं तथा बाहुक्षेपं भुजचालनं कुरुते वि
कुर्वन् गोपीनां प्रीतिमावहन् ८ तद्विदां भगवत्प्रेमवतां नारदादीनां भक्तवश्यतां च दर्शयन् एवं बालचेष्टितैः व्रजस्य व्रजस्थजनस्य हर्ष
मुवाहावहत् ९ अथ तन्मायया मोहितयोर्यशोदारोहिण्योः कांश्चिदाचरितान्याह सरिदिति द्वाभ्यां तौ भग्नार्जुनौ येन तं सरि

41

राम
४१

इत्यमित्यादिश्लोकाः स्पष्टार्थाः ३९ वाणीति हस्तौ जुषतो ज्योत्यानि त्यादिभिः श्रीमदांधयोर्देवयोः श्रीविभ्रंशरूपे उपद्रहः कृत इति यदेतत्सुरैव
मममया ज्ञातं ४० युक्तमेवेतदित्याह साधूनामिति मत्कृता सनां मय्यर्पितचित्तानां समचित्तानां साधूनां दर्शनेमंतो यस्य सदर्शनाबंधिकः
उसोबंधोभवेत्तथा सवितुः दर्शनेनेत्रोऽरिवबंधः तमोरूपस्तद्वत् ४१ हे नलकूबर युवां तत्स्मात्सादनं सदनं त्वति केतं प्राप्तितिगछतं
कथं मत्तावद्भवमेव परो माय स्मात्सयुवयोः स्तोन विद्यते भवः संसारो यस्मात्सो भवः मयि भावो भक्तिश्चयस्य विशेषः श्रीसात्मकः वां युवयोः
संजात एव ४२ इत्युक्तौ तौ वल्लमूलूखलं परिक्रम्य पुनःपुनः प्रणम्य चामंत्र्य उत्तरां दिशं जग्मतुः ४३ इति दशमे

श्रीशुक उ० इति संकीर्तितस्ताभ्यां भगवान्देवकीसुतः दाम्नाचोलूखलेबद्धः प्रहसन्नाह गुह्यकौ ३९ श्रीभगवानुवाच ज्ञातं मम पुरै
वैतदृषिणा करुणात्मना यछ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ४० साधूनां समचित्तानां सुतरां मत्कृतात्मनां दर्शनान्नो
भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ४१ तद्गच्छतं मत्परमौ नलकूबर सादनं संजातो मयि भावो वामीप्सितः परमोऽभवः ४२
श्रीशुक उ० इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां ४३ इति श्रीमद्भागवते महापुराणे
दशमस्कंधे दशमोध्यायः १० श्रीशुक उ० गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः १
भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं २ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकं

८१ कस्येदं कुत आश्चर्यमुत्पात इति कातराः ३ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलं विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ४

दशमे ११ गोपा इति पततोर्द्रुमयोः रवं श्रुत्वा निर्घातस्य वज्रपातस्य भयं शंकिताः इत्येवं भयेन वितर्कयंतो नंदादयो गोपास्तत्राजग्मुः
१ तत्र लक्ष्यं प्रत्यक्षं पतनकारणं अविज्ञाय भ्रमं प्राप्ताः २ कस्येदं कार्यमिदं आश्चर्यं कुत उत्पात इति भयेन कातराभी
ताः संतो वभ्रमुरिति पूर्वेणान्वयः कस्येति कर्तृसंदेहः कुत इति निमित्तसंदेहः उत्पात इति निश्चयः ३ एवं वभ्रममाणान्प्रति तत्र स्था बाला
ऊचुः किमिति तिर्यग्गतमुलूखलं विकर्षता कृष्णेन मध्यगेन बालेनेदं कर्मकृतं न केवलमेतावदन्यदपि किंचिद्दृष्टमि
त्याहुः वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावप्यचक्ष्म दृष्टवंतो वयं इत्यर्थः ४ ॥

भा०द०
पू०टी०
४२

42

अथ मेवाद उत्थातव्यमिति सार्द्धेन। तच्छ्रुत्वेत्यत्र पालनेन गोकुलस्य हितमिच्छद्भिरस्माभिरितो व्रजादुत्थातव्यं निर्गन्तव्यं व्रजानामन्यत्र या
त्रां नः नाशहेतवो बहवः उत्पाताः आयान्ति आयाति पश्यति २१ आपतितां नास्य परो दृष्टं दृष्टा एवेत्याह मुक्त इति कथं चित् दैवं शक्त्या तथा भग
वदनुग्रहादेतः प्राक् दैत्यपि बालस्योपरि नापतत् २२ तथा चक्रवातेन वो नोऽपायः विपदं विदारस्थानं वियदाकाशं प्रापय्य बाललोदैत्येन
नीतः वियदाकाशं ततो विपदमापदं चानीत इति वा सुरेश्वरैः सदृष्टदैवतैः परित्रातः २३ कुतश्चयः द्रुमयोरर्जुनयोः पततोः
तरं मध्यं प्राप्य असौ बालकोऽन्यतमो वा कश्चिन्न म्रियेत तदप्यच्युतेनाऽस्मद्दैवतेनैव रक्षणमासीत् २४ यावदुत्पातप्रभवो रिष्टम्

उपनन्द उवाच उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः। आयान्त्यत्र महोत्पाता बालानां नाशहेतवः॥ २१ मुक्तः कथंचिद्रा
क्षस्या बालघ्न्या बालको ह्यसौ। हरेरनुग्रहान्नूनमनश्चोपरि नापतत्॥ २२ चक्रवातेन नीतोऽयं दैत्येन विपदं वियत्। शिला
यां पतितस्तत्र परित्रातः सुरेश्वरैः॥ २३ यन्न म्रियेत द्रुमयोरन्तरं प्राप्य बालकः। असावन्यतमो वापि तदप्यच्युतरक्षणम्॥ २४
यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः। तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः॥ २५ वनं वृन्दावनं नाम पशव्यं नवका
ननम्। गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम्॥ २६ तत्तत्राद्यैव यास्यामः शकटान् युङ्क्त मा चिरम्। गोधनान्यग्रतो यान्तु भवतां
यदि रोचते॥ २७ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः। व्रजान् स्वान् स्वान् समायुज्य ययू रूढपरिच्छदाः॥ २८
वृद्धान् बालान् स्त्रियो राजन् सर्वोपकरणानि च। अनःस्वारोप्य गोपाला यत्ता आत्तशरासनाः॥ २९ गोधनानि पुरस्कृत्य शृङ्गाण्यापूर्य सर्वतः

पीडनं नाभिभवेत् न पीडयेत् तावद्देवबालानादाय अन्यत्र यास्यामः २५ यास्याम इत्यत्राह वनमिति पशव्यं पशुभ्यो हितं नवानि का
ननानि यस्मिन् गोपानां गोपीनां सेव्यं वासयोग्यं पुण्याः पावना [illegible] यस्मिन् २६ शकटान् युङ्क्त [illegible] विचारयतो यान्तु यदि भवतां
भवतां रोचते तर्हि उत्थातव्यमिति शेषः तर्हि गोधनानि यान्तु विलंबो मास्तु २७ तदुपनन्दवचः श्रुत्वा एकधियः विप्रतिपत्तिरहिताः व्रजान् स्वान्स्वान्समानीय रू
ढाः आरूढा न्यारोपिताः परिच्छदा उपकरणानि येषां ते ययुः २८ तदेव प्रपंचयति वृद्धानिति हे राजन् वृद्धादीन् शकटेष्वारोप्य सन्नद्धाः आत्तानि गृहीतानि श
रासनानि धनूंषि यैस्तथाभूताः गोपाः २९ गृहीत्वा तत्र शृङ्गाणि विषाणानि आपूर्य समन्ततः तूर्यघोषेण महता सह

रा०
४२

यदा कृतावपि क्रीडासंगेन नन्दगोष्ठे ततो तत्र वत्सला रोहिणी यशोदां प्रेषयामास ११ सा रोहिण्या प्रेषिता यशोदा अतिवेलं भोजनादिवे-
लामतिक्रान्तं बालकैः सह क्रीडन्तं रामं सुतं श्रीकृष्णं बलोक्य स्नेहेन स्नुतस्तनी प्रस्थाप्य तत्याज तत्राजुहाव १२ आकारणमकारमेवदर्शय-
ति कृष्ण इति सा हि पितुर्गेहं [illegible] १३ हे दाशार्ह व्रजाधिपो नन्दो भोक्ष्यमाणो [illegible] प्रतीक्षते [illegible] प्रतीक्षमाणो [illegible] १४ आवयोः
रोहिण्याः स्वस्याश्च प्रियं कुरु हे बालकाः रामकृष्णानुचराः स्वगृहान् गच्छत [illegible] भवतो जन्मर्क्षं
जन्मनक्षत्रम् अतः शुचिः स्नातो विप्रेभ्यो गाः देहि १५ सा भिः स्नापितान् स्वलंकृतान् [illegible] वयस्यान् [illegible] समानवयस्का [illegible]

गोपेयातां यदा कृतौ क्रीडासंगेन वत्सकौ यशोदां प्रेषयामास रोहिणीं पुत्रवत्सला ११ क्रीडन्तं सा सुतं बालैरतिवेलं सहाग्रजं
यशोदाजोहवीत् कृष्णं पुत्रस्नेहस्नुतस्तनी १२ यशोदोवाच कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब अलं विहारैः क्षुत्क्षान्तः
क्रीडाश्रान्तोऽसि पुत्रक १३ हे रामागच्छ ताताशु सानुजः कुलनन्दन प्रातरेव कृताहारस्तद्भवान् भोक्तुमर्हति प्रतीक्षते त्वां दा-
शार्ह भोक्ष्यमाणो व्रजाधिपः १४ एह्यावयोः प्रियं धेहि स्वगृहान् यात बालकाः जन्मर्क्षं तेऽद्य भवतो विप्रेभ्यो देहि गाः शुचिः १५
पश्य पश्य वयस्यांस्ते मातृमृष्टान् स्वलंकृतान् त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः १६ श्रीशुक उवाच इत्थं यशोदा तमशेषशे-
खरं मत्वा सुतं स्नेहनिबद्धधीर्नृप हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयं १७ इत्यानीय [illegible] यशोदा मं-
गलार्हणैः अभ्यर्च्य भोजयित्वा तु [illegible] १८ गोपवृद्धा महोत्पातान् अनुभूय बृहद्वने नंदादयः समागम्य व्रजका-
र्यममंत्रयन् १९ तत्रोपनंदनामाह गोपो ज्ञानवयोऽधिकः देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः २० ॥

[illegible] स्वलंकृतः [illegible] विहरस्वेति १६ [illegible] यशोदा [illegible] पितुर्गेहं [illegible] स्नेहेन [illegible]
[illegible] कृतवती [illegible] १७ इत्यानीय
[illegible] १८ एवं [illegible] व्रजकार्यं [illegible]
[illegible] १९ तत्रोपनंदो नामक [illegible]

भा. द.
श. टी
४२

अपरपादाभ्यां सहलांगूलं प्रगृह्य भ्रामयित्वा ततः गतजीवितं जीवनं यस्य तं कपित्थस्याग्रे प्राहिणोत् उदक्षिपत् ४२ महाकायत्वे बहुभरत्वाद्
महाकेः पातमात्रैः कपित्थांचैः फलैः सह स्वाभ्यविपपात पतितं पतितमवलोक्य साधुसाध्विति परस्परं ४३ अथ वत्सासुरवधोत्सवं चारितमाह ताविति
सादिना सर्वलोकैकपालकावपि वत्सपालौ भूत्वा एकदा प्रातर्भोक्तव्यपरिचितान्नसहितौ गवां वत्सांश्चारयन्तौ विचेरतुः ४४ सर्वे गोपबालाः स्वं स्वं वत्ससमूहं पाययिष्यन्तः जलाशयस्याभ्याससमीपं गत्वा वत्सान् जलं पाययित्वा स्वयमपि पपुः पिबन्ति ४६ तत्रावस्थितं स
तं जंतुं ददृशुस्तत्रसुर्बिभीयुः श्च वज्रेण निर्भिन्नं ... गिरेः शृंगमिव स्थितं ४७ स वै सत्वः बकाख्यः महानसुरो बकरूपधारी सहसा

ग्रसीत्वापरपादाभ्यां सहलांगूलमथुलः भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितं ४२ स कपित्थैर्महाकायः पात्यमानैः पपात ह तं वीक्ष्य विस्मिता
बालाः शशंसुः साधु साध्विति देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ४३ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ सप्रातराशौ गोवत्सांश्चार
यंतौ विचेरतुः ४४ स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलं ४६ ते तत्र ददृशुर्बाला महासत्वमवस्थि
तं तत्रसुर्वज्रनिर्भिन्नगिरेः शृंगमिव च्युतं ४७ स वै बको नाम महानसुरो बकरूपधृक् आगत्य सहसा कृष्णं तीक्ष्णतुंडोग्रसद्बली ४८
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः बभूवुरिंद्रियाणीव विना प्राणं विचेतसः ४९ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जग
द्गुरोः चच्छर्द सद्योऽतिरुषाक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ५० तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः पश्य
त्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ५१॥

43

कस्मिन्काविमर्शे योर्घो तकमप्ययं तौ तुंडयोस्तुंडे निगृह्य स्वचंचुर्वेली श्रीकृष्णमग्र
सीत ४८ प्राणं विनेन्द्रियाणीव रामादयोऽपि विचेतसः आचेतनप्राया बभूवुः रामादय इत्यनुक्रमेण सविज्ञानो बहुव्रीहिः ननु रामस्तदर्थः ४९
जगद्गुरोः ब्रह्मणः पितरमपि लीलया गोपालसूनुमग्निवत्तालुमूलं प्रदहन्तं श्रीकृष्णं स बकः एव च छर्दिः उद्गिरत् ततः अक्षतं तं कृष्णं तुंडेन हंतुं
पुनरभ्यपद्यत अभिमुखमगच्छत् ५० सतां पतिः कृष्णः आपतंतं कंससखं बकं निगृह्य ... कारेण नि गोपबालेषु पश्यत्सु सत्सु
दोर्भ्यां लीलया तुंडयोर्बकं ... दारितवान्वयः कथं वीरणवत् ... ततो विशेषवत् ... स्वभक्ता
नां गतिः स्वप्राप्त्युपायः दिवौकसां मुदमावहतीति तस्यानपेन देवानां प्रमोदमपश्यामास्यर्थः ५२ ॥

ग्रं४

राम
४२

ग्रंथ च्वोर्दीहारविद्दार २

कृष्णलीला जगुः प्रीता निष्कण्ठ्यः सुवाससः ३२ ... कुचगतैः कुंकुमैः कान्तिर्यासां ताः कुचेषु कुंकुमकान्तिर्यासां ता वा निष्काः पदकानि ... इति पाठे मधुरस्वनाः प्रीताः कृष्णस्य लीला जगुः ३२ एकं शकटमास्थिते तत्र आरूढे स्थिते कृष्णरामाभ्यां सह रेजतुः ताभ्यां सह एकं शकटमास्थिते रेजतुः इति वान्वयः कथं भूते तस्य श्रीकृष्णस्य कथायाः श्रवणे उत्सुके यथोक्ते ३३ अर्धचन्द्रवदर्धचन्द्रतुल्ये सन्निवेशं व्रजावासं गोकुलस्थानं चक्रुः ३४ ... सञ्चरतोः स्वच्छित्तयोर्वर्तिशेषः ३५ कलवाक्यैः मधुराणि वाक्यानि ययोस्तौ रामकृष्णौ बालचेष्टितैर्व्रजौकसां प्रीतिं यच्छन्तौ कालेन कौमारं प्राप्ते वयसि वत्सपालौ बभूवतुः अथ कौमारलीलां वर्णयति अविदूरे इत्यादिना यावत्समाप्तिं व्रजभुवः दूरे वनस्य भूमेरविदूरे समीपे नानाविधाः क्रीडापरिच्छदाः क्रीडोपकरणानि ययोस्तौ वत्सांश्चारयामासतुः ३७ तदेव प्रपञ्चयति वादयत इति

गोप्यो हस्ता ... कुचकुंकुमकान्तयः कृष्णलीला जगुः प्रीता निष्कण्ठ्यः सुवाससः ३२ तथा यशोदारोहिण्यावेकं शकटमास्थिते रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ३३ वृन्दावनं सम्प्रविश्य सर्वकालसुखावहं तत्र चक्रुर्व्रजावासं शकटैरर्धचन्द्रवत् ३४ वृन्दावनं गोवर्धनं यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ३५ एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ३६ अविदूरे व्रजभुवः सह गोपालदारकैः चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ३७ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् क्वचित्पादैः किङ्किणीभिः क्वचित्कृत्रिमगोवृषैः ३८ वृषायमाणौ नर्दन्तौ युयुधाते परस्परं अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ३९ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ४० तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः दर्शयन्बलदेवाय शनैर्मु

ग्ध

वलतो द्विवचनं क्षेपणैः बिल्वामलकादिभिः ... क्वचित्पादैः किंकिणीयुक्तैः पदैः क्वचित् कृत्रिमगोवृषैः जातम्भा ... विसंचरन्तिः कृष्णके वलादिना ... पुत्रैः ... ३८ स्वयमपि वृषायमाणौ ... तथाहि ... प्राकृतौ ... यथा बालौ तथा चेरतुः ३९ अथ वधार्हं चेष्टितमनुवर्णयति कदाचिदित्यादिना स्वकैर्वयस्यैः सह कृष्णबलयोर्वत्सांश्चारयतोः सतोः

भा०टू०
१०ती०
४४

इतस्त्रास्या ध्यायत्वं शक्ति समिति निर्मो साधे रूपे स्थित मथापि प्राय शो व्यवदीय माएत्वा त्के स्थिया व्यात त्वाच्चया व्यायते तत्राद्ये नागुरवथास्मकं चारितमनुवर्णयते क्वचिदिति क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान्प्रबोधयन्वनएव प्रथमभोजनाय मनः कुर्वन् वत्साः पुरःसराः यस्मात्तथाभूतः चारुणा विषाणेनांवेणोश्च शृङ्गाद्विनिर्जगाम १ तथा शोभना शिक्यादयो येषां ते स्निग्धाः परस्परानुरागयुक्ताः पृथुकाः बालकाः सहस्रशस्तेनैव कृष्णेनैव सहस्रसहस्रात्ॐपरि सङ्ख्ययान्वितान्भूरि स्विन्नान्स्वस्व वत्सान्पुरस्कृत्य मुदा विनिर्ययुः २ ततः स्वस्ववत्सान सङ्ख्यातैः कृष्णस्यवत्सैः सहसंघीकृत्य चारयन्तः तत्रतत्रार्भकलीलैः भिर्वि

श्रीशुक उवाच क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान् प्रबोधयञ्छृङ्गरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः १ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः स्वान्स्वान्सहस्रोपरिसङ्ख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा २ कृष्णवत्सैरसङ्ख्यातैर्यूथीकृत्य स्ववत्सकान् चारयन्तोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ३ फलप्रवालस्तवकसुमनःपिच्छधातुभिः काचगुञ्जामणिस्वर्णभूषिता अप्यभूषयन् ४ मुष्णन्तोऽन्योन्यशिक्यादीन्ज्ञातानाराच्च चिक्षिपुः तत्रत्याश्च पुनर्दूराद्धसन्तश्च पुनर्ददुः ५ यदि दूरं गतः कृष्णो वनशोभेक्षणाय तं अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ६ केचिद्वेणून्वादयन्तो ध्मान्तः शृङ्गाणि केचन केचिद्भृङ्गैः प्रगायन्तः कूजन्तः कोकिलैः परे ७ विच्छायाभिः प्रधावन्तो गच्छन्तः साधुहंसकैः बकैरुपविशन्तश्च नृत्यन्तश्च कलापिभिः ८॥

जह्रुरेवं तः ३ तदेव प्रपञ्चयति स सभिः फले ति सर्वे मालाभिः काचादिभिर्भूषिता अपि भूषिता अपि फलादिभिरात्मानमभूषयन् तत्र प्रवालाः पल्लवाः तेषां स्तवकैः पुष्पस्तवकैः पुष्पकोरकैर्मुष्टिः मालाभिः अन्योन्यस्य शिक्यादीन्न्यादिशब्देन वेत्रविषाणवेणूनां संग्रहः मुष्णन्तः चोरयन्तः ज्ञातान् शिक्या दीन्नाराद्दूरे चिक्षिपुः तत्रत्याः तान्पुनः ततस्तारात्क्षिपन्तः गोपा हसन्तः सन्तः पुनरा ददुः ५ वनशोभादर्शनार्थं यदि कृष्णो दूरं गतो भवति तदा तं श्रीकृष्णमहमहं पूर्वं मस्पृश्यो मी त्येवं वदन्तः तं संस्पृश्य रेमिरे ६ केचिच्छृङ्गाणि ध्मान्तः मुखे वायुभिः पूरयन्तः भृङ्गैः सह प्रगायन्तः कोकिलैः सह कूजन्तः ७ विच्छायाभिः सह प्रधावन्तः कलापिभिः बर्हिभिः सह नृत्यन्तः

राम
४४

७२

तदा नंदन वनजा भिर्वकारे श्री हलं सखा किरनने रोमांचलरवसहितैः स्तोत्रै स्तुष्टु सुश्लोको पालसुतास्तु तद्वकवधं वीक्ष्य नितरां विस्मिता बभूवुः ५२
तदानंदन वनजाभिर्वकारे श्रीहलं समाकिरनन्ने रोमांचलरवसहितैः स्तोत्रैः स्तुष्टुवुः श्लोकोपालसुतास्तु तद्वकवधं वीक्ष्य नितरां विस्मिता बभूवुः स्वस्थानमागते पालेइद्रियाणां गणं इव कृष्णमुत्तो मुकुलं हलंपाण्यालिंगपुच्छु सुखिताः वत्सान्त्रणाये कोहृष्ट वृजमागमत कृकासुरवधाः स्वस्थानमागते प्राणे इंद्रियाणां गणं इव कृष्णमुत्तो मुक्तहलंपाण्या लिंगपुच्छु सुखिताः वत्सानत्रणायै कोहृष्ट ब्रजमागमत बकासुरवधा वे कृष्णगोपेभ्यः जगुः ५३ तज्ञोपवालकृगदितं श्रुत्वा विस्मिताः अति प्रियेण दूरयुक्ताः आगतं प्रेत्यायतं लोकालदागतमिवृत् वितान्यमत पिवृती वेल्लणानि येषां तथाभूताः श्रो सुकृष्णादेर्दत्तं तापप्यल ५४ अहो इत्यादि श्लोकत्रयस्यापि न दाक्ष्यं ऋषिवन्त्रान्वयः अहो इत्याश्चर्ये पि वृती वेल्लणानि येषां तथाभूताः अतो सुकृष्णादे दत्तं तापपपन ५५ अहो इत्यादि श्लोकत्रयस्य तिनंदाख्य ऋषिः वृत्तन्त्रान्वयः अहो इत्याश्चर्ये अति खेदे तत्र खेदहेतुं विशादयंति अस्य बालस्य मृत्युर्हेतवो भवन्नाप्यथापि तेषाम् एव विप्रियं दुःखमासीत् पुत्रमेवेत देसाङ्गः इष्टं जन्मा ते तिखेदे तत्र खेदहेतुं विशादयंति अस्य बालस्य मृत्युहेतवो भवन्नप्यथापि तेषामेव विप्रियं दुःखमासीत् पुत्रमेवेत देसाङ्गुः इष्टं जन्मांत

तदावकारेसरलो कवासिनः सखाकिरलं दनमल्लिकादिभिः समीडिरेचानकपंखसंस्तवे स्तदोत्यगोपालसुता विसिस्मिरे ५२
प्रकृत्वका स्याडुपलभ्य दारकारामादय प्राणमिवेंद्रियोगणः स्थानो गतं तत्परिरभ्य निर्वृताः प्रणीय वत्सान्त्रजमेत्य तज्जगुः
५३ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः प्रेत्यागतमिवोत्सुक्यादैक्षंत तृषितेक्षणाः ५४ अहो वतास्य बालस्य
बहवो मृत्यवोभवन् अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयम् ५५ अथाप्यभिभवंत्येनं नैव ते घोरदर्शनाः जिघांसयैनमासाद्य
नश्यंत्यग्नौ पतंगवत् ५६ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् गर्गो यदाह भगवानन्वभावि तथैव तत् ५७ इति नंद
ादयो गोपाः कृष्णरामकथां मुदा कुर्वंतो रममाणाश्च नाविंदन्भववेदनाम् ५८ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलाय
नैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ५९ इति श्रीमद्भागवते महापुराणे दशमस्कंधे एकादशोऽध्यायः ११ ॥

न१ रेषते पेभ्यः भयं तेषां कृतपर्ण वतेषां भयप्रयितेद्रश्यथे ५५ ए तेषांघोरदर्शना अप्येनं सस्मंवानिभवंतीतिं वदइतमिछये अवाल मासाद्य स्यपोवनश्यं =
तिपथाग्नौपतंगाः शलभास्तद्वत् ५६ अहो ब्रह्मविदां वाचः न दाचिदप्यसत्या न संति कुर्वं तितथाहि भगवान् गर्गो यदाह ता राय णसमोगुणैरि =
तितत्तथैवास्माभिरन्वभावि अन्वभूयत ५७ भववेदनां सांसारिक क्लेशं नाविंदन्नापुः ५८ एवं विधैः कौमारैः कौमारं च हितैः ता
नेवकरोश्चिन्हेतिरप्रयंते निलयकरणैर्वकातिभिः एवमग्रेपि प्रजे कौमारं कौमारावस्थां जहतुस्तत्क्रांतवंतो ५९ इति श्री
वत्सान्वयः पारावारसाकापुथाकरस्य श्रीशैलगुरोः सुतेन तत्त्वेवासमाधिगतश्रीमद्भागवतार्थहृदयेन ० टीकायां दशमैकादशो

सवकीवकयोरनुजोघासुरः कंसेनानुशिष्टः आदिष्टः कृष्णोमुखंप्रधानं येषां तानर्भकान्दृष्ट्वेति व्यवस्यानिश्चित्य जगरं वृहद्वपुर्धृत्वा ते
षांग्रसनाशया पथिव्यशेतेत्युत्तरेणान्वयः कथंव्यवस्यत्तदाह अयंत्विति सार्द्धेन द्वयोस्तयोर्मदनुजयोर्मध्येयं कृष्णस्तुममसो
दरयोः पूतनावकयोर्नाशकृत्तवा स्तितथाऽन्यएनं वलरामेणसहितं हनिष्यामि वलशब्दोत्रैतरगोपवालानामप्युपलक्षणार्थः ए
तैः कृतैरानृण्यंप्रापणीयं १४ यदेते कृष्णादयः मत्सुहृदोर्वत्सासुरवकयोस्तिलापस्तिलोदकवत्तच्छिदेतुत्वेन कृताएतेषां हननमेवमत्सुहृदो
स्तिलापइतिभावः तदासर्वेव्रजौकसोनष्टप्रायाः तथाहि प्राणे गते सति वर्ष्मसुशरीरेषुकावार्त्ताचिंतानहि प्राणेभ्यस्तेशरीरेषुस
लमपि स्थातुंशक्नोतिकिंतुनश्यत्स्येव प्राणाभृतः प्रजासवः प्राणायेषांतथाभूताहि प्राणस्थानीयेषुपुत्रेषुमयाहतेषु

दृष्ट्वार्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः सवकीवकानुजः अयंतुमेसोदरनाशकृत्तयोर्द्वयोर्ममैनं सवलं हनिष्ये १४ एतेयदा
मत्सुहृदस्तिलापः कृतास्तदानष्टसमाव्रजौकसः प्राणेगतेवर्ष्मसुकानुचिंताप्रजासवः प्राणभृतोहियेते १५ इतिव्यवस्या
जगरं वृहद्वपुः सयोजनायाममहाद्रिपीवरं धृत्वाद्भुतंव्यात्तगुहाननंतदापथिव्यशेतग्रसनाशयाखलः १६ धराधरोष्ठो
जलदोत्तरोष्ठोदर्याननान्तोगिरिशृंगदंष्ट्रः ध्वांतांतरास्योवितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः १७ दृष्ट्वातंतादृशं
सर्वेमत्वावृंदावनश्रियं व्यात्ताजगरतुंडेनह्युत्प्रेक्षंतेस्मलीलया १८॥

व्रजौकसः सर्वेस्वयमेवनंक्ष्यंतीतितदर्थेनमयायत्नः कार्यइतिभा
वः १५ इतीत्थंनिश्चित्यदुरात्माघासुरः रामकृष्णादीन्ग्रसितुं इच्छयाजगरं वपुर्धृत्वापथिव्यशेतशायितवान् वपुः कथंभूतंवृहत्स्थूलं
तदेवाहयोजनप्रमाणेनदैर्घ्येणयुक्तं चतन्महाद्रिवत्स्थूलंचव्यात्तंप्रसारितंगुहातुल्यमाननंयस्मिन् १६ अद्भुतत्वमेवदर्शयितुमसुरं
विशिनष्टिधराधरोष्ठोयस्यजलदोत्तरोष्ठोयस्य ~~[illegible]~~
~~इतिसर्वत्रपरुषानिलश्वास~~ (सप्तम्ये) दर्योगिरिकंदरातिकाननंतस्यांतोसृक्किणीयस्यगिरेः शृंगाएवदंष्ट्रायस्यध्वांतांधकारोय
स्मिन्नस्तीतिध्वांतवत्तदंतरास्यंयस्य दीर्घाध्वतमवाग्रवजिह्वायस्यपरुषवधूरसोयस्यासः दावाग्निरिवेक्षणाभ्यांउष्णः दावाग्नि
दृष्टिरित्यर्थः परुषानिलश्वासश्चेतत्तस्यसारूत्वेदाग्निश्चेतियत्वेतस्यलोपः प्राकल्पस्यतिलोपः दवेक्षणोष्णपदेनकर्मधारयो

[illegible]

45

कीशबालान् वृक्षशाखासु स्थितान् लंबमानानि वानरान् लांगूलान्याकर्षयन्तः तैर्वानरैः सह तरूनारोहन्तः तैर्वानरैः सह दन्तवदनक्र
विजृंभादिभिर्विकारान् कुर्वन्तः पलाशिषु वृक्षेषु वल्गन्तः शाखायाः शाखान्तरं गच्छन्त इति यावत् ९ भेकैर्भेकैः सह विलंघन्तः सरितो
यमुनायास्तोयेन परिप्लुताः आर्द्राः सन्तो विलंघन्तः अन्योन्यप्रतिबिंबानि हसन्तः प्रतिस्वनान् शपन्तः दूषयन्तश्च १० तदित्थं सम
मितेन दत्वादि इत्थं इति विषयेन ब्रह्मानन्दानुभवेन तद्दास्यं गतानां भक्तानां दत्तानुभवसंभृतप्रीतिकारितत्वात् दास्यं गतानामित्यर्थः सेतां
साधूनां परदैवतेन मायाश्रितानां प्राकृतानां मनुजबालरूपेण श्रीकृष्णेन सह तं विजह्रुः विहृतवन्तः गोपा इति शेषः तत्र
गोपान्१ हेतुं वदन् विशिनष्टि कृतानां पुण्यानां पुंजाः राशयो यैस्ते तथाभूताः पूर्वजन्मनीति शेषः ११ कृतपुण्यपुंजत्वमेव प्रपंचयति विस्म

विकर्षन्तः कीशबालानारोहन्तश्च तैर्द्रुमान् विकुर्वन्तश्च तैः साकं वल्गन्तश्च पलाशिषु ९ साकं भेकैर्विलंघन्तः सरित्तोय
परिप्लुताः विहसन्तश्च प्रतिच्छायाः शपन्तश्च प्रतिस्वनान् १० इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुंजाः ११ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः स एव
यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमतो व्रजौकसाम् १२ अथाघनामाभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः नि
त्यं यदन्तर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते १३॥

यत्पादपांसुरिति बहुजन्मसु कृच्छ्रं कृत्वा [?] क्लेशमनुभूय धृतात्मभिः येषां
धृतः विधृतः आत्मा मनो येषां तैः योगिभिरपि यस्य पादपांसुरप्यलभ्यः स एव भगवान् स्वयमेव येषां व्रजौकसां दृग्विषये स्थि
तः दृग्विषयतां प्राप्तस्तेषां भाग्यं किं वर्ण्यते [illegible] आश्चर्यमेतत् १२ ततस्तं विहरन्तं [illegible] अघासुरो महानसुरस्तेषां सुखे
न यत्क्रीडनं तस्य वीक्षणे न विद्यते क्षमा यस्य तथाभूतोऽभ्यपतत् अभिमुखं समागमत् तदेव प्रपंचयन् अघासुरस्य दौष्ट्यं [?]
भयशंकावत्त्वं [illegible] विशेषं चाह नित्यमिति [illegible] पीतममृतं यैस्तैरमरैरपि [illegible] इति भावः अमरैर्निजजीवि
ते [illegible] भयरहितान् [illegible] यस्मान् [illegible] अघासुरं [illegible] प्रतिक्षितं [illegible] निजजीवितमिच्छद्भिर्नित्यं यदं
तः यस्याघासुरस्यान्तः नाशः [illegible] प्रतीक्ष्यते १३॥

तावत्ततः पूर्वमेव शिशवो वत्सपाः वत्सैः सहिताः असुरस्यांतरोदरं उदरमध्यं प्रविष्टाः एवं केवलं न तु रक्षसा जीर्णाः जीर्णतां प्रापि-
ताः तत्र हेतुं वक्तुं रक्षसो विशिनष्टि यावत्स्वस्य कांतः सुहृत् तस्य स्मरणेन हेतुना बकारेः श्रीकृष्णस्य वेशनं प्रवेशं प्रतीक्षमाणे-
न २६ सर्वेषामभयप्रदो भगवान् कृष्णस्तान् प्रविष्टान् बलात्कारविस्मितः कारुण्यादिति वा अघाख्यस्य खलस्य विनाशनं प्रतीक्षमा-
सतां साधूनां जीवनं चेत्येतद्द्वयं युगपत् कथं स्यात् २७ ततो भयनिमित्तेन हा हा इति विचिंत्याशेषदृक् तुंडमे प्रविष्टस्तत्वात् सर्वस्य
वा हरिराश्रितो ऽभिहरः स्वयमप्यस्य तुंडमविशदित्यन्वयः कथंभूतांस्तान् विषये तेस्ववलितरेकोनोपेरसिता येषां स्वकरात्स्वग-

तावत्प्रविष्टास्त्वसुरोदरान्तरं परं न जीर्णाः शिशवः सवत्साः प्रतीक्षमाणेन बकारिवेशनं हतस्वकान्तस्मरणेन रक्षसा २६ तान्वीक्ष्य कृ-
ष्णः सकलाभयप्रदो ह्यनन्यनाथान् स्वकरादवच्युतान् दीनांश्च मृत्योर्जठराग्निघासान् घृणार्दितो दिष्टकृतेन विस्मितः २७ कृत्यं कि-
मत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंसनम् द्वयं कथं स्यादिति संविचिंत्य ज्ञात्वाविशत्तुंडमशेषदृग्घरिः २८ तदा घन-
च्छदा देवा भयाद्धाहेति चुक्रुशुः जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः २९ तच्छ्रुत्वा भगवान्कृष्णस्त्वव्ययः सार्भवत्सकं चूर्णी-
चिकीर्षोरात्मानं तरसा ववृधे गले ३० ततोतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः पूर्णोन्तरंगे पवनो निरुद्धो
मूर्धन्विनिर्भिद्य विनिर्गतो बहिः ३१ तेनैव सर्वेषु बहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुं-

आश्रयात् कृष्णान् दिष्टकृतेन प्रारब्धबलेन हेतुना मृत्योः जठराग्नेः घासस्थानीयान् २८ तदा मेघच्छन्ना देवा भयात् हाहेति चुक्रुशुः अघासु-
रस्य बांधवाः के कंसादयः कौणपाः राक्षसाः तद्दर्शिनो राक्षसास्तु हृष्टवंतः २९ तद्देवानां हा हे त्याक्रोशनं श्रुत्वा भगवान् श्रीकृष्णः
स्वयमव्ययो ऽक्षत एव सन्नात्मानं चूर्णीकर्तुमिच्छोरसुरस्य गले तरसा शीघ्रं ववृधे वृद्धिं प्राप्तवान् ३० ततस्तस्याघासुरस्यांतरेऽभ्यंतरे
परितो निरुद्धः पवनः प्राणवायुः पूर्ण एव ब्रह्मरंध्रं एव मूर्धं भित्त्वा बहिर्निर्गतः कथंभूतस्य विपुलकायस्य निरुद्धमार्गो
नासारंध्राद्यवयवस्य इति तथा भ्रमतस्तस्य उद्गीर्णे दृष्टी लोचने यस्य तस्य ३१ तेनैव निर्गतेन पवनेन सर्वेषु
प्राणेषु बहिर्निर्गतेषु सत्सु परेतान्मृतान् सुहृदो वत्सपांश्च स्वया अमृतवर्षिण्या दृष्ट्या उत्थाप्य तैरन्वितो मुकुंदः

46

तेषामसे हासमेव प्रश्नोत्तराभ्यामाह पंचभिः अहो मित्रौ दिसुख्यः। पुरः स्थितमिदं वस्तु सत्वकूटं सत्वजासमानं नवा तत्रापि सा
न्संशय सितुं वा न वा लर्तुं दक्षा चरतीनवा १९ एवमुक्ताः केचिदर्थे वेत्याकुः सत्यमिति अकैकरे रारक्तं घनं मेघमल रौवत्य शु
तं तस्य प्रतिच्छायया रुतां रोषः कूलमथ रोष्ठवत्य प्युलेति सर्वत्रान्वेति २० सव्यासव्यनगयोर्मदद्विणगिरी पौरुदरे दृष्टौ
सुष्किभ्यामोष्ठप्रां ताभ्यां प्रतिस्पर्द्धते तुल्यतया वर्त्तेत सव्यापसव्यागिर्योस्तुंग पंगणमालयः पंक्तय स्तस्पर्द्धा भिस्पर्द्ध
तेइतिवचनविपरिणामेनान्वयः २१ आस्तां तो विस्तारश्चासावायाममार्गे दैर्घ्यं वान्मार्गः तस्य रसनो जिकां प्रतिगर्जति
प्रतिस्पर्द्धते एषां भंगानां मेरु तमेव धांतमप्यंतरा नम मास्य मथ्य प्रतिगर्जति २२ दावाग्निनोष्ठः खरः कठिनश्च वातः वा

वातोद्भुः अहो मित्राणि गदत सत्वकूटं पुरः स्थितं आसन्तं सन्नया नवा लतुं डायते न वा १९ सत्य मर्ककरारक्तम
तरा हन्तवद्भवं अथरा हत्वकोथ सत्तमतिच्छायया रुणं २० प्रतिस्पर्द्धते सप्तकिस्यां सव्यापसव्ये नगोदरे तुंगशृंगालयोपेता
स्तान्दृष्ट्वाभिश्च पश्यत २१ आस्तां तायाम मार्गं यं रसनां प्रतिगर्जति एषां मेतगं तं ध्वांतमेलदप्यंतरा नन्तं २२ दावोत्खरवा
तोयं स्वासवक्तालिपश्यते तद्दूगयसत्वदुर्गंधोप्यंतरामिषगंधवत् २३ अस्मान्किमत्र्य सितानि विशानयं तथाचेद
कवाद्दिनं च्याति त्वया दन्ते नेलिवकाधरासतं वैर्वैरोपोरु सतः केरलोडने र्यथः २४ श्रीपुकंठ इत्यं मिथो तथ्यमतज्ज
भाषितं प्रुत्वा विचित्यायमरुषाम सपायते स्लो विदित्वा विलम्बं तस्य स्थितः स्वानां निरोदुं भाकान्म नोदये २५॥

सत्वानो १

एकजातितेन दावाग्निदाहदग्धानां जांगलानां दुर्गंधः सत्वानां त्वामिषगंधवज्जाति २३ एवं सत्य मेवाजगरसत्वमेकोत्ये स्थानिर्भया
यथारिसाद मुनिः विशंत्विति सर्वे वस्तावत्स पा श्चान्नविशंत्वस्मास्यास्मिकादिंस्मिन्स्थिता निकिंतं याचे जुमिप्पतिचेत्तदिव का
सुरवद्ययमेप्यनेन श्रीकृष्णेन त्वतां शिंचयालिनापंगच्छति इतो यं वकारे रुदृ श्रत्व श्रीयम वेविलोका उच्चैर्ईसंतः करताडनेरुपल
क्षिता यथ कारताडनानि कुर्वतोयशिरित्यर्थः २४ मिथोन्योन्यमतज्ज्ञानांमयथार्थाज्ञाररमजानतांभाषितमसत्यमसत्यं श्रुत्वा
भगवानस्मापिसत्यमप्येतेर्मन्यायितमयथार्थो रूटं इत्येव विचिंत्यां विलम्ब तस्य स्थितः दैत्युगर्भमिदं तत्वाद्वृत्तो विदित्वा

भा०द०
प०टी०
४७

अन्यदप्यतिविचित्रं वृत्तमित्याह एतदिति कौमारं पञ्चमाब्दात्पौगण्डं दशमावधि कैशोरमापञ्चदशाद्यौवनं तु ततः परमिति तदभिज्ञवचनं
हरेरेतत्कौमारजं पञ्चमाब्दकृतं कर्म तदेव दृष्ट्वा बालाः पौगण्डके षष्ठेऽब्दे व्रजे ऊचुः अद्यैव वृत्तमित्यूचुरित्यर्थः अयमहो भगवन्महिमातिशयः अ
न्यकालिकत्वात्सर्वेषां गोपानामिति भावः ३७ इति दशमे द्वादशः १२ कौमारजं कर्म पौगण्डके प्रोक्तमित्युक्ते तत्र कारणं पृच्छन्तमाह
इत्याह सूतः इत्थमिति हे द्विजाः यादवदेवेन श्रीकृष्णेन दत्तः परीक्षित् हि दिव्यं विचित्रं स्वभर्तुश्चरितं श्रुत्वा कौमारं पौगण्डे वदन्तदेव पौगण्ड
के कौमारजं प्रोचुरित्येतदेव यामात्मजस्य कं पप्रच्छ प्रश्नहेतुं वदन्स्वराजानं विशिनष्टि येन भगवता नितरां गृहीतं चेतो यस्य तथाभूत

एतत्कौमारजं कर्म हरेरात्माहिमोक्षणम्। मृत्योः पौगण्डके बाला दृष्ट्वोचुर्विस्मिता व्रजे ॥ ३७ इति श्रीभागवते महापुराणे दशमस्कं
धे द्वादशोऽध्यायः १२ सूत उवाच इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रं। पप्रच्छ भूयोऽपि तदेव पुण्यं वैयासकिं य
न्निगृहीतचेताः १ राजोवाच ब्रह्मन्कालान्तरकृतं तत्कालीनं कथं भवेत्। यत्कौमारे हरिकृतं जगुः पौगण्डकेऽर्भकाः २ तद्ब्रूहि मे म
हायोगिन्परं कौतूहलं गुरो। नूनमेतद्धरेरेव माया भवति नान्यथा ३ वयं धन्यतमा लोके गुरोऽपि क्षत्रबन्धवः। यत्पिबामो मु
हुस्त्वत्तः पुण्यं कृष्णकथामृतं ४ ॥

तः १ प्रश्नप्रकारमेवाह ब्रह्मन्निति कालान्तरे कौमारकाले कृतं कर्म तत्कालीनं पौगण्ड
डकालीनं कथं भवेत्पौगण्डे कथं ज्ञात्वोचुरित्यर्थः तदाह यदिति यत् तत्कालीनं पौगण्डकाले वाच्यं कथं भवेत् यत्कालावच्छेदेन कृ
तं तत्काले विस्मृतं सत्कालान्तरे च स्मृतं नेमवाच्यं स्यादेव तत्राह यद्यस्मात्कारणात्कौमारे कृतं पौगण्डके विदुः सन्ति कृष्टका
ले स्मरणाभावः कारणं न भवतीति तत्कारणं वदेति प्रश्नार्थः २ तदेतत्कारणं ब्रूहि हे महायोगिन्मे मम तत्कारणं श्रोतुं पर
मपि कौतूहलं वर्तते ममत्वेवं प्रतिभाति तेनाभिप्रायेणाह एतत्कारणं हरेर्माया स्वाचिन्त्यशक्तिरेव नूनं भवतु अन्यथा त्वेवं
न घटते ३ श्रोतृत्वं कृतार्थतामाविः कुर्वन्भगवत्कथां स्तौति वयमिति हे गुरो क्षत्रबन्धवोऽपि वयं लोके धन्यतमाः कृ
तार्थाः एव कुतो यत्त श्रीकृष्णस्य कथामृतं मुहुस्त्वत्तः पिबामः अन्यथाम्नो नैवं घटेतेति भावः ४ ॥

२४

47

राम
४७

ततो सुरोपं श्रीकृष्णमेव विवेशोत्पाद पीनात्मपे देहउत्थित मद्भुतं महत्स्वनेभ तज्ज्ञानेन वृहज्ज्योतिः स्वयं प्रकाशं जीवरूतं स्वयं स्वधाम्ना दशदिशोज्ज्वलयित्वा तावत्तेन रिक्ते व्यस्थितं स दीप्ताम्बु भगवतो निर्गमं प्रतीच्य तदा श्वयं देवानां पश्यतां सतां ततस्तस्मिन्नेव गीते क्षेत्रे विवेश २२ ततो तीव हृष्टा देवाः स्वकृताः स्वकार्यकर्तुः कृष्णस्याहं तं प्रोक्तः कृताकुर्वन् व्यत्यये नैकवचनं मुहुर्गायतो ति सुराः गंधर्वादयः गीतैः पूजयामासुः विप्राः स्तवैः स्तोत्रैर्गणाम्बरगणाः जयशब्दैः २४ किंच जो वेला स्वधाम्नः स्वस्थान स्पाति के समीपे तेषां गंधर्वादीनां मङ्गलानि स्तोत्राणि सवाद्यानि वाद्यस्य नीनं गीतिकाः गीतानि च जयशब्दादयश्चादिर्येषां तान्नेककृतस्वकार्यं गलाश्रमनचनौ श्वश्रुत्वा चिरादागतः ईशस्य कृष्णस्य महिमानं दृष्ट्वा विस्मयं जगाम २५ हे राजन्नाजगरं च मं प्रश्नं कंसहकृकालं वृन्दावने

पीनाहिभोगोत्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश अश्नीच्य रवेवस्थितमीशानिर्गमं विवेश तास्मिन्मिषतां दिवौकसां ३३ ततोतिहृष्टाः स्वकृतोऽकृताईणं पुष्पैः सुराप्सरसश्च नर्तनैः गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिस्वनैर्गणाः ३४ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादनैकोत्सवमङ्गलस्वनान् श्रुत्वा स्वधाम्नोऽन्त्यजआगतो चिराद् दृष्ट्वा महीशस्य जगाम विस्मयं ३५ राजन्नाजगरं चर्म शुष्कं वृन्दावनेद्भुतं व्रजौकसां बहुतिथं बभूवाक्रीडगह्वरं ३६ नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः अघोपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभं ३७ सकृद्यदङ्गप्रतिमां तराहिता मनोमयी भागवतीं ददौ गतिं स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायः परमो किमुत नः ३८ ॥

स्थितमाघं व्रजौकसां क्रीडास्थानं बभूव क्रीडार्थं गह्वराद्विलमासीदित्यर्थः ३६ ननु न्यदृष्टपतिविचित्रं वृत्तं इत्याह नैतदेवं विचित्रमपि तु परे देवमनुष्यादयोऽवरे अपकृष्टाः येषां ब्रह्मादीनां तेषामपि परमस्य वेधसः सर्वस्रष्टुरपि लीलया कपटमनुजबालकस्य स्पर्शनमात्रेण हतं विगतं पातकं यस्य तथाभूतोऽघासुरोऽपि असतां दुःप्राप्यमात्मसाम्यं भगवत्सारूप्यं प्राप्त लेभे इत्येतन्न देवाति विचित्रमित्यर्थः ३७ न केवलं किं पुनर्न्यायेन दृढयति सकृदिति यस्य भगवतोऽङ्गप्रतिमां प्रतिकृतिं चोमस्ताम् मनोमयी मनः कल्पितां तत्प्राप्तैश्चात्र तन्निधाय तमभगवद्भक्तिकृतं अन्तराहिता ध्यानेनांग हृदये निधापिता सतीं भागवतीं गतिं स किं ददावेव हे राजन्नित्यनिरतिशयानं

भा॰द॰
टी॰टी॰
४८

तस्य कृष्णस्य विषक् सर्वतः पुरुराजिभिः बहुभिः पंक्तिमंडलैः सह वने रंतये उपविष्टाः कृष्णाभिमुखाननाः वनान्तेषु तद्यूते रेजुः कथंभूताः कृष्णस्य विषक् परितः बहुभिः पंक्तिमंडलैः सह वने रंतये उपविष्टाः कृष्णाभिमुखाननाः वनान्तेषु रेजुः यथा कमलकर्णिकायाः परितः स्थितानि दलानि तद्वत् १३ पुष्पदलैः पुष्पदलादिभिः पात्रेषु फुल्लदृशो विकसितनयनाः यथा कमलकर्णिकायाः परितः स्थितानि दलानि तद्वत् १३ पुष्पदलैः पद्मिनीदलैः अन्यैः पत्रैः पल्लवैः अंकुरैः फलैः कृतानि भाजनानि भोजनपात्राणि यैः तथाभूताः बुभुजुः यथा पुष्पैः संपुटितपुष्पदलैः पद्मिनीदलैः अन्यैः पत्रैः पल्लवैः कोमलपत्रैः अंकुरैः सन्तोषिणः वस्था विशिष्टैः भुयत्रापि भम्भो नीरंध्रमास्तीर्णैः सकलैः पत्रैः तथाभूतास्तु भिर्मिजादिवृक्षारुणकोमलपत्रैः अंकुरैः सन्तोषिणः वस्था विशिष्टैः भुयत्रापि भगवान्लीलया बालस्येव केलियस्य सभिः १४ मिथइति सहेश्वराः श्रीकृष्णसहिताः अभ्यवजह्रुः बुभुजुः १५ यज्ञभुगपि भगवान्लीलया बालस्येव केलियस्य स्वर्गलोके देवजने मिषति पश्यति सति बुभुजे कथंभूतः उदरवस्त्रयोः मध्ये वेणुं बिभ्राणः इत्यन्तरं त्राण्यन्वेति वामइति कावादिव्या

कृष्णस्य विषक् पुरुराजिमंडलैरभ्याननाः फुल्लदृशो व्रजार्भकाः सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः १३ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः १४ सर्वे मिथो दर्शयंतः स्वस्वभोज्यरुचिं पृथक् हसंतो हासयंतश्चाभ्यवजह्रुः सहेश्वराः १५ बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः १६ भारतैवं वत्सपेषु भुंजानेष्वच्युतात्मसु वत्सास्त्वंतर्वने दूरं विविशुस्तृणलोभिताः १७ तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयं मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहं १८ इत्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्सकान् विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ १९॥

यालक्षणोपाणो विशेषणं वामेकक्षे शृंगवेत्रे विभ्रद्वामे पाणौ मसृणकवलं स्निग्धदध्यन्नकवलं तदुचितानि विल्वादिफलान्यंगुलीनां विविक्तस्थला नामिषे तिष्ठन्स्वस्यपरितउपविष्टाः सुहृदो मित्राणि नर्मभिः परिहासवाक्यैः हासयन् १६ हे भारत लाभ तेश्रीकृष्ण एवात्मा चित्तं येषां तेषु भुंजानेषु सत्सु वत्साः तृणलोभिताः इतस्ततः वने क्वाम धेपप्रविविशुः १७ तान्वत्सान्दृष्ट्वा तत एव भयत्रस्तान्मित्राणि सखीन्हे मित्राणि तिष्ठत भोजनं वा विश्वस्य भीयापि भयरूपः श्रीकृष्ण उवाच तदेवाह आशात् भोजनान्मा विरमत विरामं कुरुत इहैव स्थित्वा इहं वत्सकानानेष्ये १८ इत्युक्त्वा पाणौ कवले

रामः
८०

48

अथ माहृष्टो भगवान्बादरायणिस्तदाहेति मूलतः २ तो इति स तु बादरायणिरित्थं पृष्टोऽत एव संस्मारितेनापरिच्छिन्नवैभवेन भगवता हृतान्यखि
लानींद्रियाणि यस्य तथाभूतोऽपि ग्रन्थः शनैः कृच्छ्रात्कष्टेन पुनर्लब्धा बहिर्दृष्टिर्येन तथाभूतस्तं भागवतोत्तमोत्तमं प्रत्यानं प्रत्याह भागवतोत्तमे
ति पाठे हे शौनक ४ प्रश्नस्योत्तरं विवक्षुस्तावत्प्रश्नमभिनंदति साध्विति त्वया यत्पृष्टं तत्साधु पृष्टं कुतः यस्मात्कथामसकृच्छृण्वन्नपि नवीनं
करोषि ५ एतदेव तद्दृष्टान्तेन समर्थयति सतामिति सारग्राहिणां साधूनामयं निसर्गः स्वभाव एव यो सावच्युतस्य वार्ता प्रतिक्षणं सा पुनः नवनवायतीति
यदेव कर्णे ... स्त्रियः कामिन्या वार्ता विटकर्णे ... तानामपि सतामच्युतस्यैव वार्ता विषयो येषां तानि वाणादीनि येषां तथाभूतानामपि ६

सूत उवाच एवं नु पृष्टः स तु बादरायणिस्तत्स्मारितानंतहृताखिलेन्द्रियः कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमो
त्तमं ४ शुक उवाच साधु पृष्टं महाभाग त्वया भागवतोत्तम यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ६ सतामयं सारभृतां निसर्गो य
दर्थवाणीश्रुतिचेतसामपि प्रतिक्षणं नव्यवदच्युतस्य यत्स्त्रिया विटानामिव साधुवार्ता ७ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ अथाघवदनान्मृत्यो रक्षित्वा वत्सपालकान् सरित्पुलिनमानीय भगवानिदमब्रवीत्
९ अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकं स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलं १० अ
त्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणं ११ तथेति पाययित्वार्भा वत्सानारुध्य शाद्वले
मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा १२ ॥

गुह्यमपि रहस्यमपि ... अवहित अवधानेन युक्तचित्तः समाधानं गुह्यं गोप्यमपीति वि
वक्षितं ८ इतः तेन संगमयति अथेति मृत्युतुल्यादघासुरस्य मुखाद्वत्सान्वत्सपालांश्च रक्षित्वेदं वक्ष्यमाणमुवाच ९ पुलिनमेव श्लाघ्यत्वेन सं
पादयितुं तत्स्तौति अहो इति हे वयस्याः स्वीयानां केलीनां संपद्यस्मिन् मृदुला अच्छा वालुका यस्मिन् स्वकेलिसमृद्ध्यर्थं मृदुला वालुका
यस्मिन्निति वा स्फुरद्विकसत्सरः सरोरुहगंधेन ... हृता आकृष्टा अलयः पत्रिणश्च ते
षां ... ध्वनयः तेषां प्रतिध्वानाः तैर्लसितैर्द्रुमैराकुलं व्याप्तं १० अत्रैव दिवारूढमधिकं ... भोजनवेलातीतेत्यर्थः क्षुधार्दिता वत्सा
अपः पीत्वात्र समीप एव शनकैस्तृणं चरंतु ११ तथेत्यर्भा बालका वत्सानपः पाययित्वा शाद्वले तृणरहिते देशे संरुध्य भाव

अथांगोपिकामोहनप्रकारमाह तस्मात्तदइति वेणरवेणवेणुलिंगेन त्वरयोत्थिता स्तनदप्रस्रुपमातरः सुतान्स्तुलापरं ब्रह्मैवेदोभ्यो निर्भरं शर्मानंदं यथा तथोत्तमांगे हृत्स्नेहेन स्नुतपयोधराः यद्वा स्नेहेन स्नुतं स्तन्यपयएव मधुधावत्स्वादमधुरं तमादके पाययामासुः २७ एवं माधवः यामयमेन तत्तत्कालनियमेन सायंगतः प्राप्तः ततः शोभनैराचरितैर्थांहितेः प्रदर्शयन्हेन्वत्स मर्दनादिभिः संस्कारितो बभूव २८ अथगवां मोहनप्रकारमाह गावइति हुंकारघोषैः परिहृताः श्वसंगताश्वलान्वत्सा न्मुहुर्लिहत्यः स्वदोघस्तमापीनोत्सवं पयः क्षीरमापाययन् २९ एतावत्तु पेषमप्युक्लृस्यापि दुर्विवार्यमाणो दित्याह गोगोपी नामिति गवां गोपीनां च तस्मिन्वत्सवत्सपकात्मके तामापन्ने श्रीकृष्णे स्नेहर्द्धिका स्नेहसमृद्धिः स्नेहाधिक्यं विनैतियाव तमात

तस्मात्तदिवेणरवत्वरोत्थितांउद्भूस्य दोर्भिः परिरभ्य निर्भरं स्नेहस्नुतस्तन्यपयः सुधासवं मत्वापरं ब्रह्म सुतानपाय यन् २७ ततो नृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः संलालितः स्वाचरितैः प्रहर्षयन्सायंगतो यामयमेन माधवः २८ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसंगतान् स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहन्त्यः स्रवदौधसं पयः २९ गोगोपीनां मातृता स्मिन्सर्वा स्नेहर्द्धिकां विना पुरोवदास्वपि हरेस्तोकता मायया विना ३० व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत् ३१ इत्थमात्मात्मनात्मानं वत्सपालमिषेण सः पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ३२ एकदा चारयन्वत्सान्सरामो वनमाविशत् पंचषा सु त्रियामासु हायनापूरणीष्वजः ३३॥

ताअप्यलालनादिरूपा सर्वा पूर्ववद्बभूवुरित्यर्थः ३१

नतममथ पंच विहि कम्र हेतं तत्वत स्तत्वं नजानीष इत्यत्राह जानंत इति येऽजजा नन्त्वत्स्वरूपस्वभावादिकं जानंतीति त एव विदंतु न हे तं जानंतु मम व   पंच
क्तुं आपितेन किं न किंचिदपि साध्यमस्तीत्यर्थः एवमात्मनोऽज्ञत्वमाविष्कृत्य पुनः सर्वज्ञमीनमेत त्वनुजानामीत्यभिप्रायेणाह मनस इति त
व वैभवं मन आदिकरणत्रयस्य गोचरं न भवति तेन गोचरं न विषयं इत्यर्थः वपुष इति रूपांतार्थं यथा वपुषो गोचरं तेषां वाङ्मन
सयोरपीति अथवा तव वपुषोपि वैभवं वाङ्मनसागोचरमित्येतावत्तु जानामीत्यर्थः ३८ अथ तत्रैव मिथ एवया स्तरं तमंस सर्वज्ञस्त्वमेव वे
त्सीति वदन्ननुज्ञां पृच्छति अनुजानीहीति हे कृष्ण सर्वदृक् देतुगर्भमिदं तत्त्वात्सर्वं वेत्सि जगतां नाथस्त्वं न त्वहमिति भावः एतत्सर्वं दृश्य
मानं जगत्तवत्वया ऽर्पितं उत्पाद्य स्वास्मिन्नेव निहितमित्यर्थः न तु मम निभावः अतो मामनुजानीहि आज्ञापयेत्यर्थः ३९ एवमादृष्टोऽहं सं

जानंत एव जानंतु किं बहूक्त्या न मे प्रभो मनसो वपुषो वाचो वैभवं तव गोचरं अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक् त्वमे
व जगतां नाथो जगदेतत्तवार्पितं ३९ श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् उद्धर्मशार्वरह
र क्षितिराक्षसध्रुगाकल्पमार्कमर्हन् भगवन्नमस्ते ४० श्रीशुक उवाच इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः नत्वाभीष्टं जग
द्धाता स्वधाम प्रत्यपद्यत ४१ ततोऽनुज्ञाप्य भगवान् स्वभुवं प्रागवस्थितान् वत्सान्पुलिनमानिन्ये यथापूर्वं सखं स्वकं ४२ ॥

कोचैनैव तदनुज्ञातः पुनर्दर्शैलिष्यामीत्याशंकते तावदासा मया रणेश्मैः संबोधयन्नभिक्रम्य प्रणम्य च जगामेत्याह श्रीकृष्णेति द्वाभ्यां
हा सिद्धवृष्णिकुलमेव पुष्करं कमलं तस्य जोषं प्रीतिं ददातीति हे तथा हे क्ष्मा निर्जरा देवाः द्विजाः पशवः उदधिः सागरः तेषां वृद्धि
ं करोतीति तथाभूत तत्र सम्प्रदाय्य शार्वरं तमः तद्धर्तीति तस्य नेदुर्धर्म एव शार्वरं तमः तद्धरतीति तथा हे नेनदयोपमा
क्षितौ ये राक्षसाः कंसादयः तेषां ध्रुक्तेषां द्रोग्धा आकल्पमार्कं यावत्सूर्योऽस्ति तावदर्हन् पूज्यमान भगवन्मस्तात्ते नमः ४० इत्थं संबोधनैः
मद्वे मञ्जु देभगवन्ना कुलं कुलपर्यंतं ते तुभ्यं नमः ४० इति थिसंबोधनैः स्तुत्वेत्यर्थ अभिष्टूय जगद्धाता ब्रह्मा भूमानमपि ली
लया संकुचितविग्रहं भगवंतं परिक्रम्य पादयोर्नत्वा प्रणम्य स्वधाम सत्यलोकं प्रत्यपद्यत जगाम ४१ ततः स्व
स्याऽऽर्व चतुर्मुखमाज्ञाप्य हि संकोच्य नेति योऽस्य यथापूर्वं सखायोयस्मिन्स्तत्सखं स्वं पूर्वाधिष्ठितं पुलिनं प्रत्येव वत्सानानिन्ये

भा॰ द॰
स्क॰ टी॰
६२

वे सतोऽन्तरे षां प्रियावदन्तास्तथैवान्तस्य तत्त्वं वेत्तु मायास्थितं ५४ कृष्णे परमात्मत्व संशयं निराह कृष्णमिति यद्यखिलात्मनामा
त्मा तर्हि किमर्थं मानुषतामापन्नस्तत्राह मायया नात्मीय संकल्पेनात्र लोके गोपादिभ्यो देहीव कस्मो यततदेहमद्विवाभाति वि
वेकिनामिति भावः ५५ तदेव विशदयति वस्तुत इति स्थावरजंगमात्मकं कृत्स्नं जगज्जानतः शरीरमन्यत्तथा किंचिद्वस्तु किं नि
रूपितं विद्यत इत्येवं वस्तुतो जानतां देहीवभातीत्यन्वयः एकज्ञानतां तु देवमनुष्यादि किं जातीयत्वेनैव नत्वशरीरत्वेनैव च भा
तीत्यर्थः ५६ नान्यद्वस्त्वस्तीत्येतदेवोपपादयति सर्वेषामिति धातुशब्दो कृष्णवादयो धातव इति संकेतितः धातुपरः स च त
दुत्तरप्रत्ययानां तदुभयानां तदुभयार्थं चोपलक्षणं सर्वेशब्दानुगत्वात् इति भूत्वादिपदस्याभिप्रेतः भवतिरिति कृत्स्नपो धातु
निर्देशादिति विहितास्ति प्रत्ययांतो ऽत्र निर्दिष्टः तदयमर्थः सर्वेषां शब्दानां तदर्थानां च यो भावः सत्ता स एवार्थो ऽभिधेयो यस्य तथाभू

कृष्णमेनमवेहि त्वमात्मानमखिलात्मनां जगद्धितायसोऽप्यत्र देहीवाभाति मायया ५५ वस्तुतो जानतामत्र कृष्णं स्थास्नु च
रिष्णु च भगवद्रूपमखिलं नान्यद्वस्त्विह किंचन ५६ सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः तस्यापि भगवान्कृष्णः किम
तद्वस्तु रूप्यतां ५७ समाश्रिताये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः भवांबुधिर्वत्सपदं परंपदं पदं पदं यद्विपदां न तेषां

तो भवतिर्भूधातुः स्मृतः भूसत्तायामिति स्मृत इत्यर्थः सत्ताच प्रमाणेन संवेद्या ईदृक्तया एवं च तस्य सर्वशब्द तदर्थानां च भगवत्कृती
कीदृक् न होयं कस्य भूधातोस्तदर्थे तत्प्रत्यय तदर्थादेरपि शब्दास्सर्वधातुतत्प्रत्ययतदुभयार्थानां च यो भावः सत्ता स भगवान् श्रीकृष्णः
तत्सत्तानिर्वाहकः कृष्ण इति भावः यदुपान्हस्ति स्थितो ऽनुपलक्षणं सर्वशब्द तदर्थसत्ता स्थितिप्रवृत्तिनिर्वाहकः कृष्ण इति फलितार्थः
एवं च सति कृष्णः तस्य किंचिद्वस्तु किमस्तितन्निरूप्यतामिति किमतद्वस्त्विति पाठे त्वतद्रूपात्मकं वस्तु किमस्ति यन्निरूप्येतेत्य
र्थः ५७ एवंभगवतः परत्वं सर्वकारणत्वं चोपपाद्य ब्रह्मविदाप्नोति परं कारणं तु ध्येय इति श्रुत्युक्तरीत्या तद्वेदनमेवानिष्टपरि
हारकं श्रेयःप्रापकं चेति वदन्नुपसंहरति समाश्रिता इति पुण्यं यशो यस्य तस्य मुरारे महत्पदं महतामाश्रयं पादपल्लवं ये समाश्रयं
ति अमन्त्र्यालोपासनान्यतरत्पं तेषामेव भवांबुधिर्वत्सपदतुल्यो भवति नान्येषामित्यर्थः किंच परं च वैकुण्ठाख्यं पदं स्थानं भवति

ब्रह्मस्तुतिः चतुर्दश इति ॥

62

राम
६२

नवान्येरपत्यु:कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्यादिश्रुतेः हरेरात्मत्वाद्विजप्रेमाय स्वसंकल्पायत
स्तस्मिन्नेव महत्त्वात्तत्रतामापन्ने सति भक्तमेव प्रेमाधिकामित्युक्तरमाह सर्वेषामिति स्वात्माजीवान्तरात्मा परमपुरुष एव निरति
शयप्रिय इतरे तु देहतदनुबन्ध्यादयो जीवपर्यन्तास्तस्य परमात्मनो वल्लभतयैव निरतिशयप्रियत्वे नैव हेतुर्नः प्रिया: ५० तस्माद्राजे
न्द्र देहिनां निरतिशयस्वरूपपरमात्मसंकल्पायत्तप्रीतिरित्युक्तानां जीवानां स्वस्वदेहयामम तान्तदनुबन्धिप्रेमाय यथा स्वस्वदेहेन तथा
न्यत्रेत्यत्र ममतावन्तः साक्षान्निरतिशयप्रियस्वरूपपरमात्मसम्बन्धात्मनियामीतिनसादेहे जीवेनव्याहितत्वाद्याचदेहप्रीतिर्नसा
पत्ये देहात्मभ्यां मम वत्स नाद्याचपत्रता साविशेषाच्च विलेन सायहादिष्विति ५१ इदं च देहात्माभिमानिसाधारणमनुभवसिद्धमित्या
ह देहात्मवादिनामिति हे राजन्यसत्तम अपि शब्दाद् देहात्माभिमानरहितानामपीति भावः तं देहमनुबध्निन्तीत्यनुयन्तः तदेन तथा न देह
नुदेहा

श्रीशुक उ० सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः। इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ५० तद्राजेन्द्र यथा स्नेहः स्वस्वका
त्मनि देहिनां न तथा ममतालम्बिपुत्रवित्तगृहादिषु ५१ देहात्मवादिनां पुंसामपि राजन्यसत्तम यथा देहः प्रियतमस्तथा
न ह्यनु ये च तं ५२ देहोऽपि ममताभाक् चेत्तर्ह्यसौ नात्मवत्प्रियः यज्जीर्यत्यपि देहेऽस्मिन् जीविताशा बलीयसी ५३ तस्मात्प्रिय
तमः स्वात्मा सर्वेषामपि देहिनां तदर्थमेव सकलं जगदेतच्चराचरं ५४॥

ह वात्प्रिया: किन्तु तारतम्येनेति भावः देहेऽपि
तेऽपि ममताभाग्देहः नात्मवत्प्रियः किं
तावान्विशेष इत्याह देहोऽपीति यर्हि देहो ममताविषयः न त्वहन्ताविषय इति भावः तर्हि तथा भूतो ममताभाग्देहः नात्मवत्प्रियः किं
तु ततः किंचन प्रियतरः स्यर्थः नन्वेवं किं नो देहे सुतरां प्रीत्यभावः किं न स्यात्तत्राह यद्यस्मादृदेहे जीर्यत्यपि जीवनस्पृहा बलवत्तरा जीव
विताशा बलीयसी न जीर्यत्ययाति किंतु बलीयसी भवति स्फुलः किंचित्पुनः प्रियइति भावः ५३ यस्तु मकेतेकि मायात्तत्राह
तस्माल्लोकपरिपाटेरेवं विधत्वाज्जन्मिनां जननवतां देहवतां देहस्वता मिश्रसर्वेः प्रियतमः स्वसृत इति शेषः तत्र हेतुः स्वात्मा तेषां
जीवात्मान्तरात्मा गत एवं चराचरात्मकं जगत्सर्वे तदर्थमेव प्रियं न तदितरं सर्वेऽपि जनन एवं प्रियमित्यर्थः आत्मनस्तु कामाय इति श्रुतेः
स्मारेण्यार्थनिर्देशः अर्थशब्दः प्रयोजनवाचीप्रयोजनं चेह संपत्तिः तदिष्टं संपत्तिः तदिष्टसंपन्न एवं क्रियं इतियावत् नवान्यैरे
इति श्रुतेरयमर्थः पतिपत्न्यादीनां कामाय कामसिद्धये न हि प्रियत्वं किन्तु आत्मनो जीवात्मनः प्रियत्वं भवत्संकल्पाय तन्नस्त्याभायाया न्यये

भा॰ द॰
पू॰ टी॰
६३

अरुणपल्लवानां श्रिया सह फलानां प्रसूनानां च भरेण पादयोः स्पृशतः शिखाग्राणि येषां तांस्तरून्वीक्ष्यादिपूरुषः श्रीकृष्णः पुर
स्य पुलिनस्याग्रजं रामं प्रति देवस्य पाणेमाह ४ तद्देवादेश्चतुर्भिः स्वयमादिपुरुषोपि लोकमर्यादापालनेन धर्मवर्त्मनि त्वत्वशेषमप्र
मयि पि शेषमयत्वो वर्त्मनि त्वमात्रेण स्वलोधिकमिव संभावयन्नाह अहो इति हे देव वस्य हे देववरे र चितं तव पादांबुजं पुष्पफला
दिरूपं पूजासाधनमुपादाय शिखाभिर्नमंति तरवः किमर्थमात्मनस्तमसः पापस्यापहत्यै नाशाय येन तमसा तरुजन्म अस्तं संपा
दितस्य तमसोपहत्यै इत्यन्वयः ४ हे आदिपुरुष एते भृङ्गास्तवानुपदमखिललोकपावनं यशो गायंतः भजंते तिरश्चां रूपमेवं जा

63

स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः स्पृशत्शिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः
४ श्रीभगवानुवाच अहो अमी देववरामरार्चितं पादांबुजं ते सुमनः फलार्हणं नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै
तरुजन्म यत्कृतं ५ एतेलिनस्तव यशोखिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते प्रायो अमी मुनिगणा भवदीयमु
ख्या गूढं वनेपि न जहत्यनघात्मदैवं ६ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन सूक्तैश्च कोकिल
गणा गृहमागताय धन्या वनौकस इयान्हि सतां निसर्गः धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृ
ष्टाः नद्योद्रयः खगमृगाः सदयावलोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ८॥

64

ने तत्राह अमी अलयः प्रायेण भवदीयमु
ख्या मुनिगणा एवात एवानघात्मानमात्मदैवं गूढं गोपवेषेणाविशेषः वनं न जहति न त्यजंति हे ईश अमी शिखिनो नाम मयूरा नृत्यंति
तथा हरिण्यः गोप्य इव ईक्षणेन तुभ्यं प्रियं कुर्वंति तथा त्वं गृहमागताय कोकिलानां गणाः सूक्तैः प्रियं कुर्वंति एते कोकिलाद्यो
वनौकसोपि धन्या एव सतां निसर्गः स्वभाव ईयानमुष्मात् हि भवे द्रुमावमिषाने वदति ७ इयं धरणी तृणानि वीरुधश्च धन्या उक्तयत
स्तव पादस्पृशत्वात् तथा द्रुमलताश्च धन्याः कुतः करजैर्नखैरभिमृष्टाः तथा नद्यादयोपि धन्याः कुतः सदयैरवलोकनैः त
था गोप्योपि धन्याः कुतः भुजयोरंतरेण वक्षसा आलिंगिता इति शेषः कथंभूतेन यद्य स्पृहा श्रीरपि विशेषः
वती श्रीः तेन ८॥

तृतीया ३

राम
६३

नत्थी २

यत्पृष्टं हहः किंतत्कौमारे श्रीकृष्णकृतं तत्कथमर्भकाः पौगंडे इति प्रिया इति तदेतदुक्तं सर्वं ते तुभ्यं मे मया आख्यातं ५९ अध्यायस्यास्य श्रवणादि
फलमाह एतदिति सुहृद्भिश्चरितं मुरारेस्तोयान्नशिक्यादीनि तत्र दिनो कृष्णसुरे अघासुरहननं शाद्वले भोजनं जेमनमिति पाठे
पि स एवार्थः व्यक्ताद्व्यक्ततः स्थूलादितरत् सूक्ष्मं रूपं नवा सर्वं तत्स्वरूपादि रूपमजस्य ब्रह्मणोपि स्तवं स्तुतिं च येन तत्सर्वं शृण्वन् गृणन्
कथयं श्रवणभावरिखिलानभीष्टार्थानाप्नोति ६० इति दशमे चतुर्दशः १४ अथ पौगंडावस्थावस्थितयो रामकृष्णयोः क्रीडां
डावर्णयन् रमणकर्तृकं येन कारणेन धेनुकवधं अन्यकर्तृकं तदनुचरभंजनं कृष्णकर्तृकं कालीयहृद जलपान मूर्छित गोगोपीत्रापनं च

एतत्ते सर्वमाख्यातं यत्पृष्टोहमिह त्वया यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं ५९ एतत्सुहृद्भिश्चरितं मुरारेर
घार्दनं शाद्वलभोजनं च व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन् गृणन्नेति नरोखिलार्थान् ६० इति श्रीमद्भागवते
महापुराणे दशमस्कंधे चतुर्दशोध्यायः १४ श्रीशुक उ० ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालस
म्मतौ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः १ तन्माधवो वेणुमुदीरयन् वृतो गोपैर्गृण
द्भिः स्वयशो बलान्वितः पशून् पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनं २ तन्मंजुघोषालिमृगद्विजा
कुलं महन्मनःप्रख्यपयःसरस्वता वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ३ ॥

वर्णयति पंचदशे ततः कौमारानंतरं प्राप्त पौगंडवयसौ पशुपालने वा पशुपालानां संमतौ रामकृष्णौ सखिभिः सह गाश्चार
यंतौ पदैः पादविन्यासैर्वृंदावनमतीव पुण्यमेव चक्रतुः १ तत्तदा स्वकीर्तिं गृणद्भिर्गोपैः परिवृतो बलेन च समन्वितो वेणुमु
दीरयन् नादयन् पशव्यं पशुभ्यो हितं वनं प्राविशत् २ मंजुर्मनोज्ञो नादो येषां ते अलिमृ
गपक्षिभिराकीर्णं महतां योगिनां मन इव प्रख्यं स्वच्छं पयो यस्मिंस्तत्सरःस्ताः तद्वत्त्वेनास्ति यस्मिंस्तेन सता शतपत्र
गंधो यस्य तेन वातेन जुष्टं एवंभूतं यत्तद्वनं पश्यन् तत्र रंतुं भगवान्मनो दधे ३ परिमलन्यस्तं एवं विधं वनं
वीक्ष्य रंतुं मनश्चक्रे ३ ॥

भा॰द॰
पू॰टी॰
६०

64

तस्य कृष्णस्य प्रेक्ष्यमाणेन भगवता क्रियमाणेन चेष्टितेन तत्कर्तृत्वेन कारो नीति एवं ताद्दृशे ताच्छीलादेरेव तत्स्वभावात्कर्मणि लट् प्रत्यया
वन्धषाद्यार्थितशरीरे भुजंगमः कृष्णमत्यन्तं कुपितः फणानुन्नमय्य श्वसत्केवलं हरिमीक्ष्यमाणः तस्थौ कथं भूतः नासा
रन्ध्रे विवरस्य अम्बरीषवत्सन्तप्तानि चक्षूंषि यस्य अम्बरीषशब्दो भ्राष्ट्रवाची अम्बरीषं प्रमाणमाष्ट्रं क्लीबे वरीषं भ्रा
ष्ट्रे नेत्याहुः मानुषासम्पातवरीय उपलक्षितेनेत्रेण विशदं स्यस्य त्यागः नृत्यामोषस्थितस्य वर्तमानेतत्सलियोगेन
कृष्णागमे निपात्यते समस्तपार्श्वसिनासिका छिद्रमेव विषयात्कभ्राष्ट्रं यस्य सच्चासौ स्तब्धेन ऋणः उल्मुकान्यग्निकणानि मुखे यस्य
उल्मुकवज्ज्वलन्मुखो वा २४ द्विशिखया भागौ यस्याः स्तया तिकयावैसः स्रिणी उष्ठान्तो लेलिहान मतिकराला विषाग्निभीषः

तस्य प्रेक्ष्यमाण वषाव्याधितात्मभोगस्तत्कोन्नमय्य कुपितः स्वफणान्भुजंगः तस्थौ श्वसंश्वसन रंध्रे विषांबरीषस्त
ब्धेक्षणोल्मुकमुखो हरिमीक्ष्यमाणः २४ तं जिह्वया द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृ
ष्टिं क्रीडन्नमुं परिससार यथा खगेन्द्रो बभ्राम सोप्यवसरं प्रसमीक्ष्यमाणः २५ एवं परिभ्रमहतौजसमुन्नतांसमानम्
य तत्पृथुशिरस्स्वधिरूढ आद्यः तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोखिलकलादिगुरुर्ननर्त २६ तं नर्तुमुद्यत
मवेक्ष्य तदा तदीयगंधर्वसिद्धमुनिचारणदेववध्वः प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोप
सेदुः २७॥

एवं दृश्यतेऽस्य तमर्मं कालीयं क्रीडन्निव परितश्चचार भ्रमितः परितः समयेत्यादिवचनेनाभि मितिविषय
र्थे द्वितीयात्वम् मुष्य परिलः प्रसारेत्यर्थः यथा गरुडस्तद्वत्सोपि कालीयोप्यवसरं दंशनार्थमन्तर्मन्वेषयन्परिबभ्राम २५
एवं परिभ्रमणेनैव गतबलं उन्नतावंसौ यस्य तं कालीयमानम्य नम्रं कृत्वा तस्य पृथुषु विपुलेषु शिरःस्वधिरूढ आ
द्यो खिलविद्याकारणभूतः अखिलानां भरतशास्त्रविदामादिगुरुः हेतुगर्भमिदं तत्वाच्च परेषामपि शिरःसु ननर्त कथं
भूतः तस्य मूर्द्धसु रत्नसमूहास्तेषां स्पर्शेनातिताम्रणपादाम्बुजं यस्य तथाभूतः २६ नर्तयं कर्तुमुद्यतं तं कृष्णमवेक्ष्य तदीया
या भगवत्सेवकागंधर्वादयः प्रीतिपूर्वकं मृदंगादिभिरुपलक्षिताः सहसा उपसेदुः उपजग्मुः यदा तदीयाः कालियस्यपे

राम
६०

तदेव प्रपंचयति नश्यति विपश्यतेति विस्मयस्य प्रस्तुः कृष्णस्य तत्वतत्त्वव्रजादिरेखाभिरुपपन्नानि पदानि तत्राशानि वेत्रसावां मार्गेयोः । षां पदानामंतरमध्ये निरीक्ष्यमाणाः श्रीगदरजं त्वरायुक्ता ययुः १७ जलमध्ये भुजगदेहेन परिवेष्टितमहस्त्वे ष्टं कृष्णं हृदस्य तीरे म छिता नगोपाश्च संक्रंदतः पश्यश्चाराद्वेषापेलभ्यजातात्वात्तीः संतोमहत्कश्मलमापुः १८ तस्य कृष्णस्य सो ज्ञार्दनयत्सिंमतं येच विलोका : करा लोक्ता न गोपाश्च स्मरंतः निरतिशयप्रीतिविषये तस्मिन्सर्पेण ग्रस्ते सति वितरुदुःखेन तमाः प्रियेणत्यक्तं त्रिलोकं मन्यंदह मुः २० तां कृष्णस्य मातरं यशोदामपत्यमन्विष्यमनतांदुःखिता मगत्मदा सम्यग्गृहीत्वा हृदेपतितं उद्युक्तां निवार्ये तन्यश्चुचोश्चाति

तेत्र तत्रा व्रजयवांकुशाशनि ध्वजोपपन्नानि पदानि गतागतं निरीक्ष्यमाणा मधुरंग स्त्वराः १८ + पदानि विपश्यतेः । मार्गे गवाम्यप + श्रीलक्ष्मी देवजं भोगपरीतमाराक्त्व कृष्णं निरीक्ष्योपलभ्य जलाशयांते गोपांश्च मस्तु विधि षण्णान्यरितः पश्यश्च संक्रंदतः परमकश्मलमापुरार्ताः १९ गोप्योनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मित विलोकगिरः स्मरंत्यः ग्रस्ते हिनो प्रियतमे मशुदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं २० ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः तास्ता व्रजप्रियकथाः कथयंत्य आसन् कृष्णाननेर्पितदृशो मृतकप्रतीकाः २१ कृष्णप्राणान्निर्विशतो नंदादी [illegible] न्वीक्ष्यतं हृदं प्रत्यषेधत्स भगवान् रामः कृष्णानुभाववित् २२ इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखितं विन तमात्महेतोः आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् २३ ॥

स्रवंत्यः तया तुल्यदुःखाः प्रियाव्रजाः यस्य तस्य तास्ताः कथाः कृष्णानायम लाभे नभंग हि नपाः कथयंत्यः कृष्णस्य प्राणने ऽर्पिता दृशो या [illegible] मंतुः खितं गोकुलं निरीक्ष्यात्मा मितामहलतुल्याः आसन् २१ कृष्ण एव प्राणो येषां ता॰ कृष्णे वै जीवनानंदादीन्हृदं [illegible] प्रत्यषेधत् राम भगवान् रामः प्रत्यषेधन्निवारितवान् तत्र हेतुः कृष्णानुभाववित् [illegible] दुःखं ज्ञात्वा मर्त्यपदवीमनुवर्तमानोऽत एव मुहूर्तमात्रं [illegible] दुःखितं गोकुलं निरीक्ष्य आज्ञाय तद्दुःखं ज्ञात्वा मर्त्यपद पिहितुं भगवान् २२ न विपथते त्याग्यतिः रक्षा लोपायोपायस्य हेतोः स्त्री कुमारपर्यंतं दुःखितं गोकुलं निरीक्ष्याज्ञाय तद्दुःखं ज्ञात्वा मर्त्यपद वीमनुवर्तमानोऽत एव मुहूर्तमात्रं तस्थौ स्थित्वा तत उरगबंधात्फणबंधादुदतिष्ठत् त्याजितो रागबंधो वमश्वे त्यर्थः २३ ॥

भा॰द॰
टी॰
६९

वायवो येषां ते न एवं संरब्धाः सर्वे स्म्यद्बलमभिद्रुत्य साजमुः ३६

ततो धेनुकस्य ये ज्ञातय उपक्रोष्टारो गर्दभाः स्वशब्दं कुर्वंतो वा हत्भ्वा प्रत्येकाभिप्रायकमेकवचनं ३७ फलसमृद्धेः संकीर्णैः धुरामतया

हेन परगृहीतोपश्चाच्चरणौ येषां तांस्तालेषु प्राहिणोत् प्राक्षिपत् प्रत्येकाभिप्रायकमेकवचनं संपादनं ३८ निशाम्य हृ

तो दैत्यदेहैः कृष्टैस्तालाग्रैश्च घनैर्नभस्तलं स्वैरणान रदेहैस्तालाग्रैश्च मैर्घनेर्नभस्तलं सृद्वं ३९ अथ ततः प्रभृत्यासमंतात्

स्वाधीनवर्षाणि गुणवृत्तानि बुधास्तां कुर्वंति मिति शेषः तस्य विबुधादयः स्तुवंति ४० अथ तदनं कीर्तयतां चद्यापावर्द्धय छद्रवर्णं

स्तालफलान्यादन् कृत्वा वतः हतो धेनुको यस्मिंस्तस्मिन् कानने पशवश्चावरन् ४०

तां स्तानापततः कृष्णे रामश्च ततः कृष्णं च रामं च ज्ञातयो धेनुकमारये क्रोष्टारोऽभ्यद्रवन्त सर्वे संरब्धा हतबांधवाः ३६ तांस्तानापततः कृष्णो रामश्च

नलः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये क्रोष्टारोऽभ्यद्रवन्त सर्वे संरब्धा हतबान्धवाः ३६ तांस्तानापततः कृष्णो रामश्च नृप लीलया गृहीतपश्चाच्चरणान् प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः रराज भूः सतालाग्रै

पली लया गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः रराज भूः सतालाग्रैः ३८ अ

र्घनैरिव नभस्तलं ३८ तयोस्तत्सुमहत्कर्म निशाम्य विबुधादयः मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ३९ अथ तालफलान्यादन्मनुष्या गतसाध्वसाः तृणं च पशवश्चेरुर्हतधेनुककानने ४० कृष्णः कमलपत्राक्षः पुण्य

श्रवणकीर्तनः स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाविशत् ४१ तं गोरजश्छुरितकुन्तलबद्धबर्हवन्यप्रसूनरुचि

रेक्षणचारुहासं वेणुं क्वणन्तमनुगैरुपगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ४२॥

तं व्रजमाविशन्तं दिदृक्षिताः दृष्टुमिष्टा

कीर्तयतां श्रवणं वर्द्धयं छद्रवर्णं कीर्तनं च यस्य सः कृष्णः साग्रजो व्रजमाविवेश ४१ तं व्रजमाविशंतं दिदृक्षिता दृष्टया

या सातागोप्यः समेताः समुदिताः अभ्यगमन्नभिमुखमाजग्मुः कथंभूतं गोरजोभिश्छुरिताः कुन्तलेषु बद्धं वन्यं पुष्पं पीत्वा

प्रसूनानि च यस्य रुचिरमीक्षणं चारुर्हासश्च यस्य अनुगैरुपगीता कीर्तिर्यस्य तं कुर्वंदस्य मुखरसं मकरन्दं पीत्वा

तद्धतं पीत्वेत्यर्थः आक्षिपो विरहतज्जं तापं जहुः तासां व्रजयोषितां सत्कृतिं बहुमानमपि गम्य सत्कृतिरूपमेवा

ह सलज्जं सहासं सविनयं च यथा तथा ४२॥

राम
६९

65

इत्थं सुहृदां वचः श्रुत्वा तेषां प्रियं कर्तुमिच्छया प्रहस्य गोपैर्वृतौ प्रभू रामकेशवौ तालवनं प्रति जग्मतुः २७ तत्र बलो रामः प्रविश्य बाहुभ्यां तालान्परितः कंपयन् करेण मत्तगज इवौजसा बलेन फलानि पातयामास २८ तदा पततां फलानां शब्दं निशम्य आकर्ण्य रासभः असुरः क्षितितलं कंपयन् अभ्यधावत् बलरामं समेत्य असुरः सवेगं पश्चात् द्वाभ्यां पादाभ्यां तरसा बलेन उरसि निहत्य काशब्दं गर्दभध्वनिं मुंचन् स खलः पर्यसरत् पर्यसरत् २९ पुनरासाद्य संरब्धः क्रुद्धः उपक्रोष्टा गर्दभः अन्यत्र स्थितः

श्रीशुक उ० एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू २७ बलः प्रविश्य बाहुभ्यां तालान् संपरिकंपयन् फलानि पातयामास मतंगज इवौजसा २८ फलानां पततां शब्दं निशम्यासुररासभः अभ्यधावत्क्षितितलं सनगं परिकंपयन् २९ समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां बलं बली निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ३० पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ३१ स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३२ तेनाहतो महातालो वेपमानो बृहच्छिराः पार्श्वस्थं कंपयन्भग्नः स चान्यं सोपि चापरं ३३ बलस्य लीलयोत्सृष्टखरदेहहताहताः तालाश्चकंपिरे सर्वे महावातेरिता इव ३४ नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ३५॥

हे राजन् पुनरुषाः परौ पाश्चात्यौ पादौ रामाय प्राक्षिपत् रुषा कोपेन ३१ तदा स तं गृहीत्वा एकेनैव पाणिना पादयोर्गृहीत्वा भ्रामयित्वा भ्रामयित्वा भ्रामणेन त्यक्तजीवितं तृणराजाग्रे तालाग्रे चिक्षेप प्राक्षिपत् ३२ तेन पूरिक्षिप्तेन खरेण हतस्ताडितो महातालः भग्नः पतन् महानो बृहच्छिराः भग्नः गोयष्ट्या हतं वपुः पार्श्वस्थं तालं तालयन् पपात इति शेषः स च पार्श्वस्थं पतमानस्तथैवान्यं सोपि तथैवान्यं ३३ बलस्य रामस्य लीलया उत्सृष्टेन खरदेहेन हता ये तैर्हताः सर्वे तालाश्चकंपिरे यथा वातेनेरिताः कंपिताः तालतरवः ३४ जगदीश्वरे अनंते एतन्न चित्रं कुतः अंग हे राजन् तंतुषु पट इव इदं जगद्यस्मिन्नोतं प्रोतं च ३५॥

भा॰द॰
ष॰टी॰
६६

ता श्चालेचलेतमास्ति येत्येकशेषः गावो गोपाश्च सं प्रतीताः सम्यक् प्राप्ताः स्मृतयो येस्तथाभूता जलान्तिकादुत्थाय परस्परं वीक्षमा
णाः सुविस्मिता आसन् ५१ विषं पीत्वा हं परेतस्य मृतस्यात्मनो यत्पुनरुत्थानं तद्गोविंदस्यानुग्रहेक्षितमन्वमंसत ५२ इति दशमे पं
चदशः १५ अथ कालीयदमनात्मकं कर्मानुवर्ण्यते यत्र कामं तत्र वह्निः प्रक्षावसरप्रदम्नायते तं सदर्शयति विलोक्येति कृष्णादि
नाकालीयेन दूषितां कृष्णां यमुनां विलोक्यालोच्य तस्याः कृष्णायाः विशुद्धिमन्विच्छुः कर्तुमिच्छुः तं कालीयं सर्पमुदवासयत्तत निष्का

ते संप्रतीतस्मृतयः समुत्थाय जलान्तिकात् आसन्सुविस्मिताः सर्वे वीक्षमाणाः परस्परं ५१ अन्वमंसत तद्राजन्
गोविंदानुग्रहेक्षितं पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ५२ इति श्रीभागवते महापुराणे दशमस्कंधे पंचद
शोध्यायः १५ श्रीशुक उवाच विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः तस्या विशुद्धिमन्विच्छन्सर्पं तमु
दवासयत् १ राजोवाच कथमंतर्जलेगाधे न्यगृह्णाद्भगवानहिं स वै बहुयुगावासं यथासीद्विप्र कथ्य
तां २ ब्रह्मन्भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ३
श्रीबादरायणिरुवाच कालिंद्यां कालीयस्यासीद्ध्रदः कश्चिद्विषाग्निना श्रप्य
माणपया यस्मिन्पतंत्युपरिगाः खगाः ४ ॥

सितवान् १ तत्र विस्मितः पृच्छति राजा कथमिति द्वाभ्यां अंतर्जले तत्राप्यगाधे तत्राहिं सर्पं कथं निगृहीतवान् स वै अ
हिर्बहुयुगान्यावसतीति तथाभूतो यथा येन प्रकारेणासीत्तदपि हे विप्र कथ्यतां २ आत्मनाशिरसाधिक्यं मन्वानः
ब्रह्मन्निति भूम्नः विपुल महात्म्यस्य स्वतंत्रस्यापि लीलया गोपालस्य सतः यदुदारचरितं तदेवामृतं जुषन्कः तृप्येत न कोपि
३ विषाग्निना पच्यमानपयो यस्मिंस्तस्य ह्रदस्योपरिगाः उपरि चरंतः खगाः पक्षिणः पतंतीति येतुः विषजलवायुप्रसारणा
त्रेणापि मूर्छिताः पतंती सद्यः ४ ॥ ॥

रम्प
६६

66

मुकुन्दस्य मुखसारं संघ(?)... पीत्वा तज्जं तं मधु पीत्वेत्यर्थः अह्नि यो विरहस्तज्जं तापं जहुः तासां व्रजयोषितां सत्कृतिवद्रूपा
मग्नधिगम्य सत्कृतिस्वरूपमेवाह सलज्जं सहासं सविनयं च यथा तथा अपाङ्गयोर्नेत्रान्तयोर्मोक्षः प्रसरणं यस्मिंस्तत्तद्रूपां
वि३ तां सत्कृतिं प्राप्य गोष्ठं विवेश ४३ यथाकामं मनोऽभिलाषानुरूपं यथाकालं च यथा तथा परमा आशिषः कामान्व्यधत्तामकुर्वताम् ४४ तदेव
दर्शयन्नाह तत्र गृहे ऽगमर्दनोद्भिर्गतोऽध्वसंबंधी श्रमो ययोस्तौ रुचिरां नीवीं वस्त्रं वसित्वा दिव्याभ्यां स्रग्गन्धाभ्यां मं
डितौ जनन्योपहृतं पात्रे दत्तं स्वादु मृष्टमन्नं प्राश्य उपलालितौ सुखं यथा तथा सुषुपतुः ४६ कदाचिद्रामं विना तैः सखिभिर्वृ

पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहा
सविनयं यदपाङ्गमोक्षम् ४३ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले यथाकामं यथाकालं व्यधत्तां परमाशिषः ४४ गता
ध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः नीवीं वसित्वा रुचिरां दिव्यस्रग्गन्धमण्डितौ ४५ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपला
लितौ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ४६ एवं स भगवान्कृष्णो वृन्दावनचरः क्वचित् ययौ राममृते राजन्का
लिंदीं सखिभिर्वृतः ४७ अथ गावश्च गोपाश्च निदाघातपपीडिताः दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ४८
विषाम्भस्तदुपस्पृश्य दैवोपहतचेतसः निपेतुर्व्यसवः सर्वे सलिलान्ते कुरूद्वह ४९ वीक्ष्य तान्वै तथाभूतान्कृष्णो यो
गेश्वरेश्वरः ईक्षयामृतवर्षिण्या स्वनाथान्समजीवयत् ५०॥

तः हे राजन् कालिंदीं यमुनां ययौ ४७ निदाघे ग्रीष्मर्तौ सूर्यातपः तेन पीडिता अतएव तृषार्ताः तृष्णाकुलिताः कालीयविषेण
दूषितमतएव दुष्टं जलं पपुः पीतवंतः ४८ तद्विषोदकमुपस्पृश्य तद्दैवोपहतचेतसः मूर्छिताः व्यसवः प्राणैर्वि
रहिताः हे कुरूद्वह निपेतुः ४९ तथाभूतान्मूर्छितान्पतितान्वीक्ष्य इहामृतसंजीवनकृद्योगानामीश्वरः कृष्णः स्वनाथा
न्स्वैव नाथो रक्षको येषां तानमृतवर्षिण्या ईक्षया दृष्ट्या समजीवयत् सचेतनानकरोदित्यर्थः ५०॥

नागस्यभोगेनदेहेनवेष्टितमतएवादृष्टाइतरैरलक्षिताचेष्टायस्यतंकृष्णमालोक्यतस्यकृष्णस्यप्रियसखायः गोपाभये
नाम्लौः कृष्णएवार्पिताआत्मानोमनांसिशरीराणिवा सुहृदादयश्चयैस्तथाभूताः अर्थोवित्तंकामाइष्टार्थाः दुःखादिभिर्
हापिधियोयेषांतेनिपेतुः दुःखंमानसिकंशोकोरोदनं १० वत्सतर्योदम्याः स्तनतराः दुःखिताः क्रंदमानाः आक्रंदंत्यः कृष्णएव
न्यस्तानीक्षणानियैस्तारुदंत्यइवतस्थुः ११ दिविभुव्यात्मनीत्येवंत्रिविधाभयसूचकाउत्पाताबभूवुः तत्रभुव्युत्पाताः कंपाद
यः दिव्युल्कापातादयः आत्मनिवामनेत्रस्फुरणादयः १२ ताउत्पातानालक्ष्यभयेनोद्विग्नाः कंपितगात्रानंदप्रभृतयोगो

तंनागभोगपरिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखाः पशुपाभृशार्त्ताः कृष्णेर्पितात्मसुहृदर्थकलत्रकामादुःखा
नुशोकभयमूढधियोनिपेतुः १० गावोवृषावत्सतर्यः क्रंदमानाः सुदुःखिताः कृष्णेन्यस्तेक्षणाभीतारुदंत्यइवतस्थिरे
११ अथव्रजेमहोत्पातास्त्रिविधाह्यतिदारुणाः उत्पेतुर्दिविभुव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्यभयोद्वि
ग्नागोपानंदपुरोगमाः विनारामेणगाः कृष्णंज्ञात्वाचारयितुंगतं १३ तैर्दुर्निमित्तैर्निधनंमत्वाप्राप्तमतद्विदः तत्प्रा
णास्तन्मनस्कास्तेदुःखशोकभयातुराः १४ आबालवृद्धवनिताः सर्वेंगपशुवृत्तयः निर्जग्मुर्गोकुलाद्दीनाः कृ
ष्णदर्शनलालसाः १५ तांस्तथाकातरान्वीक्ष्यभगवान्माधवोबलः प्रहस्यकिंचिन्नोवाचप्रभावज्ञोनुजस्यसः १६
तेन्वेषमाणादयितंकृष्णंसूचितयापदैः भगवल्लक्षणैर्जग्मुःपदव्यायमुनातटं १७॥

परामेणविनागाश्चारयितुंगतंकृष्णंज्ञात्वा १३ तन्मयस्तस्यानभिज्ञास्तैर्दुर्निमित्तैर्निधनंतस्यविपत्तिमेवज्ञात्वायतस्तस्मिन्नेव
प्राणास्तस्मिन्नेवमनांसिचयेषांअतः शोकभयाभ्यामातुराः १४ सर्वेंगहेराजन्यस्यवत्सलाः धेनवस्तास्तस्यपशुकाः कृष्णस्य
दर्शनेनिमित्तेलालसाःनिर्जग्मुः १५ तदातान्निरीक्ष्यतःकातरांश्चालोक्यमाधवोबलोरामः मधुवंशप्रभवत्वान्माधवः अनुज
स्यप्रभावाभिज्ञोऽतएवप्रहस्यकिंचिदपिनोवाच १६ तेनंदादयः कृष्णंमृगयंतः भगवंतंलक्षयंतीतितथातैर्ध्वजवज्रादि
भिश्चिह्नितैरितिभावः पदैः सूचितयापदव्यामार्गेणयमुनायास्तटंजग्मुः १७॥

यस्य ह्रदस्य तीरगाः स्थिरजंगमा वृक्षादिपक्ष्यादिप्राणिनः विप्रुष्मता शीकरयुक्तेन विषजलतरंगाणां मारुतेनाभिमर्शिताः स्पृष्टा म्रियन्ते तथाविधः कृष्णह्रदः कालीयस्यावासभूतः कालिंद्यामासीदित्यन्वयः ५ स्पर्शमात्रेणैव व्यापनशीलं विषमेव वीर्यं बलं यस्य तं कालीयं ह्रदे दृष्ट्वा तेन दुष्टां नदीं यमुनां चालोक्य खलानां संयमनाय दमनायावतारो यस्य सः हे तुंगमभिसिद्धं तत्वात् कदंबवृक्षमधिरुह्य गाढीकृता रशनाकांची यस्य सः आस्फोट्य करतलेन भुजमूलं संगं वा आस्फाल्य हत्वा तन्नता ततः कथंचिद्विषोदे आपतत् ६ आमततमाहः ताग रुत्मलाक्रां तत्वा सकदंबो विषजलेनापि न भङ्गुरता हेस सर्पस्य ह्रदः पुरुषस्य वर्यस्य पुरुषोत्तमस्य निपातवेगेन संक्षोभिताना उरगाणां विषेरुच्छ्वसितः प्रवृद्धोऽम्बुराशिर्वारिराशिः

विप्रुष्मता विषदोर्मिमारुतेनाभिमर्शिताः म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजंगमाः ५ तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः कृष्णः कदंबमधिरुह्य ततोऽतितुंगमास्फोट्य गाढरशनो न्यपतद्विषोदे ६ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः पर्यक्प्लुतो विषकषायविभीषणोर्मिर्धावन्धनुःशतमनंतबलस्य किं तत् ७ तस्य ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ८ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु रुषा भुजया चछाद ९

यस्य विषैः कषायिता कषायीकृताः क्वाथिताः भीषणाः ऊर्मयो यस्मिन् स तथाभूतः पर्यक्परितो यद्भुतः शतेनतारेमाणस्यलं तस्यानन्तबलस्य तत्किं किं यत् ७ ततो ह्रदे विहरतः गजश्रेष्ठस्येव विक्रमो यस्य तस्य भगवतो भुजदंडाहतोदकघोषमाकर्ण्य हे राजंस्तत्स्वनिलयतिरस्कारमसहमानश्चक्षुःश्रवाः सर्पः स्वसेनया सहितः समसरदाजगाम ८ भुजंगः कालीयस्तं कृष्णं मर्मसु पादेन दंशित्वा भुजंगभुजेन प्रेक्षणीयसुकुमारघनवन्निर्मलश्च तं श्रीवत्सवक्षसं श्यामायमानं इति श्रीवत्सयुक्तं पीतवस्त्रं यस्यास्मितेन सुंदरमाननं यस्य प्रतिपदा अपरहितं

भा॰द॰
टी॰
६५

ताः कालियपत्न्यः सुविग्ना नितरां भीताः विमनाः सिद्धाः सा मन एव पुरस्कृताः भर्त्रा निधापिताः अर्भा बालाः याभिः ताः अभ्रिकायाः नन्दे हालिया पृष्ठे द्वयस्या अपि त्वाम्भःतपतिं भूपराधानं वेदलोनं शरणमातम भूतमातृ दशितारं दुःखं प्रसोमुन्न मुञ्च कुः तत्र स्तोः साध्व्यः पतिव्रताः शमलस्य पापस्य भर्तुर्विमोक्षेप्सवः भर्तुः शमलेप्सितिं वा कृताञ्जलिपुटाः शरणदं शरणं रक्षणोपायं शरणं प्रपन्नाः ३२ न्यायो न स्वभर्तृरूपं प्राणसंरक्षणात्मकस्वाभीष्टोपायत्वं महाविष्णुसपूर्वकं यथा विकीर्ष वस्ताध्यानीयतोपपत्तेः एवं तावत्स्तुतिव्याजेन विधिवत् स्वात्मबन्धनमपत्यस्य भर्तुः कार्यमेवमेवान्तरेण स्तुतवत्वं च स्तुत्वय त्यः पकृतमेतस्य दमनमहितव्याजेदितव्याजेदितमेव तच्च समदृशा त्वया कर्तुमुचितमेवेति विज्ञापयन्त्या मासुः न्याय्य इति द्वयेन ततश्चतुर्भिः कार्पण्येन कृतवती तस्य महितव्याजेदितमेव तच्च समदृशा त्वया कर्तुमुचितत्वेन तेदृशाभियाचनीयत्वोपपत्तेः

तास्तं सुविग्नमनसोऽथ पुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः साध्व्यः कृताञ्जलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ३२ नागपत्न्य ऊचुः न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ३३॥

नागपत्न्यः षड्भिः स्तुतिः ततः पञ्चभिर्याचितिर्विवेकः कृतकिल्बिषं कृतविरुद्धपाणमस्मिं त्वां दृष्ट्वा नाम्न कं वा येनास्मिन्नपत्यस्य याध्यतोऽदण्डः स न्याय्य उचित एव कृतकिल्बिषरयं ननु तस्य दण्डश्चेत्वमा किं च न्यं प्रभुरत सापराधत्वं च स्तवचितं न्याय्यत इदुयित्वं न्याय्यमिति अभिप्रायेणाह तवावतारः खलानां दुष्टानां निग्रहार्थे हि तावतार इत्यर्थः ननु त्वेवमपि वात्सल्यानिधेः प्रेमेव न तच्चितमित्यत आह तवावतारः खलानां दुष्टानां निग्रहायैव हि दृष्टियै स्यत्वथाभूतत्वं फलं हितान्मुक्तमेवानुशंसन्नं तरमेव परमं स्तुत्वयं तावद्दमं दण्डं धत्से करोषि रिपोः सुतानामपि पितेने नमित्रामित्रविभागेन सापराधिनां सर्वेषामपि संयम्य रक्षते स्वचित्तं न्याय्य एव तुल्यदृष्टेः यद्वा तु रिपोः दानिभक्तानां हितं कथ्याकरोतीति वेशास्त्रज्ञा न्यिकर्माणि स्वपुत्राय पिता यथेति उक्ते रीत्यानुग्रहमाणेनैतावत् पुत्रादीनामिव तातादिविकः हितव्याजं हितमेव करोषीति स्वचितं न्याय्योऽयं दण्डोऽयम् हन्तप एव वात्सल्यनिधेस्तवोचित इति भावः ३२ ॥

68

राम
६५

प्रातमेकानिमवोनिशितांत्रियस्यतस्यशतैकशीर्ष्णः कालियस्य शेषत्वाच्छीर्षेन छंदसोतिशिरः शब्दस्य शीर्षन्नादेशः यद्यच्छिरोन
नमते नम्रंनाभूत् तंगृहे राजंस्तत्तच्छिरः कर्मण्यंघ्रिपातैः खलदंडधरः हेतुगर्भं तत्वान्ममर्द कथंभूतस्य क्षीणमायुर्बलंवा यस्य तं
नमते नम्रंनाभ तं गृहे राजस्तत्तच्छिरः कर्मण्यंघ्रिपातैः ... भ्रमतः उल्बणमल्पमथिकं वा असृग्रुधिरं वमन्तुझिरन् नागः कालियः परमधिकं कश्मलं मो
हं लः नासातः मुखेभ्यः नस्तो नासिकाभ्यश्चोल्वणमुल्बणमधिकं वा असृग्रुधिरं वमन्नुज्झिरन्नागः कालियः परममधिकं कश्मलं मो
हं मूर्छां दुःखंवापलेभे २८ अक्षिभिर्नेत्रैर्विषमुद्वमतः पुनः रुषाक्रोधेन उच्चैर्निःश्वसतः श्वासमुंचतस्तस्य शिरःसु मध्ये यद्यच्छिरः
कर्तीसमुन्नमति उन्नतं बभूव तत्तत्पादस्थले नावनमयन्प्रणमयन्कौतुकं वर्त्ति तं ... यन् दमयांबभूव देवयामास कथंभूतः पुष्पैः पुष्प

यद्यच्छिरो न नमतेंग शतैकशीर्ष्णस्तत्तन्ममर्द खलदंडधरोंघ्रिपातैः क्षीणायुषो भ्रमत उल्बणमास्यतोसृङ् नस्तो व
मन्परमकश्मलमापनागः २८ तस्याक्षिभिर्गरलमुद्वमतः शिरःसु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः नृत्य
न्पदानुनमयन्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः २९ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तंमुखैरु
रु वमन्नृपभग्नगात्रः स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ३० कृष्णस्य गर्भजगतो
तिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं दृष्ट्वाहिमाद्यमुपसेदुरमुष्यपत्न्य आर्ताः श्लथद्वसनभूषण
केशबंधाः ३१ ॥

वर्षैः पुष्पजैस्तैः गंधर्वादिभिरित्तिकर्तृपदाध्याहारः तादृशत्विरं भगवंतं लक्षयति इहलास्मिन्
वसरे पुराणः उमानि वशेषा सर्वो भगवानि वाल स्य ते स्पर्धः २९ तस्य भग्नवतश्चित्रे लोकं देवनतांडवेन नत्येन निरुग्णं
नितरां पीडितं फणानां सहस्रं यस्य भग्नं गात्रं यस्य सः कालियः हे नृपमुखैरुरुधिरमधिकं वमन्नुज्झिरन् तदा तं कृष्णं चराचर
कं सर्वभूतनियंतारं पुराणं पुरुषं श्रीनारायणं स्मृत्वा तं शरणं मनसा ः रणं शरणं जगाम ३० कृष्णस्य गर्भजगतेतिभरेणा
वसन्नं पीडितं पार्ष्णिप्रहारैः पादप्रहारैः परितो रुग्णाः फणा एवातपत्राणि यस्य तमहिं कालियं दृष्ट्वा अमुष्य कालि
यस्य पत्न्यः दुःखिताः विश्लथा स्रस्ता वसनाद्यो यासां ताः आद्यं श्रीकृष्णमुपसेदुरुपजग्मुः ३१ ॥

नरा ४

भा.द. पू.मी. ७०

अस्य कालियस्य त्वत्पादरजःस्पर्शाधिकारः कस्यानुभावः प्रभावस्तत्पुण्यमयं न वेद वयमपि न विद्मः यद्वा कस्यनकु
स्यापि ईदृशि तादृशं पुण्यं नास्ति सर्वज्ञातो न किंचिदपि संभावितमिति वयं न वेद वयमपि न विद्म इत्यर्थः न तेषां नेन तदंघ्रिरेणोर्दु
र्लभत्वमभिप्रेतं तदेवाह यद्वांछया यदंघ्रिरेणुलिप्सया श्रीर्लक्ष्मीरपि ललनाय स्याः पादरजो ब्रह्मादयो लिप्संति सा
श्रीः [illegible] मानं [illegible] अतिरिक्तं तपः [illegible] स्यात्तुष्टौ तदर्थं तपश्चर्यापि [illegible] कामं [illegible] तया
ता तपो बहुकालमचरत् पुरा श्री वेदवती रूपेण तपश्चचारेति श्रीरामायणकथात्रानुसन्धेयते ३६ नन्वैश्वर्यकैवल्यादिफलो
र्जनीयः फलं चार्थे भवतः तान्विहाय किं विशेषेण मदंघ्रिरेणुं वांछंतीत्यत्राहुः नेति यत्पादरजः सेवमानास्ते पार
मेष्ठ्यादिभ्योऽतिशयं फलं [illegible] त्वत्पादरजः प्रपन्नास्ते पारमेष्ठ्यादिभ्योऽतिशयफलं प्राप्तं त्वत्पादरजः सेवमानास्ते नैव ता
ना: पारमेष्ठ्यादिकं न वांछंतीत्यर्थः तत्र पारमेष्ठ्यं चतुर्मुखब्रह्मपदं नाकपृष्ठं स्वर्लोकं सार्वभौमं चक्रवर्तित्वं रसाधिपत्यं भूलोकादध

69

कस्यानुभावोस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान्सुचिरं धृतव्रता। ३६
न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजःप्रपन्नाः ३७ तदेष नाथाप दुरापमन्ये
स्तमोजनिः क्रोधवशोप्यहीशः संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ३८॥

(margin: भूतलाधिप ... स्य २)

स्तलं लोकाधिपत्यं योगसिद्धीरणिमादीन् अपुनर्भवं कैवल्यं ३७ तर्ह्येवं रूपस्यापि कथं दुर्लभत्वमः स त्वत्पादरजःस्पर्शाधिकारस्त
त्राहुः तदिति एषोऽहीशः सर्पाधिपस्तमोजनिस्तमः प्रचुरजन्मा तत एव क्रोधवशः तदपि तथापि हे नाथान्यैर्दुरापं त्वत्पादांबुजस्प
र्शं प्राप लेभे यत्र देवलः समक्षः प्रत्यक्षत्वं तदन्यैर्दुरापं प्रापेति वाक्यशेषः [illegible] तदित्याहुः संसारचक्रे स्वकर्मभिर्भ्रमतो
जीवस्य यदिच्छया भवतः समक्षत्वं स्यात् एवं संसारचक्रे भ्रमतामपि लोकेऽत्र यज्जीवैः [illegible] विलोः रूपाकाष्ठ [illegible] जायते
इति स्मरणादितिभावः विभव इति पाठे त्वेवं यदनुग्रहस्यापि विभवः समक्षः स्यादेव यादृच्छिकादिसुकृतविशेषरूपव्याजमात्राव
लंबनेवाजजि [illegible] सत्यति यस्तवानुग्रहरूपो विभवः प्रत्यक्षः स्यादेव अन्यथा कस्यापि चेत्तस्य निर्हेतुत्वासंभवात्

(margin: अपुनर्भवं पारमे ष्ठ्यादिकं न वांछं)

७०

दंडस्याप्यनुग्रहरूपतामेव स्पष्टयति अनुग्रह इति भवताऽयं कृतो दंडः सोयं नोऽस्माकं मम द्विविषयेऽनुग्रह एव कुतो यतः ते दंडस्त्व
त्वत्तो दंडोऽसतां नोऽस्माकं कल्मषापहः दुरितापहः किं तत्कल्मषं यदपहं नाम दंडस्तत्राह अमुष्य देहिनः कालियाख्यजीवस्य
यत् यस्मात् कल्मषात् दंदशूकत्वं प्राप्तमिति शेषः तत्कल्मषापह इत्यर्थः अत एव तव क्रोधोप्यनुग्रह एवानुग्रहगर्भ एव तस्य
मतो विज्ञातः ३४ कृते किल्बिषे दंदशूकत्वमिति पदद्वयेन सा धर्माद्धत्वा हित्वा तमकमाऽकिंचन्यतर्पकार्थं एवं स्थिते
न्यायेश्वरानुग्रहतेनापि तं सुकृतवच भवमाति तप इति अनेनास्मत्कृतो पर्व सर्वस्मिन्जन्मनि निरस्तो दंडकारेण मानदेन
महत्त्वः प्रजाप्रदेन च सला किल तपः सुतप्तं सुष्ठु कृतं पाकं पचतीति वा किंदृशो अथवा सर्वभूतानुकंपया कश्चिद्धर्मो वा तद्विह

अनुग्रहोयं भवता कृतो हि नो दंडोऽसतां ते खलु कल्मषापहः यद्दंदशूकत्वममुष्य देहिनः क्रोधोपि तेऽनुग्रह
एव संमतः ३४ तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन धर्मोथवा सर्वजनानुकंपया यतो भ
वांस्तुष्यति सर्वजीवः ३५॥

तः स्यात् कथमेवं ज्ञायत इत्यत्राहुः यतः सर्वान् जीवयतीति कोऽप्येवान्यान्कः आत्मा दिति अल्पक्षरीत्या भोगमोक्षप
दानेन जीवयतीति तथा भवांस्तुष्यति तु श्लोभ विंतनावदद्वयतीतिभावः तयोपमन्यो रतिर्वचनीयत्वात्ति प्रायकं वि
शाद्धः अनेनानुष्ठितो तपो धर्मो द्वयमिति तथा नास्माभिस्तेऽत्र खि भि निर्विकल्पकभावेन विंते केवलं सर्वात्मना तनो भवेत
स्तोषालिंगान्तलिमितं किंचित्तपश्चादिकं कृतमित्युत मा स्याम इति भावः यद्वा तपः प्रमादिभिस्त्वं तुर्भिः कार्यं एव वा
विः क्रियते न्यायमर्थः पूर्वमनुग्रहरूपा हुताश्लाभागे वाने न निसर्गः न्कोः रेण एवानुसर्पेण किं तपः सुतप्तं न किंचिद
पवा को धर्मः न कश्चिद्धयतो येन तपसा पुम्भिश्चाभवांस्तुष्यति तेन किंचिदपि कृतमित्यर्थः स्वभावतः तस्य
निरस्तमानत्वाद्यसंभावनाम पक्षीना यत्र हिषोपपणानि ३५ कस्योति ॥

ग्रा.दु.
ह.टी.
७२

तिकारायेत्यर्थः सहकारकविकाराश्रयत्वमेव स्पष्टयति प्राकृताय भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधेति श्लोकद्वयोक्तप्रधान
भूतेषु सकलजगत्प्रकारादिकृतविकाराश्रयाय सत्वादिप्रकृतिगुणेनाभिनिमित्तकालस्यापि प्रधानस्येव मिहतावदासा
धारणं स्वतंत्रत्वं कालस्य सामानाधिकरण्ये निर्देशः ४८ ॥ कालाय कालात्मकायेत्यर्थः तत्कालमकुर्वन्नमूर्तस्य जगतो नम्या त्मकायेत्यर्थः इतिवच
त्वव्यूपाभेदनिर्देशस्य सम्पिलात्मादेश्चागन्तव इति वक्तुरात्मभावनिबंधनमित्यभिप्रायेणाह कालोऽस्मि वर्द्धते गम्भतायस्य सका
लनाभः सच्चात्यन्तपूर्वात्मा समलो भवत्यत्रात्रीति योगविभागाश्रयणात् सर्वसमासान्तोऽच्प्रत्ययः यद्वा काल एव नाभिर्नेम्य
रादीनामभिकरणं कालात्मकत्वेन यस्य सः काल इति यावत् देवमनुष्यादिदेहपरिवर्तनेन जीवस्य तत्कारकत्वं कालपरिवर्तनेन तत्
कृतिरर्कत्वेऽपि तत्तद्घात्वाद्यपोवलोकनेनेत्यभिप्रायेणाह कालावयवानां निमेषादिसंवत्सरान्तानां साक्षिणे साक्षाद्द्रष्ट्रे

१म

कालाय कालनाभाय कालावयवसाक्षिणे
विश्वाय विश्वरूपाय तत्कर्त्रे विश्वहेतवे ४९

70

परायभूतायेत्युक्तकारणत्वप्रयुक्तकार्यानन्यत्वाभिप्रायेण कार्यसामान्याधिकरण्येन निर्दिशति विश्वायेति विश्वा
त्मकायेत्यर्थः न तावत्मकत्वं किं तत्स्वरूपाभेदनिबंधनं नेत्याह विश्वरूपायेति विश्वं रूपं शरीरं यस्य तस्मै शरीरात्मभा
वनिबंधनं सामानाधिकरण्यमिति भावः यद्वा तत्त्वविशिष्टस्यैव कारणत्वात्तत्स्वस्वलचिदचिद्विशिष्टत्वात्मनासाक
म्भृत्वाभिप्रायेण विश्वायेत्युक्तिः विशेष्यस्यापि शरीरात्मभावनिबंधनं विश्वसामानाधिकरण्यमित्यभिप्रायेण वि
श्वरूपायेत्युक्तिः न केवलमुपादानकारणभूतायापि तु जगन्निमित्तभूतायचेत्यभिप्रायेणाह तत्कर्त्र इति
उपकरणाधिकरणादिकमपि त्वमेवेत्यभिप्रायेणोक्तं विश्वस्य हेतव इति हेतुत्वं कारकषट्कसाधारणं गोवलीव
र्दन्यायेन तत्कर्त्रे इत्युक्तिः ४९ विश्वाय विश्वरूपायेत्युक्तकार्येण सह विशिष्टविशेष्ययोस्तामानाधिकरण्योर्निरूप

राम
७२

द्वि३

नमइति दशभिः चतुर्भ्यो तानां भगवतेइत्यादीनां तुभ्यं नमइत्यन्वयः तत्राश्रितकार्यनिर्वाहकाश्रयेण सोऽवयोपाद
काश्चेति द्विविधाः शरण्यत्वेनास्तत्र ज्ञानशक्तिपरतिभास्याद्यत्वाश्रितकार्यनिर्वाहकाः तत्र ज्ञानमनिष्टपरिहारेष्ट
प्रापणोपयुक्तं रूपं तच्च ज्ञानविज्ञाननिधयइत्यनेनोक्तं ज्ञानमनिष्टपरिहारोपयुक्तं विज्ञानमिष्टप्रापणोपयुक्तं तयो
र्निधिराश्रयः तदुक्तं शक्तिर्नाम घटितघटनसामर्थ्यं आत्यन्तिकास्ववाचनं तत्र शक्तयइत्यनेनोक्तान्यप्रकरणे तस्मिन्सर्वशेषित्वा
दिगुणवृहत्वाद्वा विना भगवतइत्यनेन षाड्गुण्यपूर्णत्वाद्विनाश्रितैषा अविवादिते परत्वं स्वामित्वस्वामसत्ताकामत्वं प्राप्तिनिरूपा
धिकशेषित्वं आश्रयणे सोऽयं पोषकास्तुणः परत्वस्वामित्वसौशील्यवात्सल्यादयस्तत्र भूताय पराय परमात्मनइति
परत्वमुक्तं परत्वं नाम स्वेतरापेक्षया उत्कृष्टत्वं उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः
इति स्वेतरनिखिलजगदन्तः प्रवेशनप्रशासनाभ्यां व्याप्यगतदोषास्पर्शेन च अपारकत्वे हि परमात्मशब्दः प्रवृत्तिनिमित्तमवग

नमस्तुभ्यं भगवते पुरुषाय महात्मने भूतावासाय भूताय पराय परमात्मने ३९ ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तश
क्तये अगुणायाविकाराय नमस्तेऽप्राकृताय च ४०॥

तं अनेन स्वेतरनियाम्यसर्वेश्वरत्वापेक्षया उत्कृष्टत्वं स्पष्टमेव भू
ताय भूतापरत्वमत्र सर्वेभ्यः कारणतया प्रागवस्थितत्वं परमकारणत्वमित्यर्थः अनेनापि परत्वं स्पष्टमेव भूतावासाये
त्यनेन सौलभ्यमवगतं परत्वमुक्तोपि नमेवादिवहरतरोणि तुम् वेमभूत हृदयगुहावासइतिभावः अनेन सौलभ्यं सर्वत्रोक्तं ने
वपुरुषाय महात्मनइत्यनेन सौशील्यविवक्षितं स्वयं समुद्रंभसः पापिभिः [illegible] यन्मनाशस्तत्त्ववधाचामगोचरमहात्मपुत्रो
पियादृशानामन्यतमपुरुषरूपेणेति; महत्स्वश्रेष्ठ [illegible] भावः महतो [illegible] सौशील्यं महापराधीनंका
लियमनुग्रहीतुमुद्योगप्रत्योपन्न परेणोनेन [illegible] रणेत्वात्सल्यं व्यक्तमेवाब्रह्मणो [illegible] स्वावासाय परमात्मनइति याप्यगु
त्वोक्तया अस्यैव प्याप्यगतदोषपरिहृतः [illegible] हिता [illegible] तर्ष्टायेति कारणत्वोत्पत्ति [illegible] ममत्वं वि
कारश्रयत्वपरिहाराभिप्रायेणाविकारायेत्युक्तिः सच्चोरकविकारश्रयत्वेन कारणत्वेपि तत्तत्प्रूपतः स्वभावतश्चा

मं.टी. ५

भा० द० टी० ७२

नन्वेवंभूतं मां कथं केचिन्निमित्तकारणमेव वदन्ति केचिज्जीवाभिन्नं इत्याद्यत्यत आह। नानावादा वेदविस्तारा
वाञ्छिता तथा न निगमवेदान्तवादी कुतार्किकानां विप्रतिपन्नबुद्धीनां तन्नानावादानुरोधेपि प्रतीतार्थं यथा। तत्र हेतुः वाच्य
वाचकशक्तये वाचकाः तर्कादिप्रवक्तारो विवक्षितार्थविषयाः शब्दाः वाच्यास्तत्र तत्र विवक्षितार्थाः तत्र वाच्य
शक्तिरूपस्याप्यप्रयोगवत्तालक्षणेन वाचकशक्तिरूपस्य प्रकृत्वलक्षणेन इत्यस्य शक्तिरित्येहकत्वात्तानावादानुरो
धायेत्यर्थः ४२ एवमपि केवलं शास्त्रयोनये शास्त्रयोनिः कारणं सत्वरूपत्वमावपन्निमित्तमित्यत्र न कल्पसंततमेशा ति५
स्त्रस्यप्रमप्रमाणं विप्रलिप्सादिपुरुषदोषप्रमावत्वान्निराकुर्वन्नाह विशिनष्टि प्रमाणमूलाय प्रमाणं वेदप्रमितिसाध
नं यस्य तस्मै प्रमाणमूलाय तदाविष्कर्तृत्वेन तत्कारणाय तथा च स्मर्यते अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा आ

नानावादानुरोधाय वाच्यवाचकशक्तये ४३ नमः प्रमाणमूलाय कवये शास्त्रयोनये प्रवृत्ताय निवृत्ताय
निगमाय नमो नमः ४४ नमः कृष्णाय रामाय वसुदेवसुताय च प्रद्युम्नायानिरुद्धाय सात्वतांपतये नमः

दौ वेदमयी नाम्नाय ततः सर्वाः प्रवृत्तय इति श्रुत्यैव च अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इति ऋ
चः सामानि जज्ञिरे तस्माद्यजुस्तस्मादजायतेति च प्रमाणमूलत्वात् संभावितां निराकुर्वन्निति कवये सर्वज्ञाय सर्वी भा०
विप्रलिप्सात्वेन शास्त्राविष्कारोपपन्नमुक्तसार्वज्ञत्वपक्षाय न केवलं प्रमाणमूलायापि तु प्रमेयनिर्वाहकायापीत्याह। प्र
वृत्ताय निवृत्ताय च उभयकर्मविधायकाय निगमायोपनिषद्रूपप्रवर्तकाय ४४ तत्स्वरूपं रत्नाद्यर्थित्वा स्वरूप
गुणेषु कोऽनन्तव्यूह विभवाद्यवस्था इत्याह। नमः कृष्णायेति रामकृष्णादिविभवावस्थायां प्रद्युम्नानिरुद्धादिव्यू
हावस्थायां वासुदेवस्वभावायेति भावः। विभवावस्थायां सोऽत्यन्तकारुणिकत्वादिष्वतः इत्यभिप्रायेणाह वसु राम
देवसुतायेति विभवावस्थापि परिपूर्णत्वे प्रशील नमाह। नमः कृष्णायेति व्यूहविभवादिरूपे ७२
ण सात्वतामाश्रितानां पतये निरुपद्रवपरिहारप्रवर्तकपालकायेत्यर्थः ४५॥

वेधनद्वयमाह ॥ भूतेति भूतादिरूपेण परिणतत्वाद्भूतात्मने अत्र भूतादिशब्देन भूतादिकार्यरूपेण परिणता विशि द्वि।
ष्टप्रकृतिः परा एवं च कार्यवस्य ब्रह्माभिन्नकारणत्वस्य ब्रह्मणः इत्यर्थः भूतादीनामात्मने ततः प्रवेशप्रशासनाभ्यां भ
त्रे इत्यप्यर्थस्तत्त्रेण विवक्षितः भूतेः प्रवेशप्रशासनाभ्यां भर्तृत्वमेव स्यात्मशब्दप्रवृत्तिनिमित्तं तत्र भूतान्याकाशादी
नि मात्राः शब्दादयः इन्द्रियाणि ज्ञानकर्मभेदेन्द्रियाणि श्रोत्रादीनि दश प्राणाः पञ्च मनो बुद्धिश्चाप्यथो वासना एवं स्व
रूपाचिदचिद्विशिष्टस्य ब्रह्मणे देहयोः कार्यकारणभावो विशेषणविशेष्ययोः शरीरात्मभावश्चेति निर्वहन्नयमुक्तो अ
पचितत्वमात्मादिकरणेऽपि निर्वहन्नाह ॥ त्रिगुणेति सर्वत्र त्रिगुणेन्द्रियदेहकेनाभिमानेन दूरत्यभिमानेन दृश्या
छन्नत्वात्मात्मभूतिजीवानां यस्मात्तस्मैज्ञानविकासरूपजीवगतकार्यप्रतिकारणभूतायेत्यभिप्रेतोऽर्थः ४२ एवं जगत्कारणत्वे

भूतात्मा त्रेन्द्रियप्राणमनोबुद्ध्याशयोऽत्मने त्रिगुणेनाभिमानेन गृहत्वात्मानमूर्तये ४२ नमोऽनन्तायसूक्ष्माय
रूपस्यापविपश्चिते ॥

नयरव निर्वाहकेण लक्षितस्य परमात्मनः चिदचिद्विशिष्टस्य स्वरूपं विशेष्यांश भूतं जगन्निमित्तकारणं विशेषयं
ति नमोऽनन्तायेति अत्र सत्यादिवाक्यप्रत्यभिज्ञाप्यते अनन्तपदेन विकारवाद्यिनासत्यपदस्य विपश्चिच्छब्देन ज्ञानपद निर
स्य च प्रत्यभिज्ञानाहवि विधं पश्यतीति विपश्चित्सोनित्यासंकुचितसर्ववस्तुविषयकयमभ्रज्ञानाश्रयायेत्यर्थः।
स्वेषोदयादित्वाद्यशब्दस्य विभावः एवमचेतनावित्वविषय्याप्तायेषु क्रमवति अनन्तायेत्यनेन सर्ववस्तुता
मानाधिकरण्यादित्वरूपवस्तुपरिच्छेदराहित्यमुक्तं सर्ववस्तुसामानाधिकरण्याहत्वंचसर्वतः प्रवेशोन तत्छरीर
कत्वेन च तत्र कथमणुस्वरूपजीवांत प्रवेशो नेत्यत्राह सूक्ष्मायेति भावः परमात्मनः सकलशरीरत्वनाद सूक्ष्मायेति
अणोरणीयान् इतिश्रुतिविशेषेण सूक्ष्मात्सूक्ष्माभिव्याहितश्रुतिप्रकारेणात्मसूक्ष्मरीत्यासूक्ष्मादपि सूक्ष्मत्वेनाजीवांतः प्रवे
शायोग्यायेतिभावः ॥

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः परावरगतिज्ञाय संयमो ज्ञानाभिज्ञाय आश्रितानां मोचकायाश्रितानां बंधकाय चेत्यर्थः तथा चोक्तं भगवतैव तेषा
महं समुद्धर्ता मृत्युसंसारसागरात् इति तानहं द्विषतः क्रूरान्संसारेषु नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु
इति आश्रयणे मोक्षकार्यापादकोऽयं गुणः क्रूतापराधानप्याश्रयणेनैव पुण्यानां आज्ञावुलंघनेन रविं तु द्वेषेणासाश्रयणे मोक्षप्रापादकः
श्रमेन वैषम्यराहित्यकारुणिकत्वं चाक्षिप्तं तथा च समर्थितं सर्वज्ञोऽपि हि सर्वेशः सदा कारुणिकोऽपि सन् संसारतंत्रवाहित्वा
द्रक्षापेक्षामपेक्षते इति सर्वाध्यक्षाय सर्वं च रूपायाधिपतये आश्रितानां धर्मादिस्वात्मपर्यंतप्रदातृत्वे न परमदानवदान्याय
तथात्वेऽपि विशेषाशेषस्य विश्वशरीरकत्वेन तद्भिन्नत्वं तन्नियमितं तस्यैव स्वेतरोपकरणतया निरपेक्षत्वं च विश्वाय विश्व
पायतत्वे विश्वहेतवे इत्युक्तं तदेव विश्वाय तुभ्यं नमः इति एवमच्छंद विवादेन षाड्गुण्यपूर्णत्वाभिमुखत्वादि विशेषणा

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः अविश्वाय च विश्वाय तद्भूतस्य च हेतवे ४९ ॥

नांविश्वशब्दाद्यभिप्रेतविश्वानन्यत्वादीनां एक विशेष्यपर्यवसानात्मकं शब्दसामानाधिकरण्यमाह अविश्वाय नतास्मः सर्व वच
सां प्रतिष्ठा यत्र शब्दवृत्तीनां वाच्यमन्तमपि यत्करी सा सकलस्य वाच्याये त्यर्थः विश्वशब्दस्यात्र प्रविश्य बलात् द्वैतैकत्वात्स
र्वे नामकार्यभावः संज्ञाप्रवेक विधेरनित्यत्वात् एकैव सर्वशब्दवाच्यत्व प्रयुक्तः सर्वेषां पर्यायत्वं निरोद्धुर विश्वायेति तस्य
त्रमत्र न नञर्थः न विश्वो विश्वः तस्मै तत्तच्छब्दनिमित्तेभ्यो विलक्षणायेत्यर्थः न हि स्वस्व प्रवृत्तिनिमित्त विलक्षणैक विशेष्य
त्कीर्तिप्रवृत्तिनिमित्तविशिष्टैक विशेष्याभिधायिनां शब्दानां पर्यायत्वप्रसंग इति भावः कथं जातिगुणाद्याश्रयत्वे विशेष्य प
र्यवसायिनां एव विशेष्याभिधायित्वमित्यत्राह विश्वहेतव इति अस्य च हेतव इति च पाठः तदा विश्वपरामर्शी दंशब्दः जातिगुणा
द्याश्रयनिखिलविशेष्यजातगतसत्तास्थितिप्रवृत्तिहेतवे तत्सत्त्वादि हेतु विश्वस्य तदष्टथक्सिद्धविशेषणवाचिनां शब्दानां
मत्वर्थीयप्रत्ययमन्तरेण विशेष्यपर्यवसायित्वमानुकूलितयसिद्धमिति भावः विश्वसत्तादिहेतुत्वासंभावनां निराकर्तुं हेतुत्वो

पा[illegible]कत्वप्रकारमेवाह ः ज्ञानप्रदीपायेति सात्वतामित्यनुवर्त्तते तेषां ज्ञानस्यधर्मस्य तत्त्वानस्यप्रदीपायप्रदीपवद्वि
षयावारकतिवारकाय सात्वतां ज्ञानप्रदीपायेत्यनेना सात्वतां तेषु परोक्षं सूचितं तदेव स्वीकुर्वन्नाह ः ज्ञानात्म
कायेति ज्ञानं ज्ञानमयमात्मा यस्य तज्ज्ञानं जीवानसात्वतां ध्यायतिसंकुचितज्ञानान् करोतीति तस्मै तस्मै एतद्विशेष
णद्वयमसत्केवलस्वपरिजिहीर्षयां विशिनष्टि ज्ञानस्वरूपलभ्यायज्ञानस्वरूपेण आत्मकोमनोहरान्मासोपासना
मलस्वरूपयाउपलभ्याबोपलभ्याय ज्ञानहस्तिचपृथ्वाजमात्रा[illegible]लादेवमरहितायेति भावः ज्ञानस्वरूपरिज्ञाना
संभावनांनिराकुर्वतिज्ञानदृष्टेः सर्वलिःकरणवृत्तीनां साक्षाद्रष्टे त च देतुः स्वतं विदत्वा साधारणानि दृष्टिलनिति

नमोऽस्तु ते प्रदीपाय ज्ञानमाच्छादनाय च ज्ञानस्वरूपलभ्याय ज्ञानदृष्टे स्वसंवि
दे ४६ अव्याहतविहारायसर्वव्याहृतसिद्धये हृषीकेशाय नमस्ते स्तु प्रणयेभ्यो नमः
लिने ४७ ॥

पायिकनित्यसंकुचितधर्मभूतज्ञानाश्रयाय ४६ यद्यक्तं ज्ञानदृष्टा नर्हिं तथात्वेन किं न ज्ञायेत तत्राह अव्याहतोऽनभि
भूतः विहारः ज्ञानदृष्टात्त्वाद्विलोपायस्य तस्मै न केवलं ज्ञानदृष्टे पितु सर्वव्याहतानां देवादिपदार्थानां तद्धितिदत्तानां च
सिद्धये नित्यमिदेतं वेन केवलं तेषां स्थितिहेतुः सर्वेन्द्रियप्रशासिता चेत्यभिप्रायेण संबोधयति हृषीकेशेति हृषीकाणां
इंद्रियाणां ईशानियंतः शरण्योपेषतां गुणांतरमाह ः प्रणयेनाप्त्यानुरजोदेवगोवनाश्रयाद्धिकुमारगिकोयन्त
मसुखलेशानुचितमात्मकमुमनशीलाय मोनीयमल्याः परित्योरमधर्दत्वादुसादिस्तंदद्येर्य तजगन्नाज्ञोऽसम
नोपमासीन्नयेत्यर्थः अयमपिपरत्वावहे ज्ञानः ४७ ॥

भा.द.
पू.टी.
७४

अतोऽमुं यावत्क्षान्तिं दृष्ट्वा प्यनीयशंतः अत्र वत्सोढव्य एवेत्याहुः अपराधइति भर्त्रास्वामिनापराधः सकृत्सोढव्य इत्यर्थः परंत्व
रपराधे कृतस्त्वेन सोढव्य इत्यभिप्रायेण सकृदित्युक्तिः स्वप्रजाकृतः स्वप्रजाकृतत्वाच्च सोढव्य इत्यर्थः अत एव भगवतः पितृस्था
नीयत्वेनैव जीवानां तत्रस्थानीयत्वे चाभिप्रेते किं चाज्ञानकृतोऽपराधः क्षमापूर्णेन सह्य एव सर्वथैवेति लोकपरिपाटी प्रसिद्धे
त्याह क्षन्तुमर्हसीति अयथार्थत्वविषयत्वाभावितर्कं इत्यभिप्रायेण शान्तात्मन्निति सर्वोपकारी यद्वा कृतापराधे प्रधुनार्थं
तेष्वपि भगवत्कृपया पुण्यस्यान्ति मृत्युरात्मा अत एव प्रवणमनोयस्य तथाभूते तेषु सर्वोपसर्ग हस्यात्तु एव त्वामजानतः दंड
परिसि अपराधमिति भक्तिविपरीतामेवातव भङ्गः प्रकृतत्वात्क्षेप्तव्या ५२ हे भगवन्नयं पन्नगः सर्पः प्राणांस्त्यजति तेस्तु

अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः क्षंतुमर्हसि शांतात्मन् मूढस्य त्वामजानतः ५२ अनुगृह्णीष्व भगवन्प्रा
णांस्त्यजति पन्नगः स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां ५३ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया यच्छ्रद्धया
नुतिष्ठन्वै मुच्यते सर्वतोभयात् ५४ शुक उवाच इत्थं स नागपत्नीभिः भगवान्समभिष्टुतः मूर्छितं भग्नशिरसं विसस
र्जांघ्रिकुट्टनैः प्रतिलब्धेंद्रियप्राणः कालियः शनकैर्हरिं कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ५६॥

कीदृश साधुशोच्यानां साधुभिरनुकम्पनीयानां स्त्रीणामस्माकं पतिरेव प्राणः स प्रदीयतां ५३ युष्मदनुग्रहोऽन्येषां मृत्युरेवे
ति चेत्तत्राहुः विधेहीति हे त्वदाज्ञया पन्नगवनिकिंकरीणामस्माकमनुष्ठेयं तद्विधेहि अनुष्ठेये विशिंषति स कालियो यदनु
ष्ठेयं श्रद्धयानुतिष्ठन् भयात् मृत्युतापान्मुच्यते यथास्मत्तो लोका न भीताः स्युर्यथा चायं मृत्युभयान्मुच्येत तादृशमनुष्ठे
यं ज्ञापयेत्यर्थः ५४ एवं स भगवान्नागपत्नीभिः स्तुतः याचितः कृष्णस्त्वांघ्रिसंघट्टनैर्भग्नशिरसं घट्टनैर्भग्नशिरसं
मूर्छितं च कालियं विससर्ज ५५ ततः शनकैः प्रतिलब्धानींद्रियाणि प्राणश्च येन तथाभूतः कालियः कृच्छ्राद्दीर्घयासा
त् श्वासं मुंचन् कृतांजलिः कृष्णं प्राह ५६ उक्तमेवाह त्रिभिः ॥

राम
७४

73

स्तुत्याश्याविस्तारः कुमारक इति प्रयुक्तीत्यात्वं कुमारप्रायस्य लक्ष्मी रमन्तस्यास्य भर्तुः कदाचिदनकूलस्य स्वशरीरस्यैव स्वपत्र
स्यैव चापराधः कर्त्री कलेवरादिप्रदाने नातिलज्जी वोज्जिजी विषया सर्वजगदुदयाविभवलयलीलेन सर्वशरीरकेण विप्रलापपराध
वत्वं किं चित्रम् कल्पयुक्तज्जीविषयाक्लताबलारेणत्वया तो द्युचितइति द्वाभ्यां पर्यत्यस्तावन्नसेप्राणोरक्षां केकर्यं च प्रार्थयं ते त
मिति पंचभिः हे विभो त्वमस्य नादिकालावेशात्तियुक्तः न्यामोद्रसंकल्पेतरव्यापारशून्यः स्वाज्ञेनाकलितश्रम एव सृजत्यसौ इति
वचनार्थाभिप्रेतः गुणैरजः सत्वतमोभिरस्य जगतो जन्मस्थितिलयान् कुर्वन्तीति शेषः तत्र स्वस्वभावानपि सतो जीवान् समीक्ष
या नयद्गर्भीयादृष्ट्याप्रतिबोधयंस्तावद्वृंहनेन प्रवृत्तान् कुर्वन्नवस्थित इत्थं जगद्व्यापारस्वरूपविहारश्चेष्टसे यत्का समीक्षया बहु
स्यां प्रजायेयेत्युक्तया संकल्पात्मिकया दृष्ट्यानीहस्त्वं व्यतिरिक्तव्यापारशून्यः प्रलयदशायां तत्तत्स्वभावांस्तत्तत्कर्मवास

त्वमस्य जन्मस्थितिसंयमान्विभो गुणैरनीहोऽकृतकालशक्तिधृक् तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविहार ई
हसे ४० तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ता अशान्ता उत मूढयोनयः शान्ताः प्रियास्ते ह्यधुनावितुं सतां स्थातुश्च ते धर्मपरीप्स
येहतः ४१॥

नामलक्ष्णस्वभावमात्रयुक्तांस्तंसुचितत्तानाम्नस्प्नाप्राप्यान्स तो जीवान् प्रतिबोधयन्स्वारम्भोपयुक्तकारणकलेवरा
दिप्रदानेन विकासितत्तानानकुर्वन्न एवंविधं महोपकारं कुर्वन्मीति भावः अथ तिदृश जगव्यापारान्नक्ष विहारस्य जगतो जन्मा
दीनीहसे करोषीति यावत् तत्तत्स्वभावास्प्रतिबोधयन्नितियनेनसर्वे जीवसाधारणेन तच्छियक महोपकारैकशीलत्वमुक्ति
तएवमपराधानवेक्षणेन केवलमुपकारैकशीलस्य तव क्रियानयमपराध इति भावः ५ जन्मादीनीहसे इत्यनेन सर्वजीवा
न्प्रतितस्य वितस्थानोयत्वं प्रत्युक्तिं किं च तस्यैव प्रतिबोधयतो सृजन्नादीनीहमानस्य ते तव त्रिलोक्याममूः सर्वाः शान्ताः सा
त्विकाः अशान्ता राजसाः मूढयोनयस्तामसाः अप्यनूक्तजातीनवः देहाः आत्मीयाः त्रिपर्यायाः शेषाश्चेत्यर्थः सर्वाश्च तव स्वा एवे
ति भावः तत्र सर्वासामन्याश्च त्वे जगव्यापारे हेतुः दृश्यमानत्वादि यद्यप्येवं तथापि स्थातुः स्थितिकर्तुः तएवमताय धर्मपा
लनेच्छया ईहतः प्रवर्त्तमानस्य तव ताराः सत्वानि याभ्येतेष्वथामासत्तनवः न विदुरद्विगुणयाईशादिसदासदेवजन्मस

कृ

भा॰द॰ टी॰ ७५

मद्विहारस्थाने स्मिन् ह्रदे यः स्नात्वा जले देवानादिशाद्या तिन्हनुषी श्च तर्पयेउपोष्य मां स्मरन्नर्चेच्च स सर्वैः पापैः मुच्यते
इत्याशंतरं ६४ मनुगां हृदमयाद्भमुणकं त्यक्त्वा समुद्रद्वीपे हित्वास्मिन्ह्रदे प्रविष्टः भवनीति तत्र न मत्तं मां तेथा तत्र तत्राह द्वीपमिति य
त्साः सुपर्णस्त्वां मयाद्भेन ह्रदं त्वमाश्रितः सः सुवर्णस्त्वं नाद्या त्स त्वा यो नेत्र हेतुः मत्पादलाञ्छितं इति ६५ हे रत्नमलि [illegible] स्य मुक्तो
नागान्तं तस्य पूजया मास तथा नागपत्न्यश्च सादरं दिव्याम्बरादिभिः पूजयामासुः परार्ध्यै रन्तर्घ्यैः ६६ ततस्तं परिक्रम्य प्रवृत्ति
तोक्ष्रुत्या भिवाद्य च कलत्रादिभिः सहितः स्वश्रेष्ठीपं रमणकं जगाम ६७ क्रीडार्थेन तु कर्मफलं भोगार्थं मानुषत्वं

74

योस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः उपोष्य मां स्मरन्नर्चेत् सर्वपापैः प्रमुच्यते ६४ द्वीपं रमणकं हित्वा ह्र
दमेतमुपाश्रितः यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलाञ्छितं ६५ शुक उवाच एवमुक्तो भगवता कृष्णेनाद्भुतक
र्मणा तं पूजयामास मुदा नागपत्न्यश्च सादरं ६६ दिव्याम्बरस्रग्मणिभिः परार्ध्यैरपि भूषणैः दिव्यगन्धानुलेपैश्च
महत्योत्पलमालया ६७ ततः प्रीतोभ्यनुज्ञातः परिक्रम्याभिवाद्य तं सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम सः
६८ तदैव सामृतजला यमुना निर्विषाभवत् अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ६९ इति श्रीमद्भागवते महापु
राणे दशमस्कंधे षोडशोऽध्यायः १६ राजोवाच नागालयं रमणकं कस्मात्तत्याज कालियः किं वा कृतं सुपर्णस्य तेनैके
नासमञ्जसं १ ॥

यमस्यास्तीति तथा तस्य भगवतो नमस्यान्नदेव सा यमुना निर्विषा ऽमृततुल्यजला चाभवत् ६९ इति
दशमे षोडशोऽध्यायः १६ यदुक्तं द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः यद्भयादिति तत्र कालियस्य द्वीपत्यागनिमित्तं पृ
च्छतिः इति राजा नागालयमिति रमणकं तद्वीपस्थानां नागानां सुपर्णः भक्ष्यमस्तीति सूचितं अत एव तद्वाले कृतमिति तेन
केन कालियेन स्वस्य भयनिमित्तं सुपर्णस्यासमञ्जसमप्रियं किं कृतं अन्येषु निर्भयेषु सत्स्वप्येनं स्वभयनिमित्तं किमप्रि
यं कृतं अन्येषां वा भयाभावनिमित्तं सुपर्णस्यासमञ्जसमप्रियं किं कृतं अन्येषु निर्भयेषु च किमिति प्रश्नार्थः १ ता
वं तत्र त्यानां नागानां सुपर्णाद्भयाभावनिमित्तमाह उपहार्यैरिति ॥

राम
७५

वयमुत्पत्त्या सहउत्पत्तिम भ्रलिवला दुष्टास्तामसा दीर्घो मन्युर्येषां तथाभूताः स्म वयं इति तिर्यगभिप्रायेण निर्देशः अतएव
वयं च तत्र भगवन्नलिप्तेन तापोन स्वकं हे नाथ भूतानां स्वभाव उत्पत्तिकोत्पत्तेः दुस्त्यजः अयमतः स्वभावः असद्ग्रहः दुष्टपिशाचेत्तु
त्योतो दुस्त्यजः ५७ त्वयेति हे धातर्गुणविविधतयास्यत्वदुत्पत्तिगुणविसर्जनमिति वृत्तिरश्चां जालं त्वया सृष्टं रूपं भूतं नानास्वभा
वादयो यस्य तथाभूतं तत्र वीर्यं बलमोजः प्रवृत्तिसामर्थ्यं योनिः कृत्यलिङ्गो नेत्रं बीजं कारणमाकृतिः स्थानं ५८ ततः किम् तत्रा
ह वयं चेति हे भगवन् तत्रापि तिरश्चां मध्येऽपि वयं सर्पा जात्या जन्मनैवोरुमन्युर्येषां तथाभूताः त्वदनुग्रहमंतरेण दुःखेनापि सक्तु
पेशक्यां त्वन्मायामोहिता वयं त्वन्मायां स्वमायां कथं त्यजामः ५९ हि यस्मात्तत्र त्वन्मायायां भगवानेव कारणं

कालिय उवाच वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ५७ त्वया सृष्टमि
दं विश्वं धातर्गुणविसर्जनं नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ५८ वयं च तत्र भगवन् सर्पा जात्युरुमन्यवः कथं
त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयं ५९ भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि
नः ६० श्रीशुक उवाच इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं ६१ स्वज्ञात्यपत्य
दाराढ्यो गोनृभिर्भुज्यतां नदी य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ६२॥

त्वं तु सर्वज्ञो निग्रहानुग्रहोचितज्ञानवान् जगदीश्वरः तदुचितसामर्थ्ययुक्तोऽतस्त्वमनुग्रहं निग्रहं वा यन्मन्यसे त्वमेवं कुर्विति
निग्रहं चार्हं न संमागं इति भावः तत्त्वदभिमतं नोऽस्मभ्यं विधेहि आज्ञापय ६० कार्यमानुषः दुष्टदमनसाधुपरित्राणात्मककार्यार्थं मानुषः
स्वेच्छोपात्तमनुष्याकृतिरित्यं कालियस्य वचः आकर्ण्य प्राह उक्तमेवाह चतुर्भिः नेति हे सर्प अत्र हृदे त्वया न स्थेयं किंतु स्वज्ञातीना
दिभिः सह समाचिरमविरात्समुद्रं याहि ६१ नदी यमुना गोनृभिः भुज्यतां उपभुज्यतां तुभ्यं मत्कर्तृकं दुतानुशासनं एतच्चरित्रं य उभ
योः संस्मरन्कीर्तयंश्च स्यात् सयुष्मज्जयसर्पेभ्यो भयं युष्मद्भयं नाप्नुयादित्याज्ञान्तरं ६२॥

भा. द.
टी.
७६

अतस्तद्गम्यमित्यत्र तत्कारणमाह त्रिभिः तत्र ह्रदे कदाचित् गरुडः स्वामी इभं दंष्ट्रा जलचरं मीनपतिं क्षुधितः प्रसह्य बलात्
हृतवान् जहार कथंभूतः सौभरिणा निवारितोऽपि ९ एवं मीनपतौ गरुडेन हृते सति सुतरां सुदुःखितान् मीनान् दृष्ट्वा सौभरिः कृप
या तत्रत्यानां स्वस्थानां जलजन्तूनां क्षेमं मंगलमाचरन् कुर्वन्नाह १० किमाह ह्रदे प्रविश्य यदि मत्स्यान् खादति तर्हि स
गरुडः सद्य एव प्राणैर्वियुज्येत एतदहं सत्यं ब्रवीमीति शापात्मकं वचः ब्रह्मण्याक्यं सम्माननीयत्वात् स्वस्य परवशेन गरुडस्यापि तत्र
विषाक्तत्वाक्तिमत्तापि तत्परोधः उपपद्यते ११ एतच्छापात्मकं सौभरेर्वचः केवलं कालिय एव वेद सर्पः कोऽपि लेलिहः सर्पो
न वेद अतोऽयं गरुडाद्भीतस्तत्र ह्रदे वासीत् तत्र कृष्णेन निःकासितश्चेति कालियदमनात्मकवृत्तान्तोपसंहारः १२ अथ तत

तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ९ मीनान्सुदुःखितान्दृष्ट्वा दी
नान्मीनपतौ हते कृपया सौभरिः प्राह तत्रत्यक्षेममाचरन् १० अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति स
द्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं ११ तं कालियः परं वेद नान्यः कश्चन लेलिहः अवात्सीद्गरुडाद्भीतः कृ
ष्णेन च विवासितः १२ कृष्णं ह्रदाद्विनिःक्रान्तं दिव्यस्रग्गंधवाससं महामणिगणाकीर्णं जाम्बूनदपरिष्कृतं १३
उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे १४ यशोदा रोहिणी
नन्दो गोप्यो गोपाश्च कौरव कृष्णं समेत्य लब्धेहा आसन् शुष्का नगा अपि १५ रामश्चाच्युतमालिंग्य जहासा
स्यानुभाववित् प्रेम्णा तमंकमारोप्य पुनः पुनरुदैक्षत १६॥

उपरितनं वृत्तान्तमाह कृष्णमिति यावदध्यायसमा
प्तिः दिव्यानि स्रग्गंधवासांसि नागपत्नीभिः समर्पितानि यस्य तं महामणिगणैः मणीनां गणैराकीर्णं सर्वतः समलं
कृतं जाम्बूनदेन सुवर्णेनालंकृतं कृष्णं ह्रदाद्विनिर्गच्छन्तं कृष्णमुपलभ्यालब्धलब्धप्राणा असवः इन्द्रियाणीव सर्वे गोपादयः
उत्थितास्ते ततः प्रमोदेन निभृताः पूर्णा आत्मानो देहा मनांसि वा येषां ते गोपाः प्रीत्या कृष्णमभिरेभिरे आ
लिंगितवन्तः १४ यशोदादयो गोपी गोपाश्च नन्दादयो गोपाश्च हे कौरव कृष्णं समेत्य संगत्य लब्धमनोरथाश्च बभूवुः १५

राम
७६

75

हे महाबाहो प्राक् पूर्वकाले सर्वैर्जनैः सर्पा नो मा दशंत्विति तेषां यो बलिरुपहार्यैर्भक्ष्यैर्मासि मासि वानस्पत्यस्सः वनस्पति
रूपफलवृक्षैः तन्मूले देवो वानस्पत्यः वनस्पतिगृहे चं ... मावास्यायां प्रवर्त्तमानो वा निरूपितः कल्पितः २ तत्र सर्वे ना
गाः जनैः पर्वणि कल्पितं बलिं स्वं स्वं भागमात्मनां गोपीथाय रक्षणार्थं महात्मने सुपर्णाय प्रयच्छंति अतस्तत्र स्थानं न
गरुडाद्भयमस्ति सुखं ३ एवं सर्वेषु नागेषु प्रयच्छत्सु एष काद्रवेयः कद्रूवा सुतः कालियस्तु विषवीर्याभ्यां मदस्तेनावि
ष्टः सुपर्णं कदर्थीकृत्य तुच्छीकृत्य विगणय्येति यावत् तं गरुडाय देयं बलिभागं स्वयमेव बुभुजे ४ तत्कालियस्य कर्म

श्रीशुक उवाच उपहार्यैः सर्वैर्जनैर्मासि मासीह यो बली वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः २ स्वं स्वं भागं
प्रयच्छंति नागाः पर्वणि पर्वणि गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ३ विषवीर्यमदाविष्टः काद्रवेयस्तु कालि
यः कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं ४ तच्छ्रुत्वा कुपितो राजन् भगवान् भगवत्प्रियः विजिघांसुर्महावेगः
कालियं समपाद्रवत् ५ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्तकः दद्भिः सुपर्णं व्यदशद्ददायु
धः करालजिह्वोच्छ्वसितोग्रलोचनः ६ तं तार्क्ष्यपुत्रः स निरस्य मन्युमान् प्रचंडवेगो मधुसूदनासनः पक्षेण सव्ये
न हिरण्यरोचिषा जघान कद्रुसुतमुग्रविक्रमः ७ सुपर्णपक्षाभिहतः कालियोऽतीव विह्वलः ह्रदं विवेश कालिं
द्यास्तदगम्यं दुरासदं ८ ॥

कर्म श्रुत्वा तः भगवान् गरुडः कालियं हंतुं इच्छुर्महावेगः समपाद्रवत् ५ तमाप
तंतं सन्तं विषमेवायुधं यस्य स कालियस्तरसा वेगेन प्रत्यभ्ययात् इदं दशाद्दद्भिर्वा कथंभूतः उच्छ्रितान्यु
त्थितानि नैकान्यनेकानि मस्तकानि फणा येन दद्भिरेवायुधानि यस्य कराला जिह्वा यस्य उच्छ्वसितान्युग्राणि
लोचनानि यस्य स चासौ सच ६ अथ मधुसूदनस्यासनं वाहनं उपदेशात् यस्मिन्स उग्रः विक्रमो यस्य प्रचंडः वेगो यस्य सः तार्क्ष्य
पुत्रो गरुडः कोपयुक्तस्तं कद्रूसुतं निरस्य प्रदिः हिरण्यरोचिषा वामेन पक्षेण जघान ताडितवान् ७ सुपर्णस्य पक्षेणा
भिहतः कालियोऽतीव विह्वलः उद्विग्नस्तेन सुपर्णेन नागम्यं गन्तुमशक्यं ... यमुनायाः ह्र

भा० द०
टी०
७७

कर्मोऽवर्णयन्मुष्टादृशो तावत्तद्गोपैः तत्वेन कांश्चित्सोऽयंकृष्णो गोपालरूपधृक् कालं चानुवर्णयितुं तावद्व्रजे संगमयितुं
वृत्तशेषमाह अथेति अथ तद्भक्तिमतिक्रमानंतरं मुदितात्मा स्वानोऽमात्यांसि यथार्थाति ज्ञातिभिर्गोपैः सगोपैर्मान्यो भगवानु
गवां समूहेन मण्डितं व्रजं प्राविशत् १ गोपालछद्म गोपालरूपता इति यज्ञोऽयं लक्षया मायया आत्मीयसंकल्पेन स्वयं व्रजे सम्यक् क्री
डतोः सतो रामकृष्णयोरिति शेषः ग्रीष्माख्य ऋतुः प्रवृत्तः अनेन लोका वा तिका कातिस्वाचित २ स च यद्यपि शरीरिणां
नातीव सुखकरः तथापि वृन्दावनगुणैर्वसंत इव लक्षितः अत एव मतिक्रम्याधिकत्वं तस्य ते
गुणा इत्यत्राह यत्रेति यत्र साक्षाद्भगवान् केशवो रामेण सहास्ते भगवद्वासप्रभावेनैव गुणाधिक्यमस्तीति भावः यत्र वृन्दावने भग

76.

श्रीशुक उ० अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः अनुगीयमानो न्यविशद्व्रजं गोकुलमण्डितं १ व्रजे विक्रीडतो
रेवं गोपालछद्ममायया ग्रीष्मो नामर्तुरभवन्नातिप्रेयाञ्छरीरिणां २ स च वृन्दावनगुणैर्वसंत इव लक्षितः यत्रास्ते भग
वान्साक्षाद्रामेण सह केशवः ३ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं शश्वत्तच्छीकरर्जीषद्रुममण्डलमण्डितं ४ सरित्स
रःप्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोऽतिशाड्वले ५

वायुना सन्तस्य गुणैरित्यन्वयः ३ ग्रीष्मस्य वसंततुल्यतां व्यापयितुं वृन्दावनगुणाननुवर्णयति यत्रेति यत्र शब्दानां वृन्दावनस्य
हृचारितेभ्योऽम्भसो निस्सर्पः निर्झराणां घोषेण निवृत्तस्वनाः झिल्ल्यध्वनयः झिल्लिकाः [illegible]
[illegible] कस्यध्वनयः सत्यकीटविशेषाः यस्मिंस्तद्यथा भवति तद्वृन्दावनमभवदित्यर्थः किं च शश्वत् सदा तेषां [illegible] ना
[illegible] निर्झराणां शीकरैर्जलकणैः ऋजीषाः स्निग्धा द्रुमास्तेषां मण्डलेन मण्डितं ४ सरिदिति सरितां सरसां प्रस्रव
णानां च ये ऊर्मयस्तेषां संबंधिना वायुना कह्लारादीनां रेणून् हरतीति तथाभूतेन शाड्वलेति हरिततृणकोमलेति अत
एव शाड्वले दिवापि निदाघो ग्रीष्मस्तेन तापः कालिकवह्न्यर्कसंभवो भवति यो दवस्तापः स वनौकसां न विद्यते ५ नेत्रशाड्वल
मेव कुतस्तत्राह ॥

स्व

राम
७७

नागादयः परमां मुदं लेभिरे तत्र नगा वृक्षा अपि सर्वे मुक्ताः संतः पुनः फलपुष्पादिभिर्विरेजुः इत्यर्थः सभार्या विप्रा नंदं स
मेत्य कालियग्रस्तस्तवात्मजस्तस्माद्विमुक्तः दिष्ट्योऽयं महानंद इत्यूचुः १७ १८ नष्टप्राया पुनर्लब्धा प्रजा पुत्रो यया सती यशो
दा सुतं परिष्वज्यांकमारोप्य च बहून् आनंदाश्रुकणान्मुमोच १९ ततस्तां रात्रिं तत्र यमुनायास्तीरे एव व्रजौकसो गावश्चोष
रुषितवंतः क्षुत्तृड्भ्यां श्रमेण च कर्शिताः २० तदा एतौ वरणप्रभावो दवाग्निर्निशीथे सुप्ते व्रजं व्रजस्य परितः सर्वत आवृत्य
प्रदग्धुमुपक्रांतवान् २१ ततो दवाग्निना दह्यमाना व्रजौकस उत्थाय संभ्रांता व्याकुलचित्ता मायया स्वीयसंकल्पेन मनुजं सा

आगा गावो वृषा वत्सा लेभिरे परमां मुदं नंदं विप्राः समागत्य गुरवः सकलत्रकाः ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्त
वात्मजः १७ देहि दानं द्विजातिभ्यः कृष्णनिर्मुक्तिहेतवे नंदः प्रीतमना राजन् गाः सुवर्णं तदादिशत् १८ यशोदा च म
हाभागा नष्टलब्धप्रजा सती परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः १९ तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्शि
ताः ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः २० तदा शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजं सुप्तं निशीथ आवृत्य प्र
दग्धुमुपचक्रमे २१ तत उत्थाय संभ्रांता दह्यमाना व्रजौकसः कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं २२ गोपा ऊचुः
कृष्ण कृष्ण महाभाग हे रामामितविक्रम एष घोरतमो वह्निस्तावकान्ग्रसते हि नः २३ सुदुस्तरान्नः स्वान्पाहि कालाग्नेः
सुहृदः प्रभो न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयं २४ शुक उवाच इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः तमग्नि
मपिबत्तीव्रमनंतोऽनंतशक्तिधृक् २५ ॥ इति श्रीभागवते महापुराणे दशमे सप्तदशोऽध्यायः १७॥

ईश्वरं कृष्णं शरणं ययुः
रक्ष लोकाः पूर्वं त्वनाथास्मिन्नवंतः २२ शरण्यायानप्रकारमाह कृष्णेति द्वाभ्यां तावकांस्त्वदेकरक्षान्नोऽस्मानेष वह्निर्ग्रसति २३ स्वान्स्व
कान्सुहृदो नोऽस्मान्सुदुस्तरात्कालाग्नेः प्रलयाग्नितुल्याद्दावाग्नेः पाहि रक्ष यतो नास्ति कुतोऽपि भयं यस्मात्तं त्वच्चरणं संत्यक्तुं न शक्नुमः
न वयमत्तो विभिमो पितृत्वच्चरणं विधेयमादि लिभावः २४ इत्थं स्वजनानां वैक्लव्यं निरीक्ष्यानंतशक्तिधृक् स्वेच्छया भिदे तत्त्वात् जग
दीश्वरः कृष्णः शीघ्रं तमग्निमपिबत् २५ इति दशमे सप्तदशः १७ अथ बलदेवकृतं श्रीकृष्णेन कारितं प्रलंबासुरवधात्मकं कर्मा

भा॰ द॰
पू॰ टी॰
७८

क्वचिद्बिल्वादिभिरेवं तौ कृष्णरामौ गोपालक्रीडाभिस्तौ रामकृष्णौ वने चेरतुः संचरितवन्तौ इति त्रयाणामन्वयः । कुम्भो नाम
क्तत्वविशेषस्तस्य फले उद्धेरिति पाठान्तरे आमलके मुष्टिभिः कालिं सेवलिनगतमुष्टिः स्फोटैश्च अस्पृश्य करौ मिथो न स्प
ष्टव्य इति भावः बंधनतस्तु कुलं कमनेत्रबंध आगमिष्यतो कामकथनार्थं पाणिभ्यां कस्यचिन्नेत्रप्रछादनं मृगखगानां च गानं चेष्ट
या तत्सजातीयचेष्टया । १४ दर्दुरप्लावैः मिथ उपहासकैः परिहासवाक्यैः स्पन्दोलिकया हस्ताकारदोलालीलया नृपाणां इव लीले
याच १५ नद्यादिषु रामकृष्णयोः पशूंश्चारयतोः गोपरूपी प्रलम्बो अगादित्युत्तरेणान्वयः द्वयोः पूर्वेण संधिर्विशेष
ः तज्जिघांसया रामकृष्णनिच्छया १७ सर्वदर्शनो हेतुगर्भविशेषणं सर्वज्ञत्वात् तज्जिघांसया समागतं गोपरूपिणं प्रलम्बासुरं विद्वान्

क्वचिद्बिल्वैः क्वचित्कुम्भैः क्वचामलकमुष्टिभिः । अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया १४ क्वचिच्च दर्दुरप्लावैर्विविधै
रुपहासकैः । कदाचित्स्पन्दोलिकया कर्हिचिन्नृपचेष्टया १५ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने । नद्यद्रिद्रोणिकुञ्जे
षु काननेषु सरस्सु च १६ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः । गोपरूपी प्रलम्बोऽगादसुरस्तज्जिहीर्षया १७ तं विद्वान
पि दाशार्हो भगवान्सर्वदर्शनः । अन्वमोदत तत्सख्यं वधं तस्य विचिन्तयन् १८ तत्रोपाहूय गोपालान्कृष्णः प्राह विहारवि
त् । हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् १९ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ । कृष्णसंघट्टिनः केचिदासन्रामस्य
चापरे २० आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः । यत्रारोहन्ति जेतारो वहन्ति च पराजिताः २१ ॥

७७

अपि सख्योन तेन यथा विवाकापि रोषः । किन्तु पायान्तरेण तस्य वधं विचिन्तयन् तेन सह सख्यमेवारोचयत् १८ तत्र गोपानाहूय त
स्यो चितविहारस्य कृष्णो प्राह उक्तिमेवाह यथायथमाकृतिवयोबलानुरूपं द्वन्द्वीभूय संघद्वयं भूत्वा विहरिष्याम इति १९
तत्रैवं भगवत्प्रोक्ते सति गोपा रामकृष्णौ संघनायकौ चक्रुः तत्र केचित्गोपाः कृष्णपक्षीयाः बभूवुः अपरे तु रामपक्षीयाः २० ए
वं भूत्वा वाह्यवाहकेति भाववृक्षानो निर्देशः वाह्यत्ववाहकत्वे लक्षणे फले यासां ताः वाह्यवाहकाः जयपराजयकृतायान्त्विति या
तथाभूताः विविधाः क्रीडा आचेरुः ताः क्रीडा एव विशदयति यत्र यासु क्रीडासु जेतारः आरोहन्ति पराजितास्तु वहन्तीति २१ ॥ ॥

राम
७८

अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिर्हेतुभिः पुलिनैः सर्वतः द्रवत् पुरीषं पंको यस्याः तस्या भुवो रसं शाद्व-
लितं शाद्वलरूपतां च विषोल्बणा अपि सूर्यस्य करा यत्र न गृह्णन्ति ग्रीष्मतयोत्तीव्रा विषदृशा ततः तद्वनमाविशदि-
त्युत्तरेणान्वयः श्रीमत् फलपुष्पालयादिसंपत्तिमत् गायन्तो मयूरा भ्रमराश्च यस्मिन् नदन्तश्चित्रा मृगा द्विजाः पक्षिणश्च यस्मि-
न् गायन्तो मयूरा भ्रमराश्च यस्मिन् कूजन्तः कोकिलाः सारसाश्च यस्मिन् ७ तदेवंभूतं वनं भगवान् श्रीकृष्णः क्रीडिष्यमाणो ब-
लदेवेन संयुतः वेणुं विरणयन् गोपैर्गोधनैः संवृतः प्राविशत् ८ ततः प्रवालादिभिः कृतानि यैः तथाभूता

अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समन्ततः। न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृ-
ह्णते ६ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं गायन्मयूरभ्रमरं कूजत्कोकिलसारसं ७ क्रीडिष्यमाणस्तत्कृष्णो भगवा-
न्बलसंयुतः वेणुं विरणयन्गोपैर्गोधनैः संवृतोऽविशत् ८ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः रामकृष्णादयो गोपाः
ननृतुर्युयुधुर्जगुः ९ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे १० गोपजाति-
प्रतिच्छन्ना देवा गोपालरूपिणौ ईडिरे रामकृष्णौ च नटा इव नटं नृप ११ भ्रमणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः चिक्री-
डतुर्नियुद्धेन काकपक्षधरौ क्वचित् १२ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयं शशंसतुर्महाराज साधु साध्विति
वादिनौ १३ ॥

रामकृष्णादयो गोपा ननृतुर्युयुधुर्मिथो बाहुभिर्जगुश्च ९ कृष्णस्य नृत्यतः सतः केचिज्जगुः केचिद्वेणुपाणितलैः शृङ्गैः वेणवादि-
भिरवादयन् केचिच्च प्रशशंसुः १० गोपजातिप्रतिच्छन्ना साक्षाद्देवा बलरामौ रामकृष्णौ गोपालरूपिणौ देवास्तुष्टुवुः
ईडिरे नटा इव नटं १२ भ्रमणादिभिर्नियुद्धेन काकपक्षधरौ ... रामकृष्णौ चिक्रीडतुः ... भ्रमणं ...
... लंघनं ... क्षेपः ... आस्फोटनं ...
... विकर्षणं १२ क्वचिदन्येषु गोपेषु नृत्यत्सु सत्सु स्वयं गायकौ वादकौ च भूत्वा हे महाराज साधु साध्विति व-

च०२

हु०२

भा०द० पू०टी० ७५

अथ आगतस्मृतिर्लब्धासुरस्वरूपज्ञानो ज्ञात्वा अभयः बलदेवः आत्मनः सार्थं सहायं गोपसमूहं विहाय हरंतं रिपुं रुषा शिरसि दृढेन मुष्टिना अहनत् यथा सुराधिप इन्द्रो वज्रवेगेन गिरिं हन्ति २८ सोऽसुरः प्रलंबः आहतः सन् सपदि विशीर्णमस्तको मुखाद्रुधिरं वमन्नपस्मृतः अपगतस्मृतिः व्यसुः महारवं कुर्वन् समीरयन् पपात यथा इन्द्रवज्रेणाहतो गिरिः पतति २९ बलशालिना बलदेवेन हतं प्रलंबं दृष्ट्वा विस्मिता बभूवुः ३० आशिषः प्रयुंजानाः प्रशंसार्हं तं बलदेवं प्रशशंसुः मृतिं प्राप्य पुनरागतमिवालिंग्य प्रेम्णा विह्वलानि चेतांसि येषां ते तथा

78

अथागतस्मृतिरभयो रिपुं बलो विहाय सार्थं प्रवहंतमात्मनः रुषाहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा २८ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरमपस्मृतोऽसुरः महारवं व्यसुरपतत् समीरयन् गिरिर्यथा मघवत आयुधाहतः २९ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः ३० आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणं प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ३१ पापे प्रलंबे निहते देवाः परमनिर्वृताः अभ्यवर्षन्बलं माल्यैः प्रशंसुः साधु साध्विति ३२ इति श्रीभागवते महापुराणे दशमस्कंधे अष्टादशोऽध्यायः १८ श्रीशुक उवाच क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं १ अजा गावो महिष्यश्च निर्विशंत्यो वनाद्वनं ईषीकाटवीं विविशुः क्रंदंत्यो दवतर्षिताः

न्वयः ३१ परमनिर्वृता नितरां हृष्टा देवाश्च माल्यैः पुष्पैर्बलदेवं पापे सर्वदुःखकरे प्रलंबे निहते सति अभ्यवर्षन् साधु साध्विति प्रशशंसुश्च ३२ इति भागवते दशमे अष्टादशः १८ अथ दवाग्निपानात्मकं श्रीकृष्णकर्म तद्वर्णितुं तद्वृत्तांतमाह क्रीडेति प्रलंबवधानंतरमपीत्यादिना गोपेषु क्रीडासक्तेषु सत्सु तेषां गावो दूरचारिण्यो यथेच्छं चरंत्यस्तृणलोभेन गह्वरं विविशुः १ तदेव प्रपंचयति अजा इत्यादि वनाद्वनं विशंत्यः सर्वेन तापेन तर्षिताः आक्रोशंत्य ईषीकाटवीं [illegible] विविशुः ईषीकाटव्यो [illegible] शब्देन विवक्षिता २ ततस्ते क्रीडायातः

राम ७५

एवंक्रीडायांजयेनहेतुनावाह्यमानाःपराजयेनवहंतःगोधनंचारयंतश्चकृष्णप्रमुखायोगोपाःशनैःभांडीराख्यंवटंजग्मुः २३
तत्रयर्हियदाश्रीदामादयोरामसंघट्टिनःक्रीडायांजयिनस्तदातान्देहजन्कृष्णादयऊहुःउह्यवंतः २४ तत्रभगवान्कृष्णःप
राजितःश्रीदामानमुवाहचभद्रसेनस्तुवृषभंतत्रकृष्णसंघट्टिप्रलंबोरोहिणीसुतंबलदेवंउवाह २५ तावद्रामसंघट्टिजितैन
वहन्प्रलंबःश्रीमान्शंकोतिराजवर्त्तिविशिनष्टिकृष्णमविषह्यंसोढुमशक्यंमामवहतांतेस्मरणेनउर्वीहव्यंमन्यमानः
कृष्णसंघट्टिभिस्तारामेणपराजितस्तत्रैवोवाहेत्यर्थःयदाहिरामसंघट्टिभिर्जयंतदैवभद्रसेनपराजितत्वंवहेयंतस्मिन्अपरमसुर

वहंतोवाह्यमानाश्चचारयंतश्चगोधनं भांडीरकंनामवटंजग्मुःकृष्णपुरोगमाः २३ रामसंघट्टिनोयर्हिश्रीदामवृष
भादयः क्रीडायांजयिनस्तांस्तानूहुःकृष्णादयोनृप २४ उवाहकृष्णोभगवान्श्रीदामानंपराजितः वृषभंभद्रसेन
स्तुप्रलंबोरोहिणीसुतं २५ अविषह्यंमन्यमानःकृष्णंदानवपुंगवः वहन्द्रुततरंप्रागादवरोहणतःपरं २६ तमु
द्वहन्धरणिधरेंद्रगौरवंमहासुरोविगतरयोनिजंवपुः सआस्थितःपुरटपरिच्छदोबभौतडिद्द्युमानुडुपतिवाडिवांबु
दः २७ निरीक्ष्यतद्वपुरलमंबरेचरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ज्वलच्छिखंकटककिरीटकुंडलत्विषाद्भुतंह
लधरईषदत्रसत् २८ ॥

बलीयेयं३स्वभिप्रायेणकृष्णसंघट्टीबभूवेतिरोहिणीसुतंवहन्नवरोहस्थलतस्मिन्नित्य
वरोहणंमर्यादास्थानंततःपरंदूरंद्रुततरंयथास्यात्तथाप्रागात् २६ धरणिधरेंद्रवद्गौरवंयस्यतंबलदेवंवहन्महा
सुरःप्रलंबःनष्टवेगःनिजंस्वाभाविकंवपुरास्थितःसन्स्वर्णालंकारैःबभौतडिद्युमान्विद्युल्लंकातोपमाउडुपति
वाडितिसोमाप्रमायद्वियथोचितस्थानेभवितुंतोभासितउपरिचोडुपतिस्तदाबलदेवोयथाभवतितथाबभौ २७
हलधरःबलदेवस्तुतद्वपुर्निरीक्ष्यकिंचिद्बिभेतकथंभूतंअंबरेचरत्प्रकाशमानंभ्रुकुटितटदंष्ट्रःअलमति
वेगेनप्रदीप्तेदृशोयस्मिन्भ्रुकुटितटेउग्राउच्चादंष्ट्रायस्मिन्ज्वलंतश्शिखाज्वलंत्यःशिखाःकेशाःयस्मिन्कटकादीनां
त्विषाद्भुतंचित्रं २८ ॥

भा॰द॰
टी॰
८०

हरिराश्रितामिहरः भगवान्कृपणं वचनं तेषां निशम्याकर्ण्य माभैष्ट भयं मा कृत लोचनानि निमीलयत पिदध्वं
इत्युवाच ११ तथेति मीलिताक्षेषु गोपेषु मीलितानि नेत्राणि येषां तेषु सत्सु भगवानग्निमुल्बणं महांतं
पीत्वा तत्र हेतुर्योगाधीशः आश्चर्यात्मकयोगवता मुखेन पीत्वा तस्माद्दावाग्नेः
तेभ्यः मुक्ताग्निश्चेति द्विश्च तिः कृष्णः दावाग्निजातं भयं गोपानमोचयत् १२ ततश्च ते गोपालाः चक्षुः
उन्मील्य पुनर्भांडीरं प्राप्ताः आत्मानं मोचितं अन्यकाननप्राप्तं मेकवचनं गाश्च मोचिताः गाश्चावलोक्य विस्मिता आसन्
१३ कृष्णस्य योगमायायाः आश्चर्यशक्तिरूपया अनुभाविता तत्प्रभावविषयं कृष्णस्य योगात्मकं वीर्यं दावाग्नेरात्मनां

श्रीशुक उवाच वचो निशम्य कृपणं बंधूनां भगवान्हरिः निमीलयत मा भैष्ट लोचनानीत्यभाषत ११ तथेति
मीलिताक्षेषु भगवानग्निमुल्बणं पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् १२ ततस्तु तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः १३ कृष्णस्य योगवीर्यं तद्योगमायानुभावितं दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेऽमरं १४ गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः वेणुं विरणयन्गोष्ठमगाद्गोपैरभिष्टुतः
१५ गोपीनां परमानंद आसीद्गोविंददर्शने क्षणं युगशतमिव यासां येन विनाभवत् १६ इति श्रीभागवते दशमस्कंधे एकोनविंशोऽध्यायः १९

क्षेमं वीक्ष्य तं कृष्णममरं देवं मेनिरे १४ ततः सायाह्ने गाः निवर्त्य सयौ कृत्वा रामसहितो
वेणुं विरणयन्नादयन् गोपैरभिष्टुतो गोष्ठमगात् १५ ततो गोविंदस्य दर्शने गोपीनां परमानंदः आसीत् तत्र हेतुं वदन् द
र्शनं विशिनष्टि यासां गोपीनां येन कृष्णेन विना क्षणमपि युगशतमिव अभवत् अतस्तद्दर्शने परमानंद एव भवेदित्यर्थः
१६ इति श्रीश्रीधरस्वामिकृतायां भावार्थदीपिकायां एकोनविंशः १९ ॥ एवं वनं तयोरप्यहो भगवतः क्रीडनं अनुवर्णितं आश्चर्यं च दूरार
णोत्सवं आनंदं वर्णयितुं विंशाध्यायेन तावत्प्रथमं भगवत्क्रीडा वनलीलाविषयं प्रसादात्मकं दृष्टांतं तत्र उपोद्धातप्रदर्श
यन्निव प्रावृट्शरत्कालिकाः कौशिकी द्विहारीः श्वानवर्णयोपयते शरद्वर्णनं यतिविंशेनाध्यायेन तावत्प्रथमं भगव

79

दश
८०

कृष्णाद्यो गोपास्तदा पशून् अपश्यन्तो लएव जातानुकंपा येषां तथाभूताः गवां गतिं गतिं कृतां तत्खुरविन्यासात्मकं चिह्नं विचिन्वंतो
पि न लक्षितवंतः ३ ततः कृष्णं चिह्नं तासां गवां खुरैर्दलितैः तृणैश्च विच्छिन्नैस्तथा गोष्पदैश्चांकितं गवां मार्गमन्वगमन् अनुसृ
त्य जग्मुः ततस्ते नष्टो लीनः आजीव्यो जीवनसाधनमार्गो येषां ते तएव विचेतसः विचाराक्रान्तचित्ताः ४ मुंजाटव्यां भ्रष्टो लीनः
नः मार्गो यस्य तत् क्रन्दमानं गोधनं संप्राप्य तृषिताश्च तएव श्रांतास्ते गोपाः संन्यवर्तयन् न्यत्यावर्त्तयन् स्वेषणाद्विरेमिरे वा
५ तदा भगवता कृष्णेनापि घनस्येव गंभीरया गिरा आहूतास्ता गावः स्वस्वनाम्नां ध्वनिमाकर्ण्य प्रहर्षिताः प्रतिदध्वनुः ततः प्र

तेऽपश्यन्तः पशून् गोपाः कृष्णरामादयस्तदा जातानुतापा न विदुर्विचिन्वंतो गवां गतिं ३ तृणैस्तत्खुरदच्छिन्नै
र्गोष्पदैरंकितैर्गवां मार्गमन्वगमन्सर्वे नष्टाजीव्या विचेतसः ४ मुंजाटव्यां भ्रष्टमार्गं क्रन्दमानं स्वगोधनं संप्राप्य तृषि
ताः श्रांतास्ततस्ते संन्यवर्तयन् ५ तास्ताहूता भगवता मेघगंभीरया गिरा स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः
६ ततः समंताद्दवधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसां समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंग
मान्महान् ७ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं
मृत्युभयार्दिता जनाः ८ कृष्ण कृष्ण महावीर हे रामामोघविक्रम दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्ह
सि ९ नूनं त्वद्बांधवाः कृष्ण न चार्हत्यवसादितुं वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः १० ॥

तिनादेन गोधनं संजगामेत्यर्थः सोऽत्र विवक्षितं ६ ततः समन्ताद् यदृच्छया महान् धूमकेतुर्दवाग्निरभूत् क्षयं नाशं वनौकसां
ज्ञायं नाशं करोतीति क्षया सारथिना वायुना समीरितः उद्दीपितः उल्बणैरुल्बणैरुल्मुकैर्ज्वालाविशेषैः ... भिः स्थावरजंगमा
न् लोकान् विलेलिहानः ... ७ परितः आपतंतं तं दवाग्निं ... गोपाः गावश्च भीताः ... सब
लं कृष्णं प्रपन्नाः शरणं गताः ऊचुः यथा मृत्युभयेन संसारभयेनार्दिताः पीडिता जनाः हरिं ... प्रपन्नाः
स्तद्वदेनं विज्ञापयन्ति स्म ८ उक्तमेवाह हे कृष्ण ९ त्वमेव बान्धवो येषां ते ... इत्येव ...

भा.द.
टी.
८१

तडित्वन्त इति चंडश्वसनेन तीव्रवायुना कंपिता मेघाः प्राणिनां जीवनं जीवनसाधनं जलं करुणा इव यथा [illegible] घजंतः करुणा
इव इत्यमुमुचुः प्राणेन जीवनं स्यादिति पाठांतरं तत्रास्य विश्वस्य प्राणनं जीवनकरं जीवनं जलं करुणा इव यथा धुरि स्पृ
ष्टोजनः किंतु जनकस्य लोकस्य मेघवल्लभ्यास्तेन कंपितास्याः करुणा वंतेश्वसज्जीवनपर्यंतदाने नोपकुर्यात्इति शिष्टाः कर्ता
६ तपःकृशेत्याह तपसा कृशा प्राग् कृशा देवेन पर्जन्येन मीढा सिक्ता भूमिर्वर्षीयसी पुष्टा आसीत्तस्य संपन्ना वैन्मेदेत्यर्थः यथा काम्यं
तपो यस्य तपसः तनुस्तादृक्तपो दृश्यया तुष्टमतो तत्फलं काम्यतपः फलं प्राप्य परिपुष्टा भवति तद्वदिति अकाम्यतपसः केवं
लं देहसुखसाधनत्वे इति शिष्टा इति ७ निशामुखेष्विति शायंकालेषु खद्योताः तेजोविशिष्टाः कीटविशेषाः खमांति तत्र हे

80

तडित्वंतो महामेघाश्चंडश्वसनवेपिताः प्राणिनां जीवनं ह्यस्य मुमुचुः करुणा इव ६ तपःकृशा देवमी
ढा आसीद्वर्षीयसी मही यथैव काम्यतपसस्तनुः संप्राप्य तत्फलं ७ निशामुखेषु खद्योतास्तमसा भांति
न ग्रहाः यथा पापेन पाखंडा न हि वेदाः कलौ युगे ८ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन् गिरः तूष्णीं श
यानाः प्राग्यद्वद्ब्राह्मणा नियमात्यये ९ ॥

तुः तमसेति एते न दिवसे तेषां शोभा न स्तीति भावः न तु ग्रहाश्चंद्रसूर्यका द्याः मेघस्थं तमो हत्वा जयन्नस्तत्य
र्थः यथा कलौ युगे पापेन पापमत्र बलेन पाखंडाः वेदविरुद्धा आगमा एव भांति नतु वेदाः भांति तद्वदनेन वैदिकध
र्माभासरुचिः पापदेह केलिस्तत्वंति हे न किंच श्रुत्वेति पर्जन्यस्य निनदं गर्जितमाकर्ण्य मंडूका भेकाः गिरः व्यसृजन्
ध्वनिं चक्रुः यथा ब्राह्मणाः शिष्या आचार्यस्य नित्यकर्मत्यये आकृतेति शयानाः तस्य नियमा ये ये नित्यकर्माणि तान्यनु
समाप्य निवृत्य व्याख्यातेल वृत्त आनेनाचार्येस्य [illegible] संनिधा वध्ययनाव सरं प्रतीक्षमाणाः तूष्णीं मासीनास्ते
नियस्रचिते ९ ॥ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ

राम
८१

आत्मनश्चात्मनां दावाग्नेर्मोक्षणात्मकं तद्रामकृष्णयोरद्भुतं कर्म प्रलंबवधं च गोपाः स्त्रीभ्यो यशोदादिभ्यः समाचख्युः १ तज्जोपाले
हम्माकर्ण्य विस्मिताः गोपवृद्धादयः गोपश्च रामकृष्णौ व्रजं गतौ देवश्रेष्ठौ मेनिरे देवश्रेष्ठावेव रामकृष्णरूपेण व्रजे जातौ
इति मन्यंते स्म इत्यर्थः २ ततः प्रावृट् वर्षर्तुः प्रावर्तत प्रवृत्ता प्रावृड्विशेषणानि सर्वेषां प्राणिनां समुद्भव उत्पत्तिर्जीवनं च यस्यां
विद्योतमानाः परिधयो दिशो यस्यां विस्फूर्जितं कंपितं नभस्तलं यस्यां सा साक्षाद्दृष्टा वर्तते तथोच्यते ३ सांद्रैर्निबिडैर्नीलां
बुदैर्विद्युद्गर्जितसहितैराछन्नमत एवास्पष्टानि ज्योतींषि सूर्यचंद्रादीनि यस्मिंस्तद्व्योम सगुणं ब्रह्मेव बभौ यथा प्रकृत्याति
रोहितं ज्योतिर्ज्ञानरूपत्वाद्विषयप्रकाशरूपमस्पष्टज्ञानं यस्य तत्सगुणं ब्रह्म सगुणमेवं त्रयवर्ष्यं ब्रह्मस्थितं एतो दृहत्वाज्जीवस्य

श्रीशुक उ॰ तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च १ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः मेनिरे देवप्रवरौ रामकृष्णौ व्रजं गतौ २ ततः प्रावर्तत प्रावृट् सर्वसत्वसमुद्भवा विद्योत
मान [परिधि]र्विस्फूर्जितनभस्तला ३ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः अस्पष्टज्योतिराछन्नं ब्रह्मेव सगुणं बभौ ४ अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ५ ॥

तेर

परिधि

रूपं भासितं इत्यर्थः ४ अष्टौ मासानाकाशस्य यावत्सूर्यरंगी नीलांबुदविद्युतं नावितं संबंधवज्जीवस्य पावन्नेत्रिविषमत्वं सत्योद्वि
जौ ति स्यानीयवत्स्तत्पत्र कौचेन प्रसराभावः अोमवत्स्वतो ति मलस्यांगतुकमालिन्यं चेति तदपनोदकमो दोपायेप्रतित
व्यामिलक्षितेन ग्रस्थग्रहेन उक्तिदृष्टायां नाम्नापारहदल्पमलीति स्फुरितं ४ पदृच्छे मामानतं पनस्योगे द्वितीयाकालिका दा
रभ्य यावज्जेष्ठं स्वगोभिः स्वकिरणैर्निरंतरं पीतं रसीतं उदकात्मकं वसु पुनस्तत्स्वगोभिः स्वप्रनष्टचितं न काले मोक्तुमति
मो क्षं पर्जन्यो वर्षाधिदेवः सूर्यः आरेभे अनेन राज्याधिकृतः शिक्षितः पर्जन्य वर्षपो चितं काले प्रजाभ्यो धना
निरहीत्वा पुनरर्पणीयो रक्षादिति यावत्कालमा सूर्यरश्मीनां कामानसतिशनोवयज्ञ याद्विलिमुपरेरो नादा ५

तन्

गुरा

भा.द.
श्री.
८२

सरिद्भिरिति सिंधुः समुद्रः सरिद्भिः संगतः वातोच्छ्रलत्तरंगश्च चुक्षुभे संचचाल यथाऽपक्वयोगिनः अनिष्पन्नसमाधेर्यं सक्तं चित्तं वि
षयस्फुरणयुक्तं गुणगुणयुक्तं विषये क्षुभ्यत इति तथा मतं च संक्षुभ्यते तद्वत् कामाक्तं इति श्वसनोर्मिमान् गुणयुक् गोहि विरितेष मार्गव्यति
रक्तो च संविमिश्रितकामा जनगुणयोगनिवर्तकभगवत्समाधिविपाकाद्यैर्वर्तितरमिति सूचितं २४ गिरय इति हन्यमानाः शिलाभिरभिहन्य
मानाः अपि गिरयो न विव्यथुः यथाऽधोक्षजएवचेतांसि येषां ते व्यसनैरध्यात्मिकाद्यैः पीड्यमानाः अपि न व्यथंति रसज्ञ गवत कि
रेव तथा वर्षणयवि शालिनो भसकं भवति २५ मार्गा इति तृणैश्छन्ना अस्संस्कृताः अच्छन्ना वर्षासु पथिकानामुपयोगमलाभावादिति
भावः संदिग्धाः संदेहजनका बभूवुः यथा श्रुतयो वेदा द्विजैर्नाभ्यस्यमाना नावर्त्यमानाः इत्यसंस्कृततामंतः अतः कालेन च

सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वसनोर्मिमान् अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा २४ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः २५ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः नाभ्यस्यमानाः श्रुतयो द्विजैः कालेहताइव २६ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव २७ ॥

कालेन हता विस्मृताश्च भवंति कालहता इति दृष्टांतान्न साम्यं अनेनाधीतानां वेदानामावृत्तिं कुर्वीतैवान्यथा
प्रत्यवाय इति सूचितं तथा च स्मर्यते अधीतमपि यो वेदं न तं पालयति द्विजः स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वय इ
ति २६ लोकबंधुष्विति सर्वप्राणिजीवनभूतजलप्रदानेन मेघेभ्यः कर्तृत्वाल्लोकानां बंधुषु मेघेषु विद्युत [illegible] स्तडितश्चल
चचलसौहृदया सां ना बभूवुः अनियतदेशमल्पकालं च संसं चक्रुरिति यथा यदा स्थैर्यं न चक्रुरिति सपिंडानि कान्वपि च
लसौहृदाः सत्यस्थैर्यं न चक्रुः यथा कामिन्यः पुंश्चल्यः गुणिषु सौंदर्यशीलादिगुणान्वयेष्वपि निर्गुणेषु पुरुषेषु चल
सौहृदाः स्थैर्यं न कुर्वंति तद्वत् अनेन यत्नेन कामिनीनां संगः परिहार्य इति सूचितं भवति २७ ॥

78

राम
८२

आसन्निति अंबुभिर्वर्षजलैः हरिताः स्वच्छनघाः उत्पथवाहिन्यः आसन्न क्षुभ्यन्तीति पाठे शोभृरहिताः सत्सः उत्पथवाहिन्यः अक्षुभ्यन्तीत्यपि पाठः स्वदा आसन्न शोभा इत्यर्थः उभयत्रापि विभक्तिव्यत्यय आर्षः यथा स्वतंत्रस्येंद्रियपरवश्यस्य भोगे दुःखमस्तु यः न क्षुभ्यंतादानभोग योरभावात् यथा अनुक्षुभ्यंत्यः यम्प्रति उपयुक्तत्वेनेति भावः जितेंद्रियस्य तु दानभोगाभ्यां सुखं तत्र धर्मोपयोगश्च तथा वालनशोषाभ्यां द्वास पदां शोषो नास्ति च यः एवं अंबु हरिता इति पाठे त्वजितेंद्रियस्य यथा दुःखसंपदः वराटिका पर्यंतं स्पृष्ठं जनैः प्ररिताः स्तनाः पुनरर्थ्या दिमिर्निरर्थैव हृत एव उत्पथगामिन्यो वा तद्वत् अनेन स्वतंत्रेंद्रियसंपदः स्खलादयथोश्चेतिसूचितं १० हरितेति भूमिर्हरिभिर्हरितपर्णैः शाद्वलैर्हरित लोहितांद्रगोपैः कीटविशेषैर्लोहिता

आसन्नुत्पथवाहिन्यः स्वच्छनघोंबुहरिताः ध्वंसो यथा स्वतंत्रस्य देहद्रविणसंपदः ११ हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिता उच्छिलींध्रकृतच्छाया नृणां श्रीरिव भूरभूत् १२ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः धनिनामुपतापं च दैवाधीनमजानतां १३ जलस्थलौकसः सर्वे नववारिनिषेवया अबिभ्रन्रुचिरं रूपं यथा हरिनिषेवया

उच्छिलींध्रकुसुमैः कृतच्छाया आदित्य पीत वर्णा बभूव नृणां श्रीरिव यथा नृणां राज्ञां श्रीः सेनासंपत् हरितलोहितपीतवर्णापटैर्विचित्रवर्णा भवति तद्वत् इदं वाक्यं कथं कथयन् मिति सूचितं १२ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां नां मुदं फलमहेसाधीनं स्वजानतां मानिनां परसमृद्ध्या दुःखिनां तापं च ददुः अनेन परसमृद्धिं दृष्ट्वा हर्षवता भवितव्यमिति सूचितं १३ जलस्थलौकसः इति जलौकसः स्थलौकसश्च ते सर्वे नववर्षे नवस्य वारिणो निषेवया रुचिरं रूपमबिभ्रन् विभवः सत्सु प्रवेश विधि रंजितवाही धर्ता ध्वान्त्यत्न लक्षणं सभाः यथा हृदयकमलस्य हरिनिषेवया रुचिरं रूपविश्रान्तिलक्षणं बसतिहृदि समनाल ने च तस्मिन्भवति समान जगतोस्य सौम्यस्यरूप इति वचनात् अत्र उक्तं अनेन हरिसेवया विना न सौम्यते इति सूचितं १३ न यक्षान्तरलां व्यवहारलोकारमात्रपराणां शोवित्वाभरणादिसंपन्नवत्सर्थः अनेन नरवेलां संपत्स्वोपकारमात्रपर्यवसानो न तु परोपकारार्थं २

[illegible] ९४

भा॰द॰ स्कं॰टी॰ ८३

सरःस्विति तीरस्थं गृहेऽशान्तान्यसमाप्तानि कृत्यानि येषु तेषु ग्राम्याः गृहासक्ताः दुराशयाः विषयेषु दुराशया इव रमन्ते इत्यर्थः अशांतान्यनुपरतानि रोधांसि तीराणि येषु तेषु सरःसु सारसास्तीरमवसेदुः शुष्कतटाभावे जलमध्ये वसति यथा ग्राम्याः विषयोपरमाभावेऽपि गृहेषु वसन्तीत्यर्थः २२ जलौघैरिति ईश्वरे पर्जन्ये वर्षति सति जलौघैः सेतवो जलनिरोधार्थं भूम्या रचिता निरभिद्यन्त भग्ना बभूवुः यथा कलौ युगे पाषंडानां सत्यामसद्वादैर्वेदमार्गा निर्भिद्यन्ते तद्वत् पाषंडानामसद्वादैर्वेदमार्गा धर्माः ... २३ व्यमुंचन्निति वायुभिर्नुन्नाः प्रेरिताः सन्तो घना मेघा भूतेभ्यः अमृतं जलं व्यमुंचन् यथा द्विजैः पुरोहितादिभिः प्रेरिता नृपतयो राजानः

सरःस्वशांतरोधःसु न्यूषुरंगापि सारसाः गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः २२ जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे पाषंडिनामसद्वादैर्वेदमार्गाः कलौ यथा २३ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः यथाशिषो विश्पतयः काले काले द्विजेरिताः २४ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत् गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः २५ धेनवो मंदगामिन्य ऊधोभारेण भूयसा ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः २६ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः जलधारा गिरेर्नादादासन्ना ददृशे गुहाः २७ ॥

कानि२

तत्त्वविन्नकाले यथाशिषः कामानर्थिभ्यो विमुंचति तद्वत् राजाभिरेवं वितरणमित्युक्तं भवति २४ तदेवं वर्षर्तुमनुवर्ण्य पालनार्थं निजक्रीडां वनश्रीसहितां निवर्णयति एवमित्यादिभिः इत्यंग कामिभिर्जरादिफलानि यस्मिन्तं तीति तद्वर्षिष्ठं वृद्धतममतिमिति यावत् वनं हरिः सबलदेवो गोपालैः सहरंतुं प्राविशत् २५ भूयसा ऊधसः पयःकोशस्य भारेण मंदगामिन्यो धेनवो भगवताहूताः स्नुवत्स्तनाः सत्यो द्रुतमेव ययुः २६ वनौकसः प्रमत्ता नद्दृष्ट्वा इत्यन्वयः प्रमुदिताः पुष्पच्युत इति च वनराजी हि तस्य विशेषणं पुष्पच्युतः मधुनिस्रवंती प्रमुदिताः फलेषु चर्यतमभिः प्रमुदिता इवाथिताः प्रमुदिताः वनौकसः वलिं दीपिनिका गिरेः सकाशात् जलधारास्ताः सानादन्नासन्ना

82

राम ८३

स्या

यत्र रीति गुणनिशब्दगुणके विविधं कार्येमाहं दंध्यत्र निर्गुणं मोवीरदितमप्रभा क्वचिद्यथा गुणत्व तिकरेत्रणत्रयपरि ता मा
त्मके देह्यणवान् गुणत्रयरहित उपस्थोजीवोभाति तद्वत् विपक्षत्वं विवदेहात्मनो विलक्षण स्वरूपेणस्वरूपत्वभावत्व
त्वं १८ नेति उडुपस्थं स्वकीलि राजितेः प्रकाशितेषु नैमेघैः छन्नो नररोज तेभ्यो विलक्षणत्वयो नरराजेस्यैः यथा
पुरुषः प्रत्यगात्मा स्वभासा स्वात्मस्थ केमिदृश्यमेतज्ञानेनभासितया मध्नोलयाऽहंमत्यादेहात्मभ्रांत्या देहस्थस्य प्रका
शते तद्वत् देहात्मभ्रांतिरात्म स्वरूपाच्छादनहेतुरिति सा परं ... री हेत्थं १९ मेघेति मेघागमोत्सवाः एवा
पतो हृष्टाः प्रविवेशो मयूराः प्रत्यनंदन् यथा गृहेषु तप्ता ... पितपरिति शेषः अतएव निर्विण्णजना हरेर्भक्ता ना

यत्र वियति मोहं निर्गुणं च गुणान्यभात् यत्रैतरगव्यतिकरे गुणवान्पुरुषो यथा १८ नरराजोडुप छन्न :
स्वज्योत्स्ना राजितैर्घनैः अहं मत्याभासितया स्वभासा उडुपो यथा १९ मेघागमोत्सवा हृष्टाः प्रत्यनंदन्शि
खंडिनः गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे २० पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः प्राक्
क्षामास्तपसा श्रांता यथा कामानुसेवया २१ ॥

भागमे सति भविति दंति तद्वत् तापत्रयतप्ते देवश्च पन्ना च्युतजन
संगतिः कार्यमुक्तं २० पीत्वेति पादपाः वृक्षाः पद्भिर्मूलैः जलानि पीत्वा नाना विधा आत्मानां मूर्तयः शाखाः पु
ष्प फलादि रूपा येषां ते व्याप्ता आसन् बभूवुः यथा कामतपः फलरूप कामानुसेवातः प्राक् पूर्वं ग्रीष्म दशायां तपसा
श्रांताः क्षामाः कृशाश्च जनाः कामानुसेवया नानात्ममूर्तयो भवंति तद्वत् काम्यतपसः शरीरावयवकृश फलक
त्वमात्रं स्वचित्तं यद्वा फलाभिसंधिरहित भगवदाराधना त्मकेन तपसा श्रीमद्वैष्णावत्तपसा श्रांताः कृशाः स्वतः फ
लानुभवाल्लोक मूलादपि कामितकामाः भगवलःकृपया एणताते षामनुसेवया एकधापिभवंति विधास
त्वं तीता दिभ्यु सुत्कर्षत्व नानात्ममूर्ति मंतो भवंति तद्वत् नेन भगवदाराधनात्मकेन तपसः स्वेच्छातनूपाप्रा
तानेकशरीरप्राप्तिर्व्यक्तं भगवता भोग साम्य सायनत्व मुक्तं २१ ॥

ओम्लइति क्रमेण व्योम अमलं हृष्टीजलानां चतुर्णां मुमुक्षूणां वल्पैकमलानि चत्वारि पारदं पादरत् यथाह्य तुर्णां माश्रमि
णां मणग्राभं कृष्णभक्तिर्देहि इति तत्रावि मेघाभ्रमलानां ज्योतिः सलिलमरुतां एषं वल्पसपर्क वर्षाप्त ते मेघाः सं पक्षीच्छ
रति ते त्रिवृत्तेरितिभावः यथा कृष्णभक्तिः ब्रह्मचारिणो गृहस्थप्रदिष्टार्थ गृहस्थस्य प्रतिबंधकज्ञानात्मकमपुण्यं हरति
यथा च गृहस्थस्यसाविषयसंगदोषं वनस्थस्य विदृशत्वा स्वाश्रमोचितकर्मानि तच्छामक्षयक्रम प्रत्यवायं हरति। अत्र
स्वाश्रमिणोऽत्र विपदं तथा एषां पापानां कर्मभ्यं भूदितयर्थः अतो वश्यं चतुर्भिराश्रमिभिः कृष्णभक्तिः कार्येत्यर्थः ३४ सर्व
स्वमिति जलरामेघाः सर्वस्वत्व मलं जलं हित्वा प्रभवर्चोपवेति यथा मला विरेजुः यथा मुनयो नशीला

ओं स्रो वृ भ स्तृ शा वल्पं भुवः पंकमपो मलेश रजं दाराश्रमिणां कृष्णभक्तिये पात्रभूमं ३४ सर्वस्वं जल
दं हित्वा विरेजुः प्रभवर्चसः यथा त्यक्तैषणाः शान्ता मुनयो ऽकल्मकिल्बिषाः ३५ गिरयो मुमुचुस्तोयं क्वचि
न्न मुमुचुः शिवं यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ३६ नैवाविदन् क्षीयमाणं जलं गाधजले
चराः यथायुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ३७ ॥

स्प क्वा दारयनं भ्रान्तां ईषणां ये त्यक्ता यथा मला निरस्तपापाः सन्तो विराजन्ते तद्वत् अनेनावश्यं मुनिभिरेषणा
त्याज्या इत्युक्तं ३५ गिरय इति पर्वताः क्वचित्निर्मलं जलं मुमुचुः क्वचिन्न मुमुचुः तानि नोयथा क्वचित् तत्र नय
या यथा ज्ञानामृतं काले केभ्यश्चित् ददति केभ्यश्च न ददते अनेन सर्वेभ्योऽपि इष्टेभ्यो नोपदेष्टव्यं ज्ञा
निभिस्तन्निमित्तं तथैवो क्तं भगवता तदिदं श्रेयसे पालेन परिपृष्टेन सेवया उपदेष्टव्यमिति ज्ञानं ज्ञानिनस्तत्त्वदर्शिन
इति ३६ नैवेति गाधजलचरा अल्पजलचारिणः क्षीयमाणं जलं नैवाविदन् नेविद्वांसोऽपि यथा मूढा नरा कु
टुम्बपोषेण हताः नराः अल्पायुः तद्वत् क्षीयमाणं न जानन्ति तद्वत् अनेन कुटुम्बिभिरपि यथा
परिपालनीयं कुटुम्बं यथाऽऽत्मसंधानं मितं परितापवर्जितं भवितव्यमित्युक्तं भवति ३७ गाधे वारिचरा इति ॥

श्रा.टू. टु.ही. ८४ स्प३

83

राम ८४

नि

कदाचित्पर्जन्ये अभिवर्षति वनस्पतिक्रोडे वृक्षस्य मध्ये गुहायां वा प्रविश्य भगवान् कंदानि मूलानि फलानि च अश्नाति यस्य तथाभूतो रेमे २८ कचित्कदाचित् दध्योदनं तं स्वयं समीपे सलिलसमीपोपस्थितायां शिलायां पात्रभूतायां सम्भोजनीयैः गोपैः सह बुभुजे २९ कचित्शाद्वले परिहारं तृणसंकीर्णप्रदेशे उपविश्य वृषादीन् वीक्ष्य भगवान् सर्वभूतानां मुदं मोदं [illegible] तोति तथा तां [illegible] स्वसंकल्पात्मिकया उपबृंहितां प्रवृष्टेः तां प्रावृट्श्रियं पूजयां चक्रे बहुमन्यते स्म चर्वयः चर्वतो मीलितेक्षणान् तृप्तानिति च वृषादीनां विशेषणं चर्वतः तृणानि खादतः मीलितानीक्षणानि यैस्तान् दृप्तान् गर्वितान् स्वोधसां भरेण श्रमो येषां तान् गाश्च ३० ३१ अथ शरदागममाह एवमिति तस्मिन्व्रजे तं निवसतो रामकेशवयोः शरत्समभवत् सम्यग्व्यावर्त्तत कथंभूता

नू२

क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति निर्विश्य भगवान्रेमे कंदमूलफलाशनः २८ दध्योदनं समानीतं शिलायां सलिलान्तिके सम्भोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः २९ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् तृप्तान् वृषान्वत्सतरान् गाश्च स्वोधोभरश्रमाः ३० प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहां भगवान्पूजयां चक्रे आत्मशक्त्युपबृंहितां ३१ एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे शरत्समभवद्व्यभ्रा स्वच्छाम्ब्वपरुषानिला ३२ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ३३॥

शि५

विगताभ्रा मेघा यस्यां स्वच्छान्यम्बूनि यस्यां अपरुषः मृदुः वायुः यस्यां तत् स्वच्छाम्ब्वपरुषानिला कर्मधारयः ३२ अथ मुमुक्षूणां हितं दर्शयन्निव समीचीनैर्दृष्टान्तैः पारलौकिकान् धर्मांश्च वर्णयति शारदानीत्यादिना [illegible] एवं शारदा नीरजोत्पत्त्या नीराणि जलानि निर्मलानि बभूवुः [illegible] प्रकृतिं स्वभावं ययुः यथा योगिनां चित्तानि निर्मलानि [illegible] पुनर्योगनिषेवया प्रकृतिं यान्ति [illegible] पुनर्योगमेव सेवते इति शारदानीरजोत्पत्त्येति पाठान्तरं नीरजोत्पत्त्या [illegible] शरदा हेतुना नीराणि प्रकृतिं स्वच्छत्वादिरूपां ययुः ३३ [illegible] ३२ ॥

निर्मेघं मेघरहितं शरदि विमलास्तारका यस्मिंस्तत् खमाकाशं सत्वयुक्तं सत्वमशोभत यथा सत्वेन युक्तं चित्तं मनः सत्वयुक्तमिति यावत्तच्चित्तं शब्दब्रह्म लोकवेद स्य यो ऽर्थस्तस्य दर्शनं प्रकाशकं तेन तद्युक्तं तेनेति तथा आकाशो न केवलं तारकान्वितः सत्वयुक्तं ननु शब्दब्रह्मार्थो लक्ष्य तेने नेति तथा करणोल्लंघनं स्वरूप वर्णने लोके गणादि यस्मिंस्तत् सन्निर्मलमती द्वियवेदार्थप्रकाशकं तद्वदित्यर्थः सत्वप्राचुर्ययासंभवप्राप्तमित्यर्थः ॥ निर्मलं चित्तं ऋतुतादेकाल्यानेयावेदार्थाः परमात्मा तदपराधमाप्य पुकादिरूपं स्वरूपालंकारामाकाशस्थानीयं चित्तं भूषस्थानीयं ऋतु सत्वमिति विवेकः ४३ अखण्डेति शशी चन्द्रो व्योम्न्याकाशे निर्मेघे अखण्डं सर्वे मण्डलं यस्य स तथाभूतो नक्षत्रसमूहैः सह रराज यथा यदुपतिः श्रीकृष्णो वृष्णिचक्रेण वृष्णीनां समूहेनावृतो राजते तथा तैः अनेन वर्षाकालेऽपि स्वयं उपते संद्र्वनस्सर्वलोकाकाशदेकत्वमभिप्रेतं ४४ आश्लिष्येति जनाः समं सितं शीतं उष्णं चयस्य तं प्रसूनवने सत्वा तेजो कुसुमानि यस्मात् तमाश्लिष्य तापं जहुः गोप्यो ऽ

खमशोभत निर्मेघं शरद्विमलतारकं सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ४३ अखण्डमण्डलो व्योम्नि रराजो डुगणैः शशी यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ४४ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतं जना स्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ४५ गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाभवन् अन्वीयमानाः स्व वृषैः फलैरीशक्रिया इव ४६ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना राज्ञा तु निर्भया लोका यथा दस्यून्वि

न्यपश्यन्नंतः प्रस्तं जहुरित्यर्थः गोप्यस्तु तापं मन्मथतापं न जहुः तत्र हेतुं वदन्विशिनष्टि कृष्णेन हृतानि चेतांसि यासां तथाभूताः अनेन कृष्णस्य स्वकान्यवस्था गोपीचित्तसमाकृष्टि श्च सूचिता ४५ गावश्चेति गवादयः स्ववृषैः स्वस्वप्रियैरन्वीय मानाः शरदानिमित्तभूतया पुष्पिण्यो गर्भिण्यो ऽभवन् यथा ईश्वराराधनात्मिकाः स्वसाध्यैः धर्मादिभिः फलैरन्वीय मानाः समुत्सुका गर्भा भवंतीति तद्वत् अनेनेश्वरक्रियायाः फलाविनाभावत्वमुक्तं ४६ उदहृष्यन्निति कुमुदिति उत्पलप्रायमेकं वचनं कुमुदानि मुकुलानि विना सर्वाणि वारिजानि सूर्योत्थाने दुदहृष्यन् विकाशमनेहरहशद्वलं सूचिता क्व ऽः यथा हे नृप दस्यूंश्चोरादीन्विना तेते सर्वजना राज्ञा हेतुना निर्भया हृष्यंतीति तद्वत् अनेन राज्ञो दस्युदंडजं यशो भवेत्

गावः स्थिरा चराः ह्रुद्रजलचराः शारदियोर्कसतजं तापमविन्दन् लेभिरे यथा जितेन्द्रियः परतंत्रः कुडुवदिति द्राधनधान्यहीनाः क्षपणाः दीनाः ह्यत्यक्तता सृजन्ति तितघृत जितेन्द्रिये णभवितव्यमिति सूचितं ३८ स्थलानि शनैः शनैः पंकं जहुः वीरुधस्तामं मपचकताः जहुः यथा धीराः ज्ञानिनः शरीरादिषु देहेन्द्रियादिषु अनात्मस्वात्मव्यतिरिक्तेषु अहं ममता महंतां ममतां चेत् इति तद्वत् तत्रादेतासां मा मा मस्वेति विवेकः ययमयं ज्ञानिभिरहंकारममकारो यत्नेन परिहर्तव्य इत्युक्तं ३९ निश्चलेति शरदागमे शरदः प्रवृत्तौ समुद्रो निश्चलांबुस्तूष्णीमभूत् यथा मुनिः ऋग्भाष्यमननशीलः उपरतः अलपानाद्यागमो यस्य सम्यक् आत्मनि तान्नपानो पि आत्मनि शरीरे उपरते पि आदिकर्मणि उपरतमाख्यवत्यपि देहविपत्तिपर्यंत दशायामपि निश्चलस्तूष्णीमास्ते सकल

गावः स्थिरास्तापमविन्दन् शरदर्कजं यथादरिद्राः क्षपणाः कुडुंबा विजितेन्द्रियाः ३८ शनैः शनैः जहुः पंकं स्थलान्यामं च वीरुधः यथाहंममतां धीराः शरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे आत्मन्युपरते सम्यक् मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्वपोगृह्णन् कर्षकाः दृढसेतुभिः यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ४१ शरदर्कांशुजांस्तापान्भूतानामुडुपोहरत् देहाभिमानजं बोधो मुकुन्दो व्रजयोषिताम् ४२॥

प्रतिनैवं क्रियेन भवितव्यमिति शिक्षा ४० केदारेभ्य इति पंचमी कर्षकाः कलमाप्रवह तीव्रयः जलानि दृढैः सेतुभिर्बन्धनैः रक्षन्त्यवरुद्धवंतः ततः परं स्वस्वभावाद् इति भावः यथा योगिनः प्राणैरिन्द्रियैः द्वारैः स्रववन्यद्यदस्त्यवस्त्वसकल्पं ज्ञानं यथा मतज्ञानं तन्निरोधेन तन्मनस्वन्न पशोच्यूर्सुकुर्वन्तीति तद्वत् इन्द्रियनिरोधपरेण मनस्व न यथोरुप्सनुपरत्न भवितव्यमिति सूचितं ४१ शर दिति उडुपश्चन्द्रो भूतानां शारदियोर्कत्तुस्यांशुभ्यो जातांस्तापान् अहरत् अहरत् यथा बोधस्वरूपो मुकुन्दो व्रजयोषितां देहाभिमानजंतं तापं परस्परकलनिंदादि प्रयुक्तं दुःखं यथा स्वयं गोचरो बोधो हरति यथा च व्रजयोषितां तापं न मयत्प्रयुक्तं मकुन्दो जहार तद्वत् देहाभिमानजं तापं इति पाठे बोधः इति कर्तृपदमध्याहर्तव्यं यथा मे सुख्यार्थः ज्ञानेन देहवत्त्वज्ञानाभ्यां देहयात्मपरीत्वने निवृत्ति कर्तव्यं रस्युक्तं भवति ४२॥

भा॰द॰ २१ टी॰ पृ॰१

तत्कृष्णस्य [illegible] वेणुगीतं चेष्टितं वर्णयितुमारब्धाः आरब्धवत्यः तस्मात्स्मरोद्भवेन परमस्मरवेगेन [illegible] व्याकुलितचित्तास्तावद्वर्ण
यितुमेव शक्ता नाभवन् कृष्णश्चलच्चेष्टितं च तयोः समाहारः कृष्णचेष्टितमित्याद्यस्तदा कृष्णः चेष्टितं च तदुभयं स्मरस्योद्गा
पाकुवन्नि[illegible]तिवार्थः ४ कीदृशं कृष्णचेष्टितं मित्यत्राह वर्हेति वर्हस्य कलापो ऽडपीडं शिरोभूषणं बिभ्रत् नानां विभ्रदित्यने
नान्वयः कर्णयोः श्रोत्रयोः कर्णिकारं लाम्नालीकुसुमं स्वर्णकर्णपूरं वा तथा कनकवत्पिशंगं वाससश्च वैजयन्तीं मालां
नटवरस्येव वपुः श्रीविग्रहं नटवरवपुरिति कृष्णविशेषणं वा तस्य तस्य कृष्णपक्षे तद्विशेषणत्वमपि वर्हं

85

तद्वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितं नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ४ बर्हापीडं नटवरवपुः क
र्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालां रंध्रान्वेणोरधरसुधया पूरयन् गोपवृन्दैर्वृन्दा
रण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ५ इति वेणुरवं राजन् सर्वभूतमनोहरं श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्यो
ऽभिरेभिरे ६ ॥

पीडमित्यस्य बभ्रद्वीदिनान्वयः संभवति अधरस्य सुधया वेणोः रंध्रान् पूरयता धरसुधया [illegible] पूरयन् वायुना वेणुं वादयन्नित्यर्थः
गोपानां वृन्दैः गीता कीर्तिर्यस्य तथाभूतः सन् स्वपदैः [illegible] रमणं रतिजनकं वृन्दावनं प्राविशत् उक्तवेषं
कृष्णस्य वर्हापीडादिधारणं वेणुरंध्रपूरणं वृन्दारण्यप्रवेशं नाम कं चेष्टितं च स्मरन्त्यो नाशकन्निति पूर्वेणैवान्वयः ५ एवंता
वर्णयितुमशक्ताः [illegible] ततः शनैः शनैः लब्धाश्वासा वर्णयामासुरित्याह इतीति हे राजन् इत्थं तावद्वेणुरवं ता व्रजस्त्रियः सर्वभू
तानां मनोहरं वेणुशब्दमाकर्ण्य तमेव चेष्टितं वर्णयन्त्यः अभिरेभिरे रमितवत्यः अभिरे इति पाठे वर्णयितुं कृष्णेन
निधापितं मन्मथं भगवन्तं वा परिरेभिरे इत्यर्थः ६ ॥

भिरे १

राम ८६

रूपे

उरेभ्यामेषु चाम्नयतो नै तत्रनीत्यादि भेदलाभ्यतज्ञार्थैराश्रयणात्प्रयांगै [illegible] रिंद्रियप्रीत्यर्थै रत्नैश्वमदहेः रूसवै
सर्वसस्या स्याभर्वभो हरेः केलाभ्यां रामकृष्णाभ्यां तु नितरां वभौ छत्रिमायेन कलाभ्यामित्युक्तिः ४८ वणिजादयस्तावद्वर्षे
ण रुद्धाः शारदि निर्गम्यार्थानर्थयोजनानि प्रपेदिरे तत्र वणिजः क्रयविक्रयादिव्यापारेण मुनयः सन्यासिनः तपोजयिनः
स्नाताः तीर्थयात्रापराः एते वाणिज्यस्वच्छंदचारविजयतीर्थस्नानादिरूपानर्थान्प्रपेदिरे ३ सर्वे पूर्वं सिद्धाः तपःसिद्धाः फल
काले आगते सत्यस्मात् लोकान्निर्गत्य स्वोपिंडान्स्वस्वतपःसाध्यभोग्यजोतं प्रतिपद्यंते तद्वत् अनेन तपसः फलाविनाभावि
त्वमुक्तं ४९ इति दशमे विंशः २० इत्थं शरदमत्तवर्णयित्वा तदा रंदावने क्रीडतो वेणुं कर्णयतो भगवतो गोपीचित्तापहारिणः

उरस्यामेषाम्नयतो रिद्धिये श्वमदोत्सवे वभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ४८ वणिङ्मुनिनृपस्नातानि
र्गम्यार्थान्प्रपेदिरे वर्षरुद्धा यथा सिद्धाः स्वपिंडान्काल आगते ४९ इति श्रीभागवते दशमस्कंधे विंशोध्यायः २०
श्रीशुक उ० इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना न्यविशद्वायुना वातं सगोगोपालकोच्युतः १ कुसुमितवनराजिशुष्मिभृं
गद्विजकुलघुष्टसरःसरिन्महीध्रं मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुगीतं स्मरोदयं काश्चि
त्परोक्षं कृष्णस्य स्वसखीभ्योन्ववर्णयन् ३॥
वेणुं तद्व्रजस्त्रिय आश्रुत्य २

कांश्चित्स्त्रियस्तद्वेणुगीतं गोपीभिर्लीलयोपवर्णितमाहैकविंशे इत्थमिति इत्येवंभूतं शारदिकगुणसंपन्नं वनमिति वि
शेष्यमध्याहर्तव्यं इत्यभिप्रायेणाभिधेलं प्रकाशयन्व्याचष्टे शरदा स्वच्छानि जलानि यस्मिन् पद्माकराणां सौरभेण गंधो
वातेन यस्य तेन वातेन वायुना युक्तं वनं गोभिर्गोपालकैश्च सहितोच्युतो न्यविशत् १ तत्र च कुसुमितवनराजिषु शुष्मिणो मत्ता
भृंगगणा द्विजानां पक्षिणां च कुलैः घुष्टाः शब्दिताः सरितः सरांसि महीध्राः पर्वताश्च यस्मिंस्तद्वनं विगाह्य प्रविश्य यदु
स्ना पतिः कृष्णः पशुपालैः बलदेवेन च सहितश्चारयन्वेणुं चुकूज वादयामास २ स्मरस्योदयो यस्मात्तत् कृष्णस्य वेणुगीतं
आकर्ण्य काश्चिद्व्रजस्त्रियः कृष्णस्य परोक्षं सममसमक्षं स्वसखीभ्योन्ववर्णयन् ३ ॥

भा॰द॰
पू॰टी॰
८७

ईशात्मनामिति। देसति रसव्वनं भुवःको तिं लिलगो सनितरं साधारणं कीर्तिजनयतीत्यर्थः तन्नरेखे वृंदे यो विग्रोऽपंक्ति यदुनन्दनं देवकी
सुतस्य वरांतु जाया लभ्या लक्ष्मीः सौंदर्यं तं यदुनंदिं च गोविंदस्य वेणुमत्तवर्ण्यगीतमनुसरतामं दृग्जितनीलमेघभ्रांत्या मत्ता मयूरास्त
त्रांतस्समवलोक्य गिरिसानुस्थपलतानि वेणुगीतं तदनुपममस्वरतः स्वादिदं त्यागिनं तत्तत्स्वयापारोत्पन्नानि मयूरनृत्यानि सेत्का
नि समस्तानि सत्वानि जत्र्योयसिं तत्थाभृतं न स्यात्सोऽर्वविधोलोकइतिभावः १० धन्याइति मूढमतयोऽपि हरिण्योनुयोपिमत
य इतिपाठे। सुंदरसुंदरादि वेकुर्दितास्ममपि सर्वपापेभ्यो यमर्थः संभवेति सपर्यो वृष्ण्यो इति याया हरणमारा पाणो धन्याः हं
तापी एव कृतस्मतत्र विधिर्शाति यादृहरिण्यो वेणुगीतमाकर्ण्य उपात्तस्वीरुतायदृर्दिभिर्विचित्रौ वेषायेन तं नेदस्यंत प्रतिप

वंशत्वर्न सविभुवो वितन्नो तिकीर्ति यदेवकीसतपदांबुजलब्धलक्ष्मिगो विंदवेणुमत्तमत्तमयूरनर्तसंभ्रमे स्यादि सानवर
तानुसमस्तसत्वं ११ धन्याः स्मसूढमतयोपि हरिण्य एता या नंदनंदनमुपात्तविचित्रवेषं माकर्ण्य वेणुरणितं सहहसमाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ११ कृष्णं निरीक्ष्य वनितोत्सववेषशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं दे
व्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीवि: १२ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्त
भितकर्णपुटैः पिबंत्यः शावाः स्तुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः १३॥

णयमिहितेरवलोके: पूजांमन्यानं दधुःकृतवत्यः किंचकृष्णसादैः स्वपतिभिः सहिताएव दृष्टरम्यसतयस्तु गोपाः सुखमसकृ
नसहंतइतिभावः ११ मान्याःतु देव्योऽपि इत्याह कृष्णमिति वनितानामुत्सवो यस्मात्तच्छाली येषां यस्य तं कृष्णं
निरीक्ष्य तत्क्वादितस्य वेणोरस्य कोलेगीत चकृत्वा विमानेगच्छंतो देवानां स्त्रियः देवांगनाः मंगे कृष्यितः स्मरादृत्यध्यासुमुहुः
मोहं लिमालः भ्रश्यत्प्रसूनाः कबराः शुद्धयास्ताः शिथिलिनीविभ्रान्त्यापनाबध्नति १२ कृष्णमुखान्निर्गतं वेणुगीतमेव पी
यूषममृतममृतं भितैः कर्णपुटैः पिबंत्यः श्रुतवत्यः कवलाः के वलस्तनेभ्यः गलितस्तोयस्मान्मुखेषु दर्षात् तस्थुः विस्मृत
व्यापारावभूवुरित्यर्थः मात्र हेतुः गोविंदं हृशा हृदिमात्मणि प्रत्यानिविष्टस्पृशंत्यः आलिंगमाः स्नवएवाश्रुणां कलाश्रेण्यः
स्वनमिते तत्रलाशं कयेवोल्लमितैः कर्णपुटैः पिबंत्यस्तस्य स्तथाश्वावत्सा श्वसनयापानपवनामागीतं श्रुत्वा तदेवपीयूषमुत्तमितत्र २४ उरी

86

राम
८७

वलोनमेवाह ऋच्छत्वता मित्यादिना यावदध्यायसमाप्तिः इतीत्यस्य वक्ष्यमाणप्रकारेणोतिवार्थः तदा तमेव प्रकारमहत ए
वलामित्यादिना दर्शयति हे सख्यः चक्षुष्मतां जीवानां चक्षुषामिदमेव फलमन्यत्तु न विद्मः किं तद् व्रजे यस्य नंदस्य सुतयो
रामकृष्णयोर्वक्त्रं मुखं येर्नितरां पीतमनुभूतं दृष्टमिति यावत् तदेतत् ये वा निपीतं इति पाठः ये स्ते नैर्निपीतमिति च पाठो दृश्य
ते तत्राये श्रवस्तुष्ट्यङ्गि: सार्थे स्तेरस्त एव ङि: कर्तरि निपीतमित्यत्र इष्टे: कर्थभूत योर्वयस्यैः समानवयस्कैर्गोपैः सहपश्चन्नि वेश
यतोर्वनं प्रति प्रवेशयतोः कथंभूतं वक्त्रं मनुवेणुमनुवर्त्मगुणमनु वेणुनादयंत्यर्थः जुष्टं पश्यतां निरतिशयप्रीतिविषयमस्तु को
ना स्निग्धानां कटाक्षाणां मोक्षो विसर्गो यस्मिं स्तथाभूतु ७ अन्यास्त्वाडः चूतेति एवं भूत इत्रापि सत्ततएव सर्वेत्र वक्त्रभेदा
लातीवसंगतिरपेक्षा चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ मध्ये विरेज

गोप्यः ऊचुः अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यै
र्वा निपीतमनुरक्तकटाक्षमोक्षं ७ चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ मध्ये विरेज
तुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ ८ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधा
मपि गोपिकानां भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ९॥

लपीतांबरे नाभ्यां विचित्रौ वेषौ ययोस्तौ कृष्णकदाचित्क्रीडयमानौ गोपसभायां मध्ये नितरां विरेजतुः यथा रंगे नटश्रेष्ठौ तथा स्म
हे पश्यतां गोपानां महत्साम्यमिति भावः ८ हे गोप्यः अयं वेणुरस्माकं किं कुशलं पुण्यमाचरत् कृतवान् यद्यस्मात् गोपिकानामपि
दामोदराधरसुधां स्वयमेव भुंक्ते ...
...हृदिन्यो नद्यः ...
...हृष्यत्त्वच...
...हृदिन्यो विकसितकमलव्याजेन हृष्यत्त्वच...

भा॰द॰
रु॰टी॰
८८

पुलिंद्यः शबरांगनाः। पूर्णाः कृतार्था। कुतः उरुर्विघ्नोऽपि गीयते मुनिभिरिति उरुगायः कृष्णः तस्य पदाब्जयो रागो लाक्षारसस्तेन श्रीः शो
भा यस्य तेन श्रीकुंकुमेन कथंभूतेन दयितास्तनमंडितेन कृष्णप्रियास्तनयोर्मंडितेन आलेपितेन प्रक्रीडासमये उरुगायपदाब्जयो
श्रीकुंकुमसंपर्कस्तास्तनयोर्निहितस्तयोरुरुगायपदाब्जयोः कुंकुमसंपर्कः तदुरुगायपदाब्जाभ्यां वनसंचारदशायां तृणेषु
पतितं न लिंपेतानाननेषु कुचेषु च लिंपंत्यः कथंभूताः सत्यः तस्य कुंकुमस्य दर्शनेन स्मररुजा तृष्यास्तोत्तेपात्मताः सत्यः
आननकुचेषु लिंपंत्यस्तदाधिं [illegible] मन्याजहुरत्यक्ताः पूर्णा इति भावः २७ हंताबला अयमद्रिर्हरिदासश्रेष्ठः अहो च
रामकृष्णयोः हरिदास्याभिरुचिरिति विस्मये हंतेति कुतः यद्यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदः प्रमासो उदंचितो
यः रोमहर्षो लक्ष्यते नरामकृष्णचरणस्पर्शप्रमोदश्चालक्ष्यते किंच गोभिः सखिगणैः [illegible] सहितयो रामकृष्ण

87

पूर्णाः पुलिंद्य उरुगायपदाब्जराग श्रीकुंकुमेन दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आनन
कुचेषु जहुस्तदाधिं २७ हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः मानं तनोति सहगोगणयो
स्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः २८ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः अ
स्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रं २९॥

योयैः पानीयादिभिर्येषो चितं मानं पूजामा
तिथ्यात्मिकं करोति सूयवसानि शोभनानि तृणानि सुष्ठुशब्देरीर्घपाठे सुयवसेतिपाठेपि स एवार्थः कंदरेषु कंदानि च तैः २८
हे गोप्यः हे लता लीं काश्चिदाह गाइति हे सख्यः गोपकैः सह अनुवनं वनाद्वनं चारयतो निःक्रष्यत्यैर्वा भिरिति निर्योगादोहनवेलायां
गवां पादबंधनार्थो रज्जुः पाशस्तु उपेग्रगवा कर्षणार्थौ ताभ्यां कृतं चिह्नं लक्षणं ययोः शिरसि निर्योगश्चुभ्ने स्कंधयोः पाशधारणे
न च गोपश्चियाविराजमानयोरित्यर्थः एवंभूतयोस्तयो रामकृष्णयोः कलानि अव्यक्तमधुराणि पदानि शब्दा येषु तैरुदारवेणुस्व
नैर्महावेणुरवैर्हेतुभिः देहिनां मध्ये चराणां मस्पंदनं ईषदप्यचलनं तरूणां स्थावराणां तु पुलको रोमांचश्चेति विचित्रं जंगमानां
स्थावरधर्मः तस्थुषां जंगमधर्म श्चैवं नद्यतेति चित्रमित्यर्थः २९॥

चित्रमितिर

मूलानि २

राम
८८

प्राप्स्यति अंबवेमातः अस्माकमपि एतादृशं संबोधयंति अंबेति यस्मिन्वने विहगाः पक्षिणः प्रायशो मुनयो भवितुमर्हंतीति कुतः येवि
हंगाः रुचिराः प्रवालाः पल्लवा येषां तान् द्रुमाणां भुजान् शाखाः आरुह्य स्वभोग्यं फलादिकं विहाय केवलं कृष्णेक्षितं दर्शनं यस्मिंस्तद्य
था भवति तथा तेनोदितं प्रकटितं मधुरं वेणुगीतं केनापि प्रकारेण मीलितदृशः स्वकान्यावाचः संतः शृण्वंति तथा हि मुनयः वेद
द्रुमशाखां आश्रिताः कृष्णसंदर्शनं यथा भवति तथा काम्यकर्मफलत्यागेन भगवदेकहृदयाः सन्तस्तन्महिमानमेव शृण्वंति
तएवैते भवितुमर्हंतीति १४ आत्तचेतननद्या अप्याह तदभिप्रायेणाह नद्य इति तद्धायधाचेतना स्तद्वद्चेतना नद्योपि तन्म

प्रायो बताम्ब विहगा मुनयो वनेस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतं आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् शृण्वं
त्येवं तिमीलितदृशो विगतान्यवाचः १४ नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः १
आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंति पादयुगलं कमलोपहाराः १४ दृष्ट्वातपे व्रजपशून्
सह रामगोपैः संचारयंतमनु वेणुमुदीरयंतं प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युः
र्व्यधात्स्ववपुषाम्बुद आतपत्रम् १५ ॥ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ।

वेणुगीतं २ कुंदमुकुंदगीतं उपधार्य श्रुत्वा तत्प्रेमात्मानमभिप्रायं कमिदं आवर्तैः परिभ्रमतैः लक्षितेन मुरुचितेन मनोभवेन मग्न
येनुभग्नो वेगो यासां ताः आलिंगनेन स्थगितं समाच्छादितं यथा भवति तथा ऊर्मय एव भुजास्तैः कमलान्युपहाराः
पुरारेः पादयुगलं गृह्णंति धारयंति १६ दृष्ट्वेति तीव्रधर्माः तीरे आतपे इति पाठांतरं तदा तस्मिन् रामेण गोपैश्च
सह व्रजपशून् संचारयंतं अनुगमनं पश्चाद्गमनं वेणुमुदीरयंतं वादयंतं श्रीकृष्णं दृष्ट्वा अंबुदो मेघः उदितः उन्नतः प्रेमा
प्रवृद्धः सख्युः श्रीकृष्णस्य लोकान्तर्दृश्यनीलवर्णत्वसाम्यदर्शनात्सख्युरिति कृष्णं उपरि स्थितिप्रापः कुसुमैः सम्यक्तुल्यै
स्तुषारैः स्वस्वचपुषा आतपत्रं व्यधाच्चकार १७ शारदं गगनमामदिभागपूर्वयंकले मिमदंईति समीलास्मा
र्गो इति ॥

भा॰ द॰ टी॰ ८९

